# THE KASHMIR SERIES

OF

TEXTS AND STUDIES.

Kashmir Series of Texts and Studies.
No. LV.

# THE
# LAUGAKSHI-GṚHYA-SŪTRAS

WITH
THE BHĀSHYAM OF

## DEVAPĀLA.

EDITED
BY
PAṆḌIT MADHUSUDAN KAUL SHASTRI, M. A., M. O. L.
VIDYĀVĀRIDHI,
Superintendent Research Department,
His Highness' Government,
JAMMU & KASHMIR,
SRINAGAR.

Published under the Authority of the Government of
His Highness Rājarājes'vara Mahārājādhirāja
S'ri MAHĀRĀJA HARISINGHJI BAHĀDUR,
G. C. I. E., K. C. V. O.,
MAHĀRĀJA OF JAMMU AND KASHMIR.
Volume II

BOMBAY:
PRINTED AT THE 'NIRNAYA SAGAR' PRESS.
1934. A. D.

ॐकारो यस्य मूलं क्रमपदजटिलं यस्य च्छन्दांसि शाखा
ऋक् पत्रं साम पुष्पं यजुरुचितफलं स्यादथर्वा प्रतिष्ठा ।
यज्ञश्छाया सुशीता द्विजगणमधुपैर्गीयते यस्य नित्यं
शक्तिः सन्ध्या त्रिकालं दुरितभयहरः पातु नो वेदवृक्षः ॥
सुच्छायः स्थिरधर्ममूलवलयः पुण्यालवालान्वितो
धीविद्याकरुणाक्षमादिविलसद्विस्तीर्णशाखाश्रितः ।
सन्तोषोज्ज्वलपल्लवः शुचियशःपुष्पः सदासत्फलः
सर्वाशापरिपूरको विजयते श्रीवेदकल्पद्रुमः ॥

ॐ

काश्मीर-संस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ५५

# लौगाक्षि-गृह्य-सूत्राणि

देवपालकृतभाष्योपेतानि ।

श्रीराजराजेश्वर-महाराजाधिराज-कश्मीरनरेन्द्र-श्रीहरिसिंहजी-बहादुराज्ञया

रिसर्च-कार्यालयाध्यक्ष-पण्डित-मधुसूदनकौल-शास्त्रिणा

उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन

संशोधनादिसंस्करणोत्तरं

संपाद्य

मुम्बय्यां 'निर्णयसागर' मुद्रणालये मुद्रापयित्वा प्राकाश्यमुपनीतानि ।

द्वितीयो भागः ( उत्तरार्धम् )

संवत् १९९१. काश्मीर-श्रीनगर ख्रैस्ताब्दः १९३४.

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya-sagar Press,
26-28, Kolbhat Lane, Bombay.

**Published by Pandit Madhusudan Kaul Shastri, M. A., M. O. L.**
**for the Research Department,**
**Jammu and Kashmir Government, SRINAGAR.**

# Vol. II

## List of further Abbreviations used in the Laugākshi-Gṛhya-Sūtras.

| | | |
|---|---|---|
| उ० | = | उणादिसूत्र |
| ग० पु० | = | गरुडपुराण |
| आप० ध० सू० | = | आपस्तम्बधर्मसूत्र |

---

## विषयसूची. ( List of contents. )

# शुद्धिपत्रम् ( Corrigenda. )

| पृ० | पं० | शुद्धम् | अशुद्धम् |
|---|---|---|---|
| १० | ४ | यैह्य | येह्य |
| २२ | ११ | संस्कारैः | संस्थानैः |
| ,, | १६ | भङ्ग्या प्रश्ने | भङ्गिप्रश्ने |
| ३० | १७ | ण्योऽनु प्रयाण | ण्योऽप्रयाण |
| ३२ | १ | ब्राह्मणानां | ब्राह्मणाना |
| ३६ | ३ | अभिराभि | अभिराभ्य |
| ,, | १४ | क्षस्त | क्षं त |
| ३८ | ४ | ग्रहणप्र | ग्रहणं प्र |
| ५४ | २० | लभेयेत्यर्थः | लभेयमित्यर्थः |
| ५५ | १४ | आप्नुयां | व्याप्नुयां |
| ५७ | १२ | यान्तीभिः | यतन्तीभिः |
| ५८ | ४ | गच्छत | गच्छन्ते |
| ६३ | १२ | सूर्यः स | सूर्य स |
| ६८ | ९ | मेव संवि | मेव नीरं संवि |
| ,, | १९ | यिफलानाचरिता | यिफलाचरिता |
| ८७ | १६ | संस्कृतवन्तः | संस्तम्भवन्तः |
| ८९ | ३ | सुपां सुलुगित्या | सुपां सुबित्या |
| ९५ | ८ | यश्छन्दसां | यच्छन्दसां |
| १०७ | १३ | लकारव्यत्ययः | लिङ्व्यत्ययः |
| १२६ | १८ | ओषधीषु | औषधीषु |
| १७७ | ३ | विश्वाः सर्वा | विश्वा सर्वा |
| १८६ | १२ | सुष्ठु | सुष्ठु |
| १९० | १५ | आह्वातुं | आह्रोतुं |
| २३० | ३ | अयाश्चे | आयाश्चे |
| ३०१ | १४ | यस्या वा | यस्य वा |
| ३१० | ९ | वनति | वनोति |
| ३६३ | ७ | तावत्तृप्तत्वात् | तावत्तप्तत्वात् |
| ४०६ | १८ | गोचर्मभिः | गोमत्तभिः |
| ४१७ | १२ | पुनर्जीमूत | वपुर्जीमूत |
| ४२२ | १८ | स्तुता | स्तुत |

अथ

काठके चरकशाखायां

# लौगाक्षिगृह्यसूत्राणि ।

देवपालकृतभाष्योपेतानि ।

एकचत्वारिंशी काण्डिका ।

**सप्तमे वर्षे ब्राह्मणस्योपायनम् ॥१॥**

जन्मनः प्रभृति सप्तमे वर्षे गर्भादष्टमे ब्राह्मणस्योपायनमाचार्यसमीपगमनमेखलाबन्धनसंस्कारः प्रधानभूतः । तस्मिन्हि सति श्रुतिस्मृत्यधिकारो भवति । अत एव द्वितीयं जन्म स्मर्यते

'प्रथमं मातृतो जन्म द्वितीयं मौञ्जिबन्धनात् ।
अत्र माता च सावित्री पिता त्वाचार्य उच्यते ॥'

(मनु० २।१७०)

इति ॥ १ ॥

**नवमे राजन्यस्य ॥ २ ॥**

अवेष्ट्यधिकरणनयेन राजा क्षत्रियस्त-

स्यापत्यं राजन्यः क्षत्रियदारकः। तस्य जन्मनः प्रभृति नवमे गर्भाद्दशमे उपनयनम् ॥ २ ॥

एकादशे वैश्यस्य ॥ ३ ॥

समानं पूर्वेण ॥ ३ ॥

आ षोडशाद्ब्राह्मणस्यानतिक्रम आ द्वाविंशाद्राजन्यस्या चतुर्विंशाद्वैश्यस्य ॥ ४

सर्वत्राभिविधावाङ् । ब्राह्मणस्य षोडशवर्षान्तं यावदुपनयनकालानतिक्रमः, एवं द्वाविंशान्तं यावत् क्षत्रियस्य, आ चतुर्विंशाद्वैश्यस्य ॥ ४ ॥

स्नातोप्तकेशो यथोक्तमुपसमाधाय जयप्रभृतिभिर्हुत्वा रेवतीस्त्वा व्यक्ष्णन्कृत्तिकाश्चक्रतुस्त्वापसस्त्वा व्यतन्वत । धियोऽवयन्नव ग्ना अमृजन्सहस्रमन्ताँ अभितोदयच्छन्नशीतिर्मध्यमवयन्नु नारीरित्यहतं वासोऽभिमन्त्रयते ॥ ५ ॥

स्नातश्चासावुप्तकेशो मुण्डितशिरास्तस्मिन् माणवके उपस्थिते सति यथाविधि उपसमा-

धानमग्निसंस्कारमुद्धृतसिक्तोपलिप्ते भूविशेषे स्थापनं परिसंवहनं पर्युक्षणं परिस्तरणं च कृत्वाज्यं चोपनिधाय विलाप्य संवीक्ष्य दण्डमेखलादिकं यथोपयोगमानीयोपनेता जयप्रभृतिभिर्ऋतुनक्षत्राद्यन्तैर्हुत्वा रेवतीस्त्वेत्यादिकया शक्वर्या अहतमभुक्तं नवं वासो हस्ते निधायाभिमन्त्रयते । किल वाससोऽयमुत्पत्तिक्रमः—आदौ तावद्रेवतीभिः कर्पासो लोष्ठनिकाभिरभिहन्यते विधूयते च, ततः कृत्यते वेष्ट्यते सूत्रतामापाद्यते इत्यर्थः, ततस्तन्तुवायेन आतानायते, ततः कूर्चेन परामृज्यते । ततो वस्त्रं वयति तन्तुवायः, सम्पन्ने च वस्त्रे पल्लवद्वये दशाः संयोजयति । एवंक्रमोऽत्र मन्त्रे कर्पासादीनां हननादौ देवताविशेषाणां कर्तृतारोपणेन स्तूयते । हे वस्त्र त्वां रेवतीः देवताः व्यक्ष्णन्विशेषेणाक्षिण्वन् कर्पासावस्थायां लोष्ठनिकादिभिर्हतवत्यः । कृत्तिकाः 'कृती वेष्टने' कर्तयो वेष्टिकाश्चक्रतुः चक्रुः सूत्रं कृतवत्यस्तद्द्वारेण संपादितवत्यः । अपसोऽपापा मरुतस्त्वां व्यतन्वत

विशेषेणातन्वत आतानरूपतां कृतवन्त इत्यर्थः। धियोऽवयन् बुद्धिविशेषेण हि वस्त्रविशेषस्य वानं सम्पद्यते। अव ग्नाः अमृजन् 'व्यवहिताश्च' (१।४।८२) इत्यवशब्दो मृजिना सम्बध्यते। ग्नाः देवताः अवामृजन् 'मृजू शुद्धौ' कूर्चेन आततस्य सूत्रस्य मार्जनं कृतवत्य इत्यर्थः। सहस्रमन्तानभितोदयच्छन्, अभित उभयतः पल्लवद्वये उदिति निपातस्तथाशब्दस्यार्थे, सहस्रशब्दो बाहुल्यार्थः, सहस्रमन्तानां दशानामयच्छन् बबन्धुः। काः। ग्ना इति योजनीयम्। अशीतिर्मध्यमवयन्नु नारीः, नुशब्दः क्षिप्रवचनः, मध्यं वस्त्रस्याशीतिर्नार्यो नागदेवता अवयन् उतवत्यः॥ ५॥

देवीर्देवाय सविता सवित्रे परिधत्त वर्चसा नयेमं शतायुषं कृणुहि जीवसे कमिति परिधापयति॥ ६॥

अनेन यजुषा वासः परिधापयति। हे देव्यो रेवत्याद्या इदं वासः परिधत्त परिधापयत। कस्मै। देवाय द्योतमानाय माण-

वकाय । त्वमपि हे माणवक परिधत्त परिधत्स्व । सविता व्यत्ययेन हे सवितः इदं वासः परिधापय सवित्रे देवतार्थाभिज्ञानस्य जनयित्रे माणवकाय । त्वमपि हे माणवक परिधत्त परिधत्स्व सविता भूत्वा । हे वासः नय प्रापय इमं माणवकं कं ब्रह्माणं ब्राह्मणत्वं प्रापय वेदसमृद्धियुक्तं कुर्वित्यर्थः, शतायुषं कृणुहि कुरु ॥

एष मन्त्रस्त्रयाणां वर्णानां परिधापने साधारणोऽधोवाससः । उत्तरीयं वक्ष्यतेऽजिनम् । जरां गच्छेत्यादिभिः परिहितवाससमनुमन्त्रयते इत्यादित्यदर्शनः । नत्वेवमाचार आचार्याणाम्, नापि मन्त्रलिङ्गमेवमिति योजनान्यथा कार्या । एकैकस्यासाधारण इत्येकैकस्य वाससः परिधापने मन्त्रत्रयम् । तत्र देवीर्देवायेत्येको वर्णत्रयसाधारणः, जरां गच्छेति द्वितीयः साधारणः परिधापने, परीममित्यादीनां त्रयाणामेकैको यथाक्रममेकैकस्यासाधारण इत्येकैकस्य त्रयः परिधापने मन्त्राः ॥ ६ ॥

जरां गच्छ परिधत्स्व वासोऽभूरापी-

वानभिशस्तिपावा । शतं जीव शरदः पुरूची रायश्च पोषमुपसंव्ययस्व ॥ ७ ॥

मन्त्रलिङ्गादयमपि परिधापने। उपनेता ब्रवीति हे माणवक वासः परिधत्स्व। आशिषमाह—जरां गच्छ जराजर्जरिततनुर्भव। आपीवाभूः 'स्फायी ओप्यायी वृद्धौ' आङ्पूर्वः 'आतो मनिन्क्वनिब्वनिपश्च' (३।२।७४) इति क्वनिप् प्रवृद्धो भवेत्यर्थः। अनभिशस्तिपावा अभूरित्यनुषज्यते, अभिशसोऽभिशस्तिः पापयोगस्तत्प्रतिषेधोऽनभिशस्तिः पापाभावः प्रसज्यप्रतिषेधं कृत्वा पर्युदासेन च धर्मसंबन्धः, अनभिशस्तिं पातीति अनभिशस्तिपावा। शतं जीव शरदः, शतं शरदां च त्वं प्राणान् धारय। पुरूचीरिति शरदो विशेषणं पुरुशब्दो भूरिवचनः बहून् पुरुषानञ्चन्ति साधयन्ति इति पुरूच्यः, पुरूचीनां रायो धनस्य च पोषं पुष्टिं परिधत्स्व समन्ताद्धारय ॥ ७ ॥

परीमं सोमं तेजसे महे श्रोत्राय

दधमसि । यथैनं जरसं नयज्ज्योक् श्रोत्राय जागरज्ज्योक् श्रोत्रेऽधिजागरदिति ब्राह्मणस्य ॥ ८ ॥

एष ब्राह्मणस्य परिधापने मन्त्रः सोमपदाल्लिङ्गादितरयोः सोमसंबन्धाभावात्

'यदि राजन्यं वैश्यं वा याजयेन्न्यग्रोधततीराहृत्य ताः संपिष्य दध्युत्सृज्य तदस्मै भक्षं प्रयच्छेन्न सोमम्'

इति श्रुतेः ॥

हे माणवक एतद्वासः परिदध्मसि 'इदन्तो मसि' (७।१।४६) इतीदन्तः परिदध्मः परिधापयामः, सोममेव चेमं परिधापयामः, त्वया अनेनोपनयनद्वारेण सोम एव हि परिहितो धृतो वेदस्तदर्थाभ्यासद्वारेण भविष्यति । किमर्थं परिधापयामः । तेजसे महे, महते, पूजार्थं वा मह पूजायामित्यस्य रूपम् । श्रोत्राय श्रूयते इति श्रोत्रं वेदः तदर्थं वेदवेदार्थाधिगमाय, अथवा श्रोत्राय श्रोत्रयुक्ताय शिष्याय वेदपारङ्गमस्त्वमुपाध्यायः श्रोत्रियेभ्यो हितः सम्पद्यस्वेति तात्पर्यम् । यथैनं वासो-

विशेषं जरसं नयत् जरां नयति माणवकः तथा च परिधापनेन परिधापयामः, यथा बहूनि वस्त्राणि भोगेन जरयिष्यति तथाहं परिधापयामीति यावत्। ज्योक् चिरकालं श्रोत्राय वेदाय जागरत् जागृहि बहुकालं वेदतदर्थजागरणं पठनबोधानुष्ठानात्मकं तवास्त्वित्यर्थः । ज्योक् श्रोत्रेऽधिजागरत् बहुकालं शिष्येभ्यो जागृहि उपदिश अतिशयेन परोपकारप्रकृष्टधर्मकत्वात् ॥ ८ ॥

परीममिन्द्रमोजसे महे क्षत्राय दध्मसि । यथैनं जरसं नयज्ज्योक् क्षत्राय जागरज्ज्योक् क्षत्रेऽधिजागरदिति राजन्यस्य ॥ ९ ॥

हे ब्रह्मचारिन् वासः परिदध्मसि वासः परिधापयामः इन्द्रमिन्द्रेण सह बाहुभ्यां जातत्वादिन्द्रो राजन्यस्तं परमेश्वरं स्वयमेव प्रजापालनसामर्थ्यात् । किमर्थम् । ओजसे बलाय । महे महते पूजिताय वा । क्षत्राय साधूनां त्राणाय उत्साहाय च । गतार्थमन्यत् ॥ ९ ॥

परीमं मनुमायुषे महे पोषाय दध्मसि। यथैनं जरसं नयज्ज्योक् पोषाय जागरज्ज्योक् पोषेऽधिजागरदिति वैश्यस्य॥१०॥

मनुमिति मानुषत्वान्मनुम्। पोषो धनपुष्टिस्तदर्थम् । शिष्टं समानम् ॥ १० ॥

परीदं वासोऽधिधा स्वस्तये भवापीवानभिशस्तिपावा । शतं जीव शरदः सुवीरो वसूनि चोग्रो विभज सुजीवन्निति परिहितवासमनुमन्त्रयते ॥११॥

त्रयाणामपि वर्णानां परिहितवाससामनेनानुमन्त्रणं करोत्युपनेता। परिशब्दः पूर्ववदिहापि व्यवहितान्वयः। हे माणवक त्वमिदं वासः परि अधिधाः पर्यध्यधाः आधिक्येनोत्कर्षेण परिहितवानसि स्वस्तयेऽविनाशाय यत्, तत्त्वमापीवा आपीनः प्रवृद्धो भव, अनभिशस्त्यनभिशस्तं पाति रक्षतीत्यनभिशस्तिपावा, शतं च शरदां जीव, सुवीरश्च शोभनपुत्रयुक्तो भव, तथा वसूनि धनानि उदारः सन्विभज विशेषेण

भजस्व देहि वा परिजनर्त्विक्प्रभृतिभ्यः। सुष्ठु जीवन् सुजीवन् सुखादिना जीवन् ॥ ११ ॥

'योगे योगे' युवा सुवास इति चैताभ्यामग्निमभि दक्षिणमानीयेह्यश्मानमातिष्ठाश्मेव त्वं स्थिरो भव। कृण्वन्तु विश्वे देवा आयुष्टे शरदः शतमिति दक्षिणेन पदाश्मानमास्थापयति ॥ १२ ॥

योगे योगे इत्यनेन युवा सुवास इत्यनेन च मन्त्रेणाग्निं लक्षणीकृत्य प्रदक्षिणं यथा भवति, तथा माणवकमानीय एह्यश्मानमातिष्ठेति मन्त्रेणाश्मानं दक्षिणेन पदा आस्थापयति अधिष्ठापयत्याचार्यः ॥

योगे योगे तवस्तरं वाजे वाजे हवामहे ।
सखायमिन्द्रमूतये ॥

व्याख्यातेयम्। अत्र वह्निप्रदक्षिणे तु योगः सम्बन्धो विशेष्यते। योगे योगे सर्वत्र ब्रह्मचारिक्रियासम्बन्धे कर्तव्ये, वाजे वाजे हविषि हविषि, इन्द्रं हवामहे आह्वयामः ऊतयेऽवनाय, तवस्तरं बलवत्तरं, सखायं सहायम् ॥

युवा सुवासःपरिवीत आगात्स उच्छ्रेयान्भवति जायमानः । तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः ॥

एष यूपोच्छ्रायने विनियुक्तोऽन्यत्र मन्त्रः । तत्रैष मन्त्रार्थः—यूप एव युवा नवः सद्यश्छिन्नः, शोभनेन वाससा रशनया च परितो वेष्टित आगात् आगतः । तं धीरासो धीराः पण्डिता ऋत्विजः उन्नयन्ति उच्छ्रियन्ति मनसा देवयन्तः देवान् यष्टुकामाः पशुयागं चिकीर्षन्तः । प्रकृतोऽत्रायमर्थः—ब्रह्मचारी युवा सुवासाः परिहितशोभनवस्त्रः परिवीतः संवृतो ब्रह्मचार्यात्मा सहि युवा नित्यतरुणः संवीतश्च शणवाससा, आगात् आगतः इदं शरीरं कर्मवशात्प्राप्तः । प्राणो व्याख्यातव्यो ब्रह्मचारिसंबन्धी । सोऽपि हि शरीरेण वाससेव संवृत आगतो ब्रह्मचारिशरीरम् । नित्यतरुणश्च युवा स ब्रह्मचारी उच्छ्रित उन्नतो जायमानो वर्धमानो भवति आत्मा वायुर्गगन इव क्षुधादिभिः प्रवृद्धो भवति । तं धीरासो धीराः पण्डिताः कवयः क्रान्तदर्शना उन्नयन्ति

ऊर्ध्वं नयन्ति आत्मानं मोक्षं प्रापयन्ति प्राणमुत्क्रामयन्ति ऊर्ध्वं ब्रह्मद्वारं प्रापयन्ति ब्रह्मचारिशरीरमप्युन्नयन्ति क्रियाज्ञानकाण्डानुष्ठानेनोत्कृष्टं सम्पादयन्ति, स्वाध्यः शोभनधियः सुकर्माणः, एकाग्रेण मनसोन्नयन्ति ॥

एह्यश्मानमिति, हे माणवक एहि आगच्छ अश्मानं पाषाणमातिष्ठाधितिष्ठ, अश्मेव स्थिरो भव, विश्वे सर्वे देवा आयुष्टे कृण्वन्तु शरदः शतं समाः शतम् ॥ १२ ॥

मम व्रते हृदयं ते ददामि मम चित्तमनुचित्तं ते अस्तु। मम वाचमेकव्रतो जुषस्व बृहस्पतिस्त्वा नियुनक्तु मह्यमिति नाभिदेशादूर्ध्वं पाणिनोन्मार्ष्टि ॥ १३ ॥

मम व्रत इत्यादिना मन्त्रेण नाभिमारभ्य शिखान्तं यावद्ब्रह्मचारिणं आचार्य उन्मार्ष्टि। व्रतमिति कर्मनाम। हे ब्रह्मचारिन् मम व्रते कर्मणि ते तव हृदयं ददामि त्वदीयं हृदयं मच्चिकीर्षितकर्मसहायमस्त्वित्यर्थः। मम सम्बन्धि चित्तं ते तवानुचित्तमस्तु मदीयचित्तानु-

गतं तव चित्तमस्त्वित्यर्थः । मम सम्बन्धिनीं वाचं त्वमेकव्रतो भूत्वा जुषस्व यदहमध्यापयामि, तदेकचित्तो भूत्वा अधीष्वेत्यर्थः । वाग्वै बृहती, तस्याः पतिर्बृहस्पतिरात्मा । स त्वां नियुनक्तु सम्यक्संकल्पद्वारेण मत्सेवादौ प्रवर्तयतु, मह्यं मदर्थं, ममापि तथा सति आचार्यकसम्पत्तिरुपकारो भविष्यतीत्यर्थः ॥ १३ ॥

दधिक्राव्ण इति त्रिर्दधि भक्षयित्वा ब्रह्मचर्यमागामुप मा नयस्वोंभूर्भुवः स्वरिति वाचयति ॥ १४ ॥

ब्रह्मचारी वक्ति । तमाचार्यो वाचयति ब्रह्मचर्यमित्यादि स्वरित्यन्तम् । किं कृत्वा । दधिक्राव्ण इत्यादिना त्रिर्दधि भक्षयित्वा भक्षणे ब्रह्मचारिणं प्रयुज्य । खादित्वा आचान्तो ब्रह्मचर्यमित्यादि ब्रह्मचारी पठति गुरुपाठितः सन्निति तात्पर्यम् ॥

दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत् ॥

एषा व्याख्याता । ब्रह्मचर्यमित्यादि ब्रह्म-

चारी ब्रवीति। हे गुरो अहं ब्रह्मचर्यमागाम्, ब्रह्मणो वेदस्य चरणमागामागतः प्राप्तः ब्रह्मचर्यं मया अवश्यकर्तव्यतया संकल्पितम्। अत उपनयस्व मां संस्कुर्वित्यर्थः। अध्येषणे लोट्। हे उपनेतस्तवाप्याचार्यकसिद्धिः फलं भविष्यति मां संस्कुर्वेत इत्यात्मनेपदेन बोधयति। आदित्यदर्शनस्तु व्याख्यातवान्—गुरुरिदमाह ब्रह्मा प्रजापतिस्तस्य चरणं ब्रह्मभावमहमागामागतः, अतो मामुपनयस्व ब्रह्मसमीपं प्रापय हे ब्रह्मचारिन्नित्यादि। एतत् विचिन्त्यम्। ओमिति ब्रह्मणोऽभिधानमोमिति ब्रह्म खं ब्रह्मेति श्रुतेः। भूरिति भूलोकस्था देवता अग्निरूपोच्यते। भुवरित्यन्तरिक्षदेवता पूर्ववत्तात्स्थ्यात्, सच वायुः। स्वरिति स्वर्लोकस्था देवता आदित्यात्मिकोक्ता॥ १४॥

इयं दुरुक्तात्परिबाधमाना वर्णं पवित्रं पुनती म आगात्। प्राणापानाभ्यां बलमाभजन्ती सखा देवी सुभगा मेखलेयम्॥ ऋतस्य गोप्त्री तपसस्तरुत्री घ्नती

रक्षः सहमाना अरातिम् । सा नः समन्तमनुपरेहि भद्रया भर्तारस्ते मेखले मा रिषाम ॥ श्रद्धाया दुहिता तपसोऽधिजाता स्वसर्षीणां मन्त्रकृतां बभूव । सा मा मेखले परिरेरिहस्व मयि धेहि तप इन्द्रियं चेति वाचयन्मेखलामाबध्नीते ॥ १५ ॥

इयं दुरुक्तादित्यादिकास्त्रिष्टुभो वाचयन्नाचार्यो मेखलामाबध्नीते । ब्रह्मचारी वक्ति । गुरुर्वाचयति । इयं मेखला दुरुक्ताद्दुष्टादसत्यभाषणादिकादुक्ताद्वचनात्परिबाधमाना वारयन्ती तस्यां बद्धायां वाक्पाणिपादचापलवारणान्नियमचोदनाद्वर्णं ब्राह्मणादिजातित्रयं पुनती पावयन्ती अध्ययनादियोग्यतापादनद्वारेण, रूपादिकं वा वर्णं पुनती, स्वभावपवित्रं पावनयोग्यं वा । सा मे ममागादागता प्राणापानाभ्यां बलमाभजन्ती ददती स्वाध्यायादिद्वारेण । 'भञ्जो आमर्दने' इत्यस्य, वर्णात्मकं रूपमाभजन्ती विनाशयन्ती तस्यां हि सत्यां अध्ययनं क्रियते । तच्च क्रियमाणं प्राणापानौ निरुद्ध्य क्रियत इति प्राणा-

पानबलमपहृतं तया भवति। सखा समान-ख्याना। देवी द्योतनादिगुणयुक्ता। सुभगा हृद्या नवकोमलमुञ्जसंगता। ऋतस्य सत्यस्य गोप्त्री पालयित्री तस्यां सत्यां यथेष्टवाचित्व-निवारणात्, ऋतस्य यज्ञस्य वा रक्षिका बद्ध-मेखलेन वेदतीर्थादिगमनात्। तपसो व्रतनियम-सहितस्य वेदाध्ययनस्य तरुत्री तारयित्री पारं नयत्री। घ्नती रक्षः, यातुधानान्नाशयन्ती वज्रो वै मेखलेति श्रुतेः। सहमाना अरातिं, शत्रुमदानं वा प्रसहमाना अभिभवन्ती कार्पण्यं शत्रूंश्च निवारयन्तीत्यर्थः। सा नोऽस्माकं समन्तं सम-न्तादनुपरेहि आगच्छ भद्रया वृत्त्या। हे मेखले तव भर्तारो धारयितारः सन्तो वयं मा रिषाम रिषिर्हिंसाकर्मा त्वां धारयतामस्माकं हिंसा मा भूत्। श्रद्धाया आस्तिक्यस्य दुहिता श्रद्धास्य माता। तपसोऽधिजाता, तपोऽस्याः पिता। मन्त्रकृतां सम्यग्ज्ञानविदामृषीणां स्वसा भ-गिनी बभूव भूता। हे मेखले सैवंभूता त्वं मां परिरेरिहस्व 'लिह आस्वादने' छान्दसो वर्णव्यत्ययः मां समाश्लिष्य, मयि तपो निय-

मयुक्ताध्ययनं धेहि निधेहि, इन्द्रियं च मे इन्द्रियषट्कपाटवं च देहि ॥ १५ ॥

मौञ्जीं त्रिवृतं ब्राह्मणाय प्रयच्छति मौर्वीं धनुर्ज्यां राजन्याय सौत्रीं वैश्याय ॥

मौञ्जीं सप्तमुञ्जनिर्मिताम् । त्रिवृतं त्रिगुणवेष्टिताम् । त्रिवृद्वज्रः । त्रिवृन्नवकम् । तत्र त्रिवृता यूपं परिवीयादित्यादौ रज्जौ त्रिवृच्छब्दः । त्रिवृत्स्तोम इत्यादौ त्रिवृच्छब्दो नवके । इहापि रज्जौ त्रिगुणायां त्रिवृच्छब्दः तथा सदाचारात् । तेन भ्रान्त्या केचिन्नवगुणां मेखलां व्याचक्षते । मुर्वा नाम तृणविशेषस्तस्य विकारो मौर्वी, तां धनुर्ज्यां धनुषः प्रसार्यं गुणं राजन्याय प्रयच्छति । सौत्रीं वैश्याय, सामान्याभिधानेऽपि स्मृत्यनुसारेण कर्पाससूत्रमयीम् । आदौ प्रयच्छति, तत आबध्नीयादिति क्रमो बोद्धव्यः ॥

चित्तस्य समोऽसि दैव्यो ग्रन्थिरसि मा विस्रस इति ग्रन्थिं कृत्वा मित्रस्य चक्षुर्धरुणं बलाय तेजो यशस्वि स्थविरं

**समृद्धम् । अनाहृनस्यं वसनं चरिष्णु परीदं वाज्यजिनं दधेयमिति वाचयन्नैणेयं चर्म ब्राह्मणाय प्रयच्छति वैयाघ्रं राजन्याय रौरवं वैश्याय ॥ १७ ॥**

चित्तस्य समोऽसीत्यनेन मन्त्रेण मेखलाग्रन्थिं कृत्वा शिखावत् यथाकुलप्रसिद्धि 'त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ।' (मनु० २।४३) इत्यादिस्मरणात् मित्रस्येत्यादि वाचयन्नैणेयं कृष्णमृगस्य सम्बन्धि चर्म ब्राह्मणाय प्रयच्छत्युपनेता, राजन्याय व्याघ्रचर्म, रुरुचर्म वैश्याय । मेखलाग्रन्थौ चर्मदाने च त्रयाणां साधारणौ मन्त्रौ ॥

चित्तस्येति । हे ग्रन्थे त्वं चित्तस्य समश्चित्तेन तुल्यो यथा ब्रह्मचारिणश्चित्तं न चलति व्रताध्ययनादिशुद्धं तिष्ठति, तथा त्वमपि न चलसि यावद्ब्रह्मचर्यमवस्थानात् । दैव्यो देवानां सम्बन्धी त्वं ग्रन्थिरिति स्तुतिः, ततश्च मा विस्रसः मुक्तो मा भूः ॥

मित्रस्येति त्रिष्टुप् । ब्रह्मचारी ब्रूते । इदम-

जिनमहं परिदधेयं परिदधे । कीदृशम् । मित्र-स्याहिंस्रस्य हरिणस्य रुरोश्चक्षुर्दर्शनं प्रसिद्धम् । वैयाघ्रपक्षेऽपि व्याघ्रो मित्रमेव राज्ञोऽभिमतचर्म-दानाच्छौर्यस्मरणाच्च । धरुणं ब्रह्मचर्यादिकस्य धारणम् । बलाय ब्रह्मचर्यसामर्थ्यार्थं परिदधे तेजः ब्रह्मवर्चसस्य तेजसो निमित्तत्वात्। यशस्वि यशस्करम्। स्थविरं वृद्धमिव गौरवपात्रं स्थिरतरं वा । समृद्धं समृद्धिकारि । अनाहनस्यं आह-न्तीति आहनाः 'सर्वधातुभ्योऽसुन्' (उ० ६३८) इत्यसुन्, आहनसि साधु आहनस्यं तत्प्रति-षेधोऽनाहनस्यम् । वसनमाच्छादनम् । चरिष्णु गमनशीलं मृगावस्थायामभूत् । वाजि वाज-मन्नं तद्विद्यतेऽस्येति वाजि, तस्मिन्परिहिते ब्रह्मचर्यावस्थाय भक्त्यान्नं प्रयच्छन्तीति तस्या-न्नत्वमुपचर्यते ॥ १७ ॥

## तच्चक्षुरित्यादित्यमुपस्थापयति ॥१८॥

तच्चक्षुरित्यादिना आदित्योपस्थानं कारयति ॥

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ।
पश्येम शरदः शतं जीवेम शरदः शतम् ॥

तदेव चक्षुस्त्रैलोक्यस्य पुरस्तात्पूर्वस्यां दि-

श्युच्चरति उदेति। देवहितं देवैर्विहितं प्रेरितं निर्मितं वा देवेभ्य इन्द्रियेभ्यो वा हितम्। तत् शरदां शतं पश्येम पश्यन्तश्च वर्षशतं जीवेमेति ब्रह्मचारी शंसत्युपतिष्ठमान आदित्यम्॥

को नामासीत्युक्तेऽभिवादने प्रोक्तेऽसावहं भो इति प्रत्याह॥ १९॥

गुरुराह को नामासीति। क इति प्रजापतिनाम। तथाच ब्राह्मणं

'को नामासीति प्रजापतिर्वै को नामेति।'

वेदग्रहणाभिमुखत्वात्प्रजापतिरिवासीति स्तुतिच्छलेन साक्षात् प्रश्नोऽयं प्रतिवचनविधानात्। गुरुणा पृष्टः शिष्योऽभिवादयते। स्वनामोच्चारणेनासावित्युक्ते नाम प्रतीयात् विष्णुमित्रोऽहमभिवादये भो इति ब्रह्मचारिणाभिवादितो गुरुः प्रत्यभिवादनमाह प्लुतान्तं 'प्रत्यभिवादेऽशूद्रे' (८।२।८३) इति स्मृतेरायुष्मानेधि सौम्य विष्णुमित्र ३ इति। स्मृतेरपि

'आयुष्मान्भव सौम्येति वक्तव्योऽन्त्याक्षरे प्लुतः।'

इति॥ १९॥

देवस्य ते सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तं गृह्णाम्यसा उपनयेऽसौ ॥ २० ॥

आचार्यो ब्रह्मचारिणो दक्षिणं हस्तं दक्षिणेन हस्तेन विवाहोक्तविधिना गृह्णाति देवस्य त इत्यादिना । हे ब्रह्मचारिन् विष्णुमित्र अहमाचार्यो हरिशर्माभिधानस्त्वामुपनये इति शिष्यं स्वनाम्ना संबोध्य स्वनामोच्चार्य गृहीतहस्तो गुरुर्ब्रवीति, एकोऽसाविति शब्दः शिष्यबोधने, द्वितीय आचार्यनामोपलक्षणार्थः, ते तव हस्तं गृह्णामि । कीदृशस्य । देवस्य द्योतनादिधर्मकस्य, सवितुः पदार्थादिज्ञानस्य जनयितुः । किमर्थम् । प्रसवे प्रकृष्टज्ञानादिजननाय । स्तुत्यर्थमाह—नैवं भ्रमणीयं—यदुत चर्ममयाभ्यामात्मीयाभ्यां बाहुभ्यां हस्ताभ्यां वा हस्तं गृह्णाम्यहमिति । किं तर्हि । अश्विनोर्देवभिषजोर्बाहुभ्यां पूष्णश्च हस्ताभ्याम् ॥२०॥

सविता ते हस्तमग्रहीदग्निराचार्यस्तव ।

## कस्त्वा कमुपनयेऽसौ काय त्वा परिददामि ॥ २१ ॥

गृहीतहस्त एवाचार्य आह। सविताभिमतस्य जनयिता आदित्यस्ते तव हस्तमग्रहीत्, आत्मानमेव सवितृत्वेनोपचरति गुरुः। अग्निराचार्यस्तव, नाहम्, अहमेवाग्निस्तवाचार्यो वेदार्थज्ञानतदनुष्ठानतपःप्रभृतिभिर्जाज्वल्यमानत्वात् कः प्रजापतिः सन्नहं गुरुरात्मरूपेण कं प्रजापतिमेव सन्तं त्वामहमुपनये असौ त्रिष्णुमित्रनामा। सर्वेषामेवान्तरमेकः। स एव च संस्थानैरौपाधिकदोषनिवृत्त्या संस्क्रियते। काय प्रजापतये त्वामहं परिददामि परिरक्षार्थं ब्रह्मणे त्वां समर्पयामीत्यर्थः ॥ २१ ॥

## कस्य ब्रह्मचार्यसि प्राणस्य ब्रह्मचार्यसीति प्रत्याह ॥ २२ ॥

कस्य प्रजापतेर्ब्रह्मचार्यसीति भङ्गिप्रश्ने आचार्येण कृते सति शिष्यः प्रत्याह प्राणस्य ब्रह्मचारी अस्मि भवामीत्यभ्युपगमभङ्ग्यैव

प्रत्युत्तरम् । प्राणो हि प्रजापतिरेव जगत्सूत्रभूतः । तथाच श्रुतिः

'हिरण्यगर्भः पुरुषो महांस्त्वं प्राणो जगत्सूत्रमनादिरिन्द्रः । बोधः शुचिर्धर्मतरान्तरात्मा तथा विधाता जगतोऽस्य देव ॥'

इति ॥ २२ ॥

**प्रजापतये त्वा परिददामि । देवाय त्वा सवित्रे परिददामि बृहस्पतये त्वा परिददाम्यसौ । देव सवितरेष ते ब्रह्मचारी तं गोपायस्व दीर्घायुः स मा मृत ॥२३॥**

हे ब्रह्मचारिन् प्रजापतये परिरक्षार्थमहं त्वां ददामि देवाय सवित्रेऽन्तरात्मने बृहस्पतये वाग्वै बृहती, तस्याः पतिरात्मा तस्मै ददामीति समानम् । असाविति आचार्यनामप्रदर्शनार्थम् ।

हे देव स्वप्रकाशतया द्योतमान । हे सवितः अभिमतव्रतादिजनयितः एष ब्रह्मचारी ते तव सम्बन्धी, तं गोपायस्व पालय । दीर्घायुः सोऽस्तु, मा मृत मरणं मा भूदस्य । प्रत्यक्षेऽपि परोक्षनिर्देशो वैदिको व्यत्ययः ॥ २३ ॥

अग्निपुत्र वायुपुत्र सूर्यपुत्र विष्णुपुत्र
ब्रह्मचारी तं गोपायस्व

र्घायुः स मा मृत ॥ २४ ॥

अग्नेः पुत्रः ऋग्वेदः । वायोः पुत्रो यजुर्वेदः । सूर्यस्य पुत्रः सामवेदः । हे ऋग्वेद यजुर्वेद सामवेद एष ब्रह्मचारी तुभ्यं परिरक्षार्थं दत्त इति ते तव प्रत्येकं सम्बन्धी, अतस्तं गोपायस्व । तथाच ब्राह्मणमग्न्यादिपुत्रत्वमृग्वेदादीनां दर्शयति

'प्रजापतिर्वा एक आसीत्स तपोऽतप्यत ततस्तपस्तेपानेन त्रयो देवा असृजन्त अग्निर्वायुरादित्यस्ते तपोऽतप्यन्त तेभ्यस्तपस्तेपानेभ्यस्त्रयो वेदा असृजन्ताग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात्सामवेदः'

इति । विष्णुपुत्रो ब्रह्मपुत्रश्चेति सम्भूतग्रामः । अथवा अग्नेः पुत्रो भूलोकः, अस्याधिष्ठात्री देवता अग्निः । एवं वायुपुत्रोऽन्तरिक्षलोकः, सूर्यपुत्रो द्युलोकः । यद्वा पुरु बहु त्रायते इति पुत्रः, अग्निश्चासौ पुत्रोऽग्निपुत्रः । एवमन्यत्रापि योजना ॥ २४ ॥

इदानीं गृहीतहस्तमेनमनुशास्ति

ब्रह्मचार्यसि। अपोऽशान। कर्म कुरु। दिवा मा स्वाप्सीः । वाचं यच्छ ॥२५॥

गुरुराह—हे ब्रह्मचारिन् त्वं संप्रति यतो ब्रह्मचारी संपन्नोऽत एतानि पञ्च कर्तव्यानि बुध्यस्व । अपोऽशान निमित्तोपनतावाचमनादिकं कुरु। तथा गुरुपरिचर्यावेदाध्ययनादिकं कर्म कुरु। दिवास्वप्नं च वर्जय, मत्प्रसादेन शरीराद्यपाटवदशायामभ्युपगच्छ दिवास्वापमिच्छायाः स्वतन्त्राया निषेधात् । वाक्संयमनं च कुरु अनृतपरुषभाषणादिकं मा कुर्वित्यर्थः ॥

बाढमित्यभ्युपगमः ॥ २६ ॥

मेधां मह्यमङ्गिरसो मेधां सप्तर्षयो ददुः। मेधामग्निश्च वायुश्च मेधां धाता ददातु मे ॥ मेधां मे वरुणो राजा मेधामग्निर्ददातु मे। मेधामिन्द्रश्च सूर्यश्च मेधां देवी सरस्वती ॥ या मेधा अप्सरस्सु गन्धर्वेषु च यन्मनः। दैवी मनुष्ये या मेधा

सा मामाविशतादिह ॥ शरीरं मे विच-क्षणं वाङ्मे मधुमद्दुहे। निशामितं नि-शामये मयि श्रुतम् ॥ यन्मेऽनूक्तं तद्र-मतां शकेयं यदनुब्रुवे। प्रियाः श्रुतस्य भूयास्म मेधया संविधीमहि ॥ अवृधमह-मवृधस्त्वमसौ सौम्य प्राणस्त्वं मे गोपाय ब्रह्मण आणी स्थ श्रुतं मे मा प्रहासी-दिति वाचयति ॥ २७ ॥

मेधां मह्यमित्यादिकाः पञ्च ऋचः, षष्ठं यजुः शिष्यो वक्ति, गुरुर्वाचयति। कुशाग्रीया बुद्धि-र्मेधा। तामङ्गिरसो वायवः प्राणापानसमान-व्यानोदानाः ददुर्ददतु मह्यम्। अङ्गानि रस-यन्तीत्यङ्गिरसः आन्तरा वायवस्तथा सप्तर्षयो वसिष्ठाद्या मह्यं मेधां ददतु। एतत्समान-मृग्द्वये। अप्सरस्सु या मेधा, यच्च गन्धर्वेषु मनोऽन्तःकरणं, याच दैवी वेदार्थादिसाक्षात्का-रिणी, मनुष्येषु मेधा स्थिता इहलोके, सा

सर्वा मामाविशतु प्रविशतु । मम शरीरं विचक्षणं पण्डितमस्तु अधिष्ठातृद्वारेण । वाक् च वेदादिरूपा मधुमत् मधुरफलं दुहे दुग्धाम् । यच्च मयि श्रुतं स्थितं निशामितं, तन्निशामये चिन्तयेयं सम्यक् । यच्च ममानूक्तं गुरुणोक्तं, तद्रमताम् । यच्चानुब्रुवे गुरूक्तमनुवदामि, तच्छ-केयं शकुयाम् । वयं च श्रुतस्य प्रिया भूयास्म श्रुतमस्माकं पर्यवसितमस्तु । मेधया संविधी-महि संबध्येमहि । आत्मानमुद्दिश्य यजुषा शिष्य इदमाह—हे अन्तरात्मन् प्राणादिक असौ विष्णुमित्रोऽहमवृधं वर्धिष्ये । त्वमपि चावृधः असौ प्राणादिकः, तस्यापि हि वेदाध्ययनादि-नातिशयो भविष्यति । हे सौम्य प्राणस्त्वं जगत्सूत्रमतो मे मां गोपाय । त्वं ब्रह्मण आणी सारं स्थ भवसि । श्रुतं मे मा प्रहासीत् श्रुतं मे मा त्याक्षीत्, मम संबन्धि यच्छ्रुतं तन्मां मा त्याक्षीदित्यर्थः । अत्र चतुर्थी उ-ष्णिक् । शिष्टा अनुष्टुभः । अवृधमहमित्यादि षष्ठं यजुः ॥ २७ ॥

एताभिरेव चतसृभिरनुप्रवचनीया-ञ्जुहुयाद्यजुषोत्तमाम् ॥ २८ ॥

अनुप्रवचनं प्रयोजनं येषां तेऽनुप्रवचनीया होमा इत्यन्वर्था संज्ञा। अनु उत्तरकालं हि सावित्र्याः प्रवचनं कारयिष्यते गुरुणा। अथवानुप्रवचनमर्हन्तीत्यनुप्रवचनीयाः। अत्र हि मन्त्रानुपाध्यायो वक्ति, शिष्योऽनुप्रवक्ति। अनुप्रवचनीयसंज्ञकान् होमानेताभिरेव प्रकृताभिश्चतसृभिर्ऋग्भिः कपिञ्जलाधिकरणन्यायेन मेधां मह्यमित्याद्याभिर्जुहुयात्। तेन चत्वारो होमाः। पञ्चममाह यजुषोत्तमाम्, अवृधमित्यादिना यजुषोत्तमामाहुतिं पञ्चमीं जुहुयादिति केचित्। अन्ये त्वाहुः—अत्र पक्षे पञ्चम्या ऋचो विनियोगाभावः प्राप्नोति। उत्तमामिति स्त्रीलिङ्गनिर्देशो न युज्यते प्रकृतस्यानुप्रवचनीयस्य पुंस्त्वात्, तदपेक्षयोत्तममिति प्रसङ्गात्। नचाहुतिशब्दः प्रकृतोऽस्ति। तस्मादुत्तमामृचं यजुषा सह संयोज्य पञ्चममनुप्रवचनीयं जुहुयादित्यर्थः ॥ २८ ॥

षष्ठमनुप्रवचनीयहोममाह

छन्दोभ्यः स्वाहेति क्रतुनामधेयेन च यथोपाचरितः क्रतुर्भवत्येवं सर्वाणि वेदोक्तानि ॥ २९ ॥

क्रतुरिह कर्म । कर्मनामधेयेन च जुहुयात् । एष सप्तमोऽनुप्रवचनीयहोमः । कथं क्रतुनामधेयेन होतव्यम् । यथोपाचरितः क्रतुर्भवति, येन प्रकारेण प्रकृतं कर्मोपाचरितमिष्टं भवति, तथा होतव्यम् । चतुर्थीयोगेन स्वाहाकारेण चाभिधानशक्तियोगिना च कर्मनामधेयेन उपायनाय स्वाहेत्युपनयनाय स्वाहेति वा । एवं सर्वाणि वेदोक्तानि, अनेनैव प्रकारेण सर्वाणि वेदोक्तानि कर्माणि स्वनामधेयेन छन्दोभ्यः स्वाहेति हुत्वा होतव्यानि त्रैविद्यकाय स्वाहेत्यादिप्रकारेण ॥ २९ ॥

पश्चादग्नेर्दर्भेषु प्राङासीनः प्रत्यङ्ङासीनाय तत्सवितुरिति सावित्रीं त्रिरन्वाह पच्छोऽर्धर्चशः सर्वामन्ततो यश्च मेधाकामः स्यात् ॥ ३० ॥

पश्चादग्नेर्दर्भेषूपविष्टः प्राङ्मुखो गुरुः प्रत्य-

सुखासीनायाचार्यसंमुखोपविष्टाय शिष्याय सावित्रीं सवितृदेवतां तत्सवितुरित्यादिकां गायत्रीं त्रीन् वारानन्वाह । ब्राह्मणायेति ज्ञेयम् । उपलक्षणमेतद्राजन्यवैश्ययोर्हि सावित्र्यावन्ये स्मृतिसदाचाराभ्यां बोद्धव्येऽदब्धेभिः सवितरिति राजन्याय, विश्वा रूपाणीति वैश्याय । कथमन्वाह । पच्छः पादं पादं पच्छः प्रथमोच्चारणे पादशोऽनुब्रूयात् । द्वितीयोच्चारणे अर्धर्चशः ऋचोऽर्धमर्धर्चमर्धर्चमर्धर्चमर्धर्चशः । अन्तेऽन्ततः सर्वाम्, तृतीयोच्चारणे यथाशक्त्यनुसारं वा सर्वामृचमनुब्रूयात् । यश्च मेधां शिष्यस्य कामयते, सोपि पच्छोऽर्धर्चशः सर्वामन्ततोऽनुब्रूयात् । तत्सवितुरिति व्याख्यातेयम् ॥

अदब्धेभिः सविता पायुभिष्ट्वं शिवेभिरद्य परिपाहि नो गयम् । हिरण्यजिह्वः सुविताय नव्यसे रक्ष मा किर्नो अघशंस ईशत ॥ विश्वा रूपाणि प्रतिमुञ्चते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे । वि नाकमख्यत्सविता वरेण्योऽनुप्रयाणमुषसो विराजति ॥

एते यथासंख्यं राजन्यवैश्ययोरनुब्रूयात् । हे सवितरादित्य अद्यास्मिन्नहनि नोऽस्माकं

गयं गृहं पाहि रक्ष पायुभिः पालकैः रश्मिभि-रदब्धेभिरनुपहिंसितैः, शिवेभिः सुखकारिभिः। यतस्त्वं हिरण्यजिह्वः दीप्रकिरणः । सुविताय हविरादिदात्रे नव्यसे स्तोत्रादिकर्त्रे नौरिवाच-रसि तारयिष्यसि आपत्समुद्रादिति वा। अतो-ऽस्मान् रक्ष । मा किः कश्चिन्नोऽस्मानघं पापं शंसति यः, स चौरादिः ईशत प्रभूत् ॥

सविता विश्वा रूपाणि सर्वान्भावान् प्रतिमुञ्चते प्रकाशयति, कविर्मेधावी क्रान्त-दर्शनः । प्रासावीत् प्रसूते जनयति भद्रं सुखं द्विपदे चतुष्पदे च । नाकं स्वर्गं व्याख्यातं व्यख्यत् प्रकाशयति । वरेण्यो वरणीयः प्रार्थ-नीयः। उषसो रात्रीणां प्रयाणमनु लक्षणीकृत्य हीनीकृत्य वा विराजति रात्रितमसोऽपहतत्वात् प्रकाशते ॥ ३० ॥

पालाशमेकसरं नवनीतेनाभ्यज्य तस्य च्छायायां वाचयति सुश्रवः सुश्रवा असि यथा त्वं सुश्रवा अस्येवं मा सुश्रवः सौ-श्रवसं कुरु। यथा त्वं सुश्रवो देवानां

## वेदस्य निधिगोपोऽस्येवमहं ब्राह्मणाना ब्रह्मणो निधिगोपो भूयासमिति ॥३१॥

पलाशस्यायं पालाशो दण्डः। तमेकसरमवान्तरशाखारहितमृजुं सत्वचमव्रणं नवनीतेनाभ्यज्य स्वहस्तेन गृहीत्वा गुरुस्तस्य दण्डस्य सम्बन्धिन्यां छायायां शिष्यं व्यवस्थाप्य सुश्रव इत्यादि पाठयति ॥

पालाश उच्यते—हे सुश्रवः सुश्रवा असि शोभनं श्रवणं यस्य स सुश्रवाः। तस्मिन्हि कर्माङ्गत्वेनोपादीयमाने दुष्टस्याकीर्त्यात्मकस्य शब्दस्य श्रवणं न भवति। अनुवादमाह 'यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति' । ब्राह्मणमपि ।

'देवा वै ब्रह्मन्समवदन्त ततस्तद्ब्रह्म पर्ण उपाशृणोत्सुश्रवा वै नाम एष'

इति, ब्रह्मणि वेदे देवा अवदन्त ततस्तद्ब्रह्म पर्णे पलाशे समाश्रितं पलाशमाश्रितमित्यर्थः। अत एव पलाशः सुश्रवा इति नाम्ना प्रसिद्ध इति ब्राह्मणतात्पर्यम् । हे सुश्रवः सौश्रवसं कुरु सुश्रवा एव सौश्रवसस्त्वं सौश्रवसम् । यथा

त्वं सुश्रवो देवानां विवदमानानां वेदस्य निधिगोपः वेदानां निधेः समूहस्य रक्षकोऽसि भवसि, एवमहं ब्राह्मणानां सम्बन्धिनो ब्रह्मणो वेदस्य निधिगोपो भूयासम् ॥ ३१ ॥

पालाशं दण्डं ब्राह्मणाय प्रयच्छति॥३२॥

एवं प्रकृतं दण्डं पालाशं ब्राह्मणाय ब्रह्मचारिणेऽनुवचनान्ते प्रयच्छत्याचार्यः ॥ ३२ ॥

आश्वत्थं राजन्याय ॥ ३३ ॥

अश्वत्थो वटः ॥ ३३ ॥

नैयग्रोधं वैश्याय ॥ ३४ ॥

वैश्याय न्यग्रोधसम्बन्धिनं प्रयच्छति दण्डम् ॥ ३४ ॥

तच्छायायां पूर्वतन्त्रस्यानुवचनं कारयित्वा, दण्डं दत्त्वा किं कारयत्याचार्य इत्याह

स्मृतं च म इति वाचयति । स्मृतं च मेऽस्मृतं च मे तन्म उभयव्रतम् । निन्दा च मेऽनिन्दा च मे तन्म उभयव्रतम् । विद्या च मेऽविद्या च मे तन्म उभ-

यव्रतम्। श्रद्धा च मेऽश्रद्धा च मे तन्म उभयव्रतम्। सत्यं च मेऽनृतं च मे तन्म उभयव्रतम्। मृतं च मेऽमृतं च मे तन्म उभयव्रतम्। श्रुतं च मेऽश्रुतं च मे तन्म उभयव्रतम्। व्रतं च मेऽव्रतं च मे तन्म उभयव्रतम्॥ यद्ब्राह्मणस्य ब्रह्मणि व्रतं यदग्नेः सेन्द्रस्य सप्रजापतिकस्य सर्षिकस्य सपितृकस्य समनुष्यस्य समनुष्यराजन्यस्य सगन्धर्वाप्सरोजनस्कस्य ससर्पेतरजनस्कस्य सौषधिवनस्पतिकस्य सह ग्राम्यैश्च पशुभिरारण्यैश्च साकाशस्य सप्रकाशस्य सातीकाशस्य सानूकाशस्य सह यन्म आत्मन आत्मनि व्रतं तन्मे सर्वव्रतम्॥३५॥

यन्मन्वादिभिः स्मृतं, यच्चास्मृतमनुष्ठेयत्वेन वर्जनीयत्वेन च यथासंख्यं व्रतमवश्यं पालनीयम्। एवं निन्दा च मेऽनिन्दा च मे इति निन्दितं वर्जनीयमनिन्दितमुपादेयम्। अथवा परनिन्दा वर्जनीया, अनिन्दा च प्रशंसावसरे

कर्तव्या परोपकारपर्यवसायिनी । एवं विद्याविद्ये ज्ञातव्ये हानोपादानार्थम् । श्रद्धा आस्तिक्यं, नास्तिक्यमश्रद्धा । तथा सत्यानृते । अमृतममरणकारि ज्ञानकर्मसमुच्चयानुज्ञानात् ज्ञेयं मम व्रतम् । मृतं मरणकारि काम्यं संसारकारणं, तदपि हानाय परपुरुषार्थार्थिना ज्ञेयं, स्वर्गाद्यर्थिना तूपादानाय । श्रुतं मीमांसादिश्रवणम्, अश्रुतं कुत्सितश्रुतं लोकायतादिशास्त्राभासविषयम् । व्रतं सद्व्रतम्, अव्रतं व्रताभासः कर्तव्याभास इत्यर्थः । यत् ब्राह्मणस्य ब्रह्मणि वेदे व्रतमध्ययनाद्यर्थं, तत् ममावश्यकर्तव्यं ज्ञानपूर्वम् । अग्नेः प्रजापत्यादिसहितस्य यद्व्रतं कर्म, तत् मया ज्ञेयमनुष्ठेयं च क्रमेण । सर्वत्र गुरो अनुग्रहं कुर्विति प्रतीयमानम् । जनस्कस्येति सकारागमश्छान्दसः ॥ ३५ ॥

इदमहमग्नौ समिधमभ्यादधाम्यग्ने सर्वव्रतो भवाम्यधीते हैतेषां वेदानामेकं द्वौ त्रीन्सर्वान्वा यमेवं विद्वानुपनयत इति श्रुतिः ॥ ३६ ॥

मन्त्रलिङ्गादिदमहमित्यनेन समिधमग्नौ प्रक्षिपति। इदमिति लिङ्गव्यत्ययः । इमां समिधमहमग्नावादधामि। अभिराभ्यमुख्यार्थः। हे अग्ने त्वत्प्रसादात् सर्वव्रतो भवामि भूयासम् । अधीते हेत्यादिकमुपनेतृस्तुत्यर्थम्। य एव विद्वान् मन्त्रब्राह्मणज्ञः सन्नुपनयते, स एवोपनेतृत्वेऽधिकृतो, नान्यः। स हि यमुपनयते, स एतेषां प्रसिद्धानां वेदानामनन्तशाखायुक्तानां मध्ये यथेच्छमेकं द्वौ वा त्रीन्वाधीते सर्वान् सर्वशाखाखचितान् । हशब्द इतिहासे । अतोऽनेन संस्तुतत्वाच्छ्रौतमुपनयनं, न संस्कारान्तरवत् स्मार्तमत एवोपनयनासमर्था अप्यवश्यं कुर्वन्तीति केचित् । तदसत् , स्मार्तस्याप्यनुमितश्रुतिमूलत्वात् । अप्रत्यक्षं तत्र विधिरिति चेत् , अर्थवादेऽपि समानता । यदपि भणति मन्त्रगतो न विधायक आख्यातशब्द इति कृत्वा नेदमहमित्यनेन समित्प्रक्षेपः कर्तव्य इति, तदप्यमीमांसकभणितमाख्यातस्याविधायकत्वेऽपि लिङ्गात्प्रक्षेपसिद्धेः ॥ ३६ ॥

कर्त्रे वरं ददाति ॥ ३७ ॥

उपनेत्रे दक्षिणां ददाति ब्रह्मचारिणः स्वामी पिता, तदभावे ज्येष्ठभ्रात्रादिः ॥ ३७ ॥

अहःशेषं स्थापयेत् ॥ ३८ ॥

नोपवेशयेत्, नापि संचारयेत् ॥ ३८ ॥

व्याख्यातं ब्रह्मचर्यम् ॥ ३९ ॥

ब्रह्मचर्यमुपक्रम एव 'उपनयनप्रभृति व्रतचारी स्यात्' इत्यादिनोक्तमतो न भूय उच्यते ॥

इत्युपनयनम् ॥

इत्येकचत्वारिंशी काण्डिका ॥ ४१ ॥

अथ

द्वाचत्वारिंशी काण्डिका ।

त्रैविद्यकम् ॥ १ ॥

तिसृषु विद्यासु वेदत्रयात्मिकासु भवं ग्रहणं प्रयोजनं वा व्रतं त्रैविद्यकम् । वक्ष्याम इति शेषः ॥ १ ॥

यं प्रति कथ्यते, सोऽप्रबुद्धो ब्रह्मचारी। तेन व्यर्थ उपदेश इत्याशङ्क्याह

आचार्यस्य विधिः ॥ २ ॥

आचार्येणानुष्ठातव्य इत्यर्थः ॥ २ ॥

यो वेदमधीते पुरस्ताच्चोपरिष्टाच्चांहोमुग्भिः समिधोऽभ्यादध्यात् ॥ ३ ॥

अध्ययनस्यारम्भे समाप्तौ चांहोमुग्भिस्तिस्रः समिधोऽग्नावभ्यादध्यात् स्वाहाकारमात्रशून्यं प्रक्षेपमात्रं कुर्यादित्यर्थः, अन्यथा जुहुयादिति ब्रूयात् । अंहसः पापाद्विमोचयन्तीत्यंहोमुचो मन्त्राः । ते पुनः

यद्देवा देवहेळनं देवासश्चकृमा वयम् ।
अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥

यदि दिवा यदि नक्तमेनांसि चकृमा वयम् ।
वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥
यदि जाग्रद्यदि स्वप्न एनांसि चकृमा वयम् ।
सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥

देवा एव देवासः 'आज्जसेरसुक्' हे देवा देवासोऽतिशयार्थं पुनः सम्बोधनम्, यद्वयं देवहेळनं चकृमा 'हेडृ अनादरे' अनादरेणावलेपेन यद्देवानां पापं कृतवन्तो वयम्, तस्मादेनसोंऽहसः पापात् विश्वात् समस्तादग्निर्मा विमुञ्चतु । अंहस एनस इति दुःखपीडितस्य पुनर्वचनम् । एनःशब्दो वा पापकृते दुःखातिशये वर्तते । अनेनैव द्वितीयतृतीयौ गतार्थौ । दिवानक्तंशब्दाभ्यां मध्यवर्तिन्यौ सन्ध्ये अपि संगृहीते ॥ ३ ॥

## उक्तं व्रतोपायनविमोचनम् ॥ ४ ॥

व्रतस्योपायनं ग्रहणं, विमोचनं च परित्यागः । तद्द्वयमपि दर्शपूर्णमासयोरुक्तम् । तथाच तत्रत्यं सूत्रं 'पाणी प्रक्षाल्य दक्षिणतोऽग्नेस्तिष्ठन् ब्रूयादग्ने व्रतपते वायो व्रतपते सूर्य व्रतपते' इति ॥

अग्ने व्रतपते व्रतमालभे तत्ते प्रब्रवीमि तच्छकेयं तेनर्ध्यासम् । वायो व्रतपते० । सूर्य व्रतपते० । अग्ने व्रतपते व्रतमचारिषं तदशकं तत्ते प्रब्रूमस्तन्नो गोपाय । वायो व्रत० । सूर्य व्रत० ॥

अमी षट् कृच्छ्रविधौ व्याख्याताः । इह च व्रतग्रहणे मोचने च समानाः कर्तव्याः । इयांस्तु विशेषः—विमोचने दण्डमग्नौ प्रास्येदप्सु मेखलां वासश्च हुतसमाप्तिं यावत् । तत एव दण्डादयो मन्त्रावृत्तिभाजः । तथाच मनुः

'यद्यस्य विहितं चर्म यत्सूत्रं या च मेखला ।
यो दण्डो यच्च वसनं तत्तत्सर्वं व्रतेष्वपि ॥' (२।१७४)

इति ॥ ४ ॥

इति त्रैविद्यकमपवर्गसहितम् ॥

इति द्वाचत्वारिंशी काण्डिका ॥ ४२ ॥

अथ

## त्रयश्चत्वारिंशी काण्डिका ।

अथातश्चातुर्हौतृकं ब्रह्मचारिकल्पेन व्रतमुपैति ॥ १ ॥

चित्तिः स्रुगित्यादयो मन्त्राश्चतुर्होतार उच्यन्ते तेषु भवं चातुर्हौतृकं व्रतं ब्रह्मचारिकल्पेन ब्रह्मचारिधर्मोपदेशिना वेदभागेन चोदितमुपेयात् ॥ १ ॥

संवत्सरमष्टौ मासांश्चतुरो मासान्वा ॥२॥

संवत्सरमेतद्व्रतमुपेयादिति मुख्यः कल्पः । अष्टौ चतुरो मासान्वेत्यनुकल्पः ॥ २ ॥

शुद्धपक्षस्य पुण्याहे पर्वणि वा यथोक्तमुपसमाधाय जयप्रभृतिभिर्हुत्वा पूर्वेणाग्निं दर्भस्तम्भं निहत्य ब्राह्मणं दक्षिणत उपवेश्य हिरण्यवर्णा इति चतसृभिः समिधोऽभ्यादध्यात् ॥ ३ ॥

अग्नेर्यः पूर्वदेशस्तत्र दर्भस्तम्भं निहत्याधी-

तवेदमन्यं ब्रह्मचारिणमग्नेर्दक्षिणभागे उपवेश्य अग्नेः पश्चार्धे अवस्थितः सन् 'हिरण्यवर्णा' इत्यादिभिश्चतसृभिश्चतस्रः समिधोऽग्नौ पूर्ववदभ्याद्ध्यात् । 'हिरण्यवर्णा' इत्यादयश्चतस्रः संमार्जने व्याख्याताः ॥ ३ ॥

नित्यव्रतोपायने ब्राह्मणा व्रतपतय इति चतुर्थम् ॥ ४ ॥

यदेतत्प्रस्तुतं ब्रह्मचारिणो नित्यमवश्यकर्तव्यं व्रतग्रहणं, तत्र 'ब्राह्मणा व्रतपतयो व्रतमालभे तद्वः प्रब्रवीमि तच्छकेयं तेनर्ध्यासम्' इति मन्त्रं चतुर्थं कुर्यात् । त्रयस्तु पूर्वं व्याख्याता अत्रापि स्थिता अग्ने व्रतपते० वायो व्रतपते० सूर्य व्रतपते० इति ॥ ४ ॥

अथ व्रतहोमान् ॥ ५ ॥

वक्ष्याम इति शेषः ॥ ५ ॥

चतुर्गृहीतैश्चतुर्होतृभिराज्येन तेजस्कामो यावकेन पशुकामोऽन्नाद्येन वीर्यकामः पयसि स्थालीपाकं श्रपयित्वा

ब्रह्मवर्चसकामो मनसैकैकं हुतमनुमन्त्रयते यद्वेदव्रतं तदत्र व्रतम् ॥ ६ ॥

सप्त चतुर्होतारोऽत्र मन्त्राः । अपयित्वेत्येतदन्तं स्पष्टम् । एकैकं चतुर्होतारं हुतं मन्त्रं मनसानुमन्त्रयते मन्त्रागममनुसन्दधीत मन्त्रद्वारेणेत्यर्थः । यद्वेदविहितं व्रतं, तत् परिपूर्णमस्त्वत्र मम व्रतमिति वाचयेत् ॥ ६ ॥

विकारानन्नुक्रमिष्यामो न चतुर्भिः सहासीत न चतुर्णां समक्षं भुञ्जीत न चतुर्भिः सह भुञ्जीतैकतमो वा ॥ ७ ॥

एवमपवर्गे ॥ ८ ॥

अपवर्गः समाप्तिर्व्रतस्य, तत्र ॥ ८ ॥

वास आचार्याय ददाति वरं दक्षिणत आसीनाय ॥ ९ ॥

वस्त्रं दक्षिणामाचार्याय दक्षिणत उपविष्टाय दद्यात् ॥ ९ ॥

चतुर्होतृमन्त्रान् व्याख्यास्यामः

भक्त्या ब्रह्म विवर्तं वा परिणाममुपाश्रितान् ।<br>
आध्यात्मिकैकरूपार्थांश्चतुर्होतॄन्नमाम्यहम् ॥

चित्तिः स्रुक् चित्तमाज्यं वाग्वेदिराधीतं बर्हिः केतो अग्निर्विज्ञातमग्निर्वाचस्पतिर्होता मन उपवक्ता प्राणो हविः सामाध्वर्युरिन्द्रं गच्छ स्वाहा ॥

चतुर्होतृणामार्षम्। इन्द्रो देवता। 'हु दानादनयोः' जुह्वति ददतीति होतारः। चतुर्णां धर्मार्थकाममोक्षाणां दातारश्चतुर्होतारः प्रद्युम्नानिरुद्धवासुदेवसङ्कर्षणाः प्रथमब्रह्मविवर्ताः। तथाच ब्राह्मणं 'ब्रह्म वै चतुर्होतारः' इति, प्रजापतिरकामयत बहु स्यामित्यादि च। एवं च परमात्मैव यज्ञरूपः स्तूयते। यज्ञो वै प्रजापतिरिति, विष्णुर्यज्ञ इत्यादिरपि श्रुतिः। अतोऽध्यात्मयज्ञस्वरूपं रूपकेणाह—चेतनं चित्तिर्ज्ञानं स्रुक्। चित्तं मनः स्वान्तमन्तःकरणं चेतो मानसमिति पर्यायः, चित्तमाज्यं, यथाहि स्रुचा आज्यं प्रक्षिप्यतेऽग्नौ, तथा विवेकज्ञानेन मनः परमानन्दध्यानवह्नौ प्रक्षिप्यते। यथाहि क्षिप्तमाज्यं दह्यते, तद्वन्मनोऽप्यध्यात्मध्याने प्रक्षिप्तं सत् स्वयं विलीयते सर्वाविद्याभेदान्तराणि च विलापयति कतकफलरजोवत्। वाग्वेदिर्यज्ञाश्रयत्वात्। यथाहि वेदिमाश्रित्य यज्ञपात्राणि

स्त्रुगादीनि निजकार्येषु व्याप्रियन्ते, तद्वद्वैदिकीं वाचमुपनिषद्रूपामाश्रित्य मनःप्रभृति अध्यात्मयज्ञसाधनं निजकार्यं जनयति । आधीतं बर्हिः, आध्यानमाधीतिः चित्तध्यातॄणां तत् बर्हिस्तदाश्रितत्वाच्चित्तिस्त्रुगादीनां 'प्रस्तरे जुहूं साधयति सर्वाश्च स्रुचः' इति श्रुतेः । केतो अग्निः 'चिती संज्ञाने' असुन्, छान्दसो वर्णव्यत्ययः, केतः प्रज्ञाविशेषः, स एवाग्निस्तेनैव योगयोगाङ्गादिसमिधां सन्दीपनात् । विज्ञातमग्नित्, विशिष्टं ज्ञानं वेदार्थग्राहि, अग्नित् छान्दसो ह्रस्वः, यथाहि ऋत्विग्विशेषेणैधसाग्निः सन्दीप्यते, तथा वेदार्थज्ञानेनोत्तरोत्तरमध्यात्मचित्ताग्निः । वाचस्पतिर्होता, वाचस्पतिरन्तरात्मा, स होता चित्तिस्त्रुगादिप्रेरणात्, अथवा आह्वाता मनःप्रभृतीनामृत्विजां प्रेषयिताध्वर्युः । मन उपवक्ता, मन्यतेऽनुमन्यते इति मनोऽन्तर्यामी, स उपवक्ता ब्रह्मा । स हि यत् जीवात्मा जानाति करोति वा, तत् सर्वमनुवदत्यनुपश्यतीत्यादिरूपेण अनुमन्यते । प्राणो हविः, स हि परमात्माग्नौ हूयते निरुद्ध्योत्क्रान्तिकाले

ब्रह्मद्वारेण परब्रह्मणि प्रक्षिप्यते। सामाध्वर्युः, सामशब्दो व्यानवचनः, यथाहि अध्वर्युः सर्वर्त्विजो निजनिजकर्मसु प्रैषैर्नियच्छति, तथा व्यानाख्यो वायुर्नाभेरुपरि दशस्वङ्गुलेषु पुरुषस्थाने स्थितः प्राणापानौ स्वमर्यादायां स्थापयति परस्परविरुद्धगती। एतच्च योगसारे निर्णीतमस्माभिः। यदेव पुरुषस्य स्थानं, तदेव व्यानस्य प्राणापानयोर्नियन्तुः। यदा होतृपदेन आह्वाता अध्वर्युरुच्यते, तदा भूतयज्ञादध्यात्मयज्ञस्य वैलक्षण्यप्रतीतिः प्रयोजनमध्वर्युद्वयप्रदर्शनस्य। इत्थं प्रजापतिना इन्द्रादिशब्दवाच्येन प्रद्युम्नाद्यवस्थाचतुष्टयविवर्तेन चतुर्होत्रा च दशविधमात्मानं कृत्वा परमात्मनि समर्पणं कृतम्। तदाह—इन्द्रं गच्छ स्वाहा, हे प्राण इन्द्रं परमात्मानं गच्छ, सुहुतमस्तु स्वाहूतं वा। आह्वानस्य च शोभनत्वमनुष्ठापनपर्यवसानम्। एवमस्मदादयोऽपि ब्रह्मविवर्ता ब्रह्मपरिणामा वा संसारनिवृत्तिकामा अनुतिष्ठन्ति, कर्मकाण्डस्यापि च अद्वैतप्राप्तौ पर्यवसानमित्युक्तमस्माभिः सांख्यसा-

रशारीरकयोः । एवं तावदेकश्चतुर्होता व्याख्यातः ॥ अथ द्वितीयः

पृथिवी होता द्यौरध्वर्युस्त्वष्टाग्निर्मित्र उपवक्ता वाचस्पते वाचो वीर्येण सम्भृततमेनायक्ष्यसे यज्ञपतये वार्यमा स्वस्करो वाचस्पतिः सोमं पिबतु जजनदिन्द्रमिन्द्रियाय स्वाहा ॥

अनेन प्रजापतिरूपयज्ञस्याधिदैविकानि यज्ञसाधनान्युच्यन्ते । पृथिवी होता, सा हि आधिभौतिकयज्ञप्रजापतेरन्नादिहविर्दानेनाप्यायनं करोति । द्यौरध्वर्युः वृष्ट्यादिप्रेषणात् । त्वष्टा आदित्यः अग्नित् पक्तृत्वात् । मित्रो ह उपवक्ता ब्रह्मा त्रय्यर्थबोधेनैव निर्मलेनालंकृतत्वात् । हे वाचस्पते प्रजापते चतुर्होतृरूप वाचो मन्त्रब्राह्मणात्मिकाया वीर्येण अर्थतत्त्वावबोधबलेन अतिशयसम्भृतेन मया त्वमायक्ष्यसे पूजयिष्यसे । स त्वमिष्टः सन् यज्ञपतये यजमानार्थं स्वः स्वर्गमाकरः आभिमुख्येन कुरु । कीदृशं स्वर्गम् । वार्यं वरणार्हम् । वाचस्पतिः प्रजापतिः सोमं पिबतु सोमशब्देन हविर्मात्रमत्र लक्ष्यते, पिबतिना च उपयोगः । जजनदिन्द्रम्, अनेन चातुर्होतृकेण

कर्मणा प्रजापतिर्जनितवानिन्द्रमिन्द्रविवर्तम्। तथाच श्रुतिः

'ते चातुर्होत्राः सोमं गृहपतये न्यषीदन्निन्द्रं जनयाम'

इति, ते पृथिव्यादयः सोमं गृहपतिं कृत्वा चतुर्होत्रा मन्त्रेण निषण्णा वेद्यामिन्द्रं जनयामेति। इन्द्रियायेति व्रतवीर्यसम्पत्त्यर्थमित्यर्थः। स्वाहेति व्याख्यातम्॥ अथ तृतीयः

किमर्थं चतुर्होता

सोमः सोमस्य पुरोगाः शुक्रः शुक्रस्य पुरोगाः
श्रातास्त इन्द्र सोमा वातापे हवनश्रुतः स्वाहा॥

सोमो लतारूपः सोमस्य चन्द्रस्य पुरोगाः अग्रेसरः। शुक्रः प्रदृश्यः सोमो वा शुक्रः शुक्रस्य ग्रहस्यासुरगुरोर्वा पुरोगाः। सोमाः श्राताः पक्वाः आश्रिता वा। सोमशब्दो हविर्मात्र उपचारात्। उपचारनिमित्तं तु व्रतसम्पत्तौ क्रमेण सोमयागयोग्यतापत्तिः। हे वातापे वाताहार हवनश्रुतः आह्वानस्य श्रोतुस्तव सुहुतं स्वाहूतं वा अस्तु। बहुकर्मविनियोगभाजोऽमी चतुर्होतारो यथायोग्यं बह्वर्थयुजो योज्याः॥

अग्निर्होताश्विनाध्वर्यू रुद्रोऽग्निद्बृहस्पतिरुपवक्ता वाचस्पते हृद्विधे नामन्वाचस्पतिः सोममपादास्मासु नृम्णं धाः स्वाहा॥

अयं पञ्चहोता 'ते पाञ्चहोत्रा वरुणबृहस्पतयो न्यषीदन्निन्द्रं जनयाम' इति ह्यस्य ब्राह्मणम् । अत्र चाधिदैविकेनाधियज्ञियानामेकत्वमुच्यते मन्त्रे । अग्निर्होता तथाच श्रुतिः 'अग्निर्वै देवानां होता' इति, मन्त्रलिङ्गमपि 'अग्निमीळे पुरोहितम्' इति । अश्विनौ देवभिषजौ अध्वर्यू अध्वर्युप्रतिप्रस्थातारौ । रुद्रोऽग्नित्, अग्नीध्रो रुद्रः । बृहस्पतिरुपवक्ता । हे वाचस्पते हृद्विधे नामन्, हृदि विधिर्हृद्विधिरन्तर्यामी, तस्य सम्बोधनं हे हृद्विधे, नामन् नाम्ना अन्तर्यामिन् त्वं वाचस्पतिः सोममपात् सोमपः अतः पिब सोममिहास्मासु अस्मभ्यं नृम्णं बलं च धाः देहि ॥

वाग्घोता वातोऽध्वर्युर्दीक्षा पत्न्यापोऽभिगरो मनो हविस्तपसि जुहोमि वाचस्पतेऽच्छिद्रया वाचाच्छिद्रया जिह्वा दिवि देवावृधद्धोत्रा मैरयस्व स्वाहा ॥

अयं षड्होता । अध्यात्मनि या वाक्, सैव होता । वातोऽध्वर्युः, प्राणोऽन्तरिक्षगतिर्वा । दीक्षा व्रतसिद्धिरूपा पत्नी । आपोऽभिगरः, शंसनमभिगरस्तत्राप एव कर्त्र्योऽन्नादिसंपादनद्वा-

रेण। मनो हविरात्माग्नौ हूयमानत्वात् तपसि ब्रह्मणि जुहोमि मनःप्रभृतिकं ब्रह्मणि प्रक्षिपामि । हे वाचस्पतेऽच्छिद्रया अविनाशिन्या वाचा अन्तःप्रकाशरूपया अच्छिद्रया जिह्वया हे दिवि देव मे मम ईरयस्व प्रेरयस्व सम्पादय कर्म । कीदृश्या वाचा। अवृधद्धोत्राऽदृष्टहोमादिसम्पादनभूतयेत्यर्थः ॥

महाहविर्होता सत्यहविरध्वर्युरचित्तपाजा अग्निदचित्तमना उपवक्तानाधृष्यश्चाप्रतिधृष्यश्चाभिगरा अयास्य उद्गाता वाचस्पते विधे नामन्विधेम ते नाम विधेस्त्वमस्माकं नाम मा देवानां तन्तुश्छेदि मा मनुष्याणां स्वाहा ॥

अयं सप्तहोता मन्त्रः। 'ते साप्तहोत्रा अर्यमगृहपतयो न्यषीदन्सन्तरामि' इति ह्यस्य ब्राह्मणं, संतरणं ब्रह्मसंप्राप्तिः । महाहविश्चन्द्रः सर्वैरुपजीव्यमानत्वादत एवास्य कलाक्षयः कृष्णपक्षे, स होता देवानां हविर्दानेनाप्यायकत्वात् । सत्यहविरादित्यः सततप्रेरणात्, सोऽध्वर्युः । अचित्तपाजा अग्नित्, चित्तप्रज्ञाशून्योऽग्नीद्वायुरग्नीध्र इत्यर्थः। एवमचित्तमना ज्ञानमनोविहीनो वन्यफलशाकादिरुपवक्ता । कीदृशः । अना-

धृष्यश्चाप्रतिधृष्यश्च, अनभिभवनीयः, अतिशयाय भूयोवचनम् । अभिगराः, गृणातिः स्तुत्यर्थः । अयास्य उद्गाता 'यसु प्रयत्ने' अप्रयत्नसिद्धो वेदोपनिषद्रूप उद्गाता, स उद्गायति तत्त्वम् । हे वाचस्पते विधे नामन् त्रिधेम ते तव नाम त्वन्नामार्थं यज्ञं कुर्म इत्यर्थः । यतश्च त्वमेवास्माकं नाम स्वरूपं, तेनास्माकं देवानां मनुष्याणां च मा तन्तुश्छेदि संततिं मा च्छैत्सीः । सुहुतमस्तु तव ॥

इति चातुर्होतृकमन्त्राः ॥

---

ज्ञानानन्दमयं नुत्वा परमात्मानमच्युतम् ।
प्रवर्ग्यव्रतमन्त्राणां भाष्यं प्रस्तूयतेऽधुना ॥

तत्र 'नमो वाचे' इत्याद्यनुवाकेन 'प्राच्या त्वा' इत्यादिना यजुश्चतुष्टयरहितेन 'दिव्यो गन्धर्वो भुवनस्य' इति 'आहुस्ते भग' इति च द्वाभ्यामनुवाकाभ्यां शान्तिबन्धनं क्रियते । तस्य पुनः कुण्डे समभिमथ्य स्थापनं प्रदर्शितानुवाकैः । ततः शान्तिविमोकोऽवश्यकर्तव्यः । एते च मन्त्रा मन्त्ररहस्यादौ संमार्जने च कुशला अपीह तावच्छान्तिबन्धाय योज्यन्ते ॥

नमो वाचे नमो वाचस्पतये या वागुदिता या चानुदिता तस्यै वाचे नमः नम ऋषिभ्यो मंत्रकृद्भ्यो मंत्रविद्भ्यो मा मामृषयो मन्त्रकृतो मंत्रविदः परादुर्दैवीं वाचमुद्यासं शिवामजस्रां जुष्टां देवेभ्यः स्वधावतीं पितृभ्यः शुश्रूषेण्यां मनुष्येभ्यस्तं मां देवा अवन्तु शोभायै पितरोऽनुमदन्तु सुचक्षा अहमक्षिभ्यां सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासमों भूर्भुवः स्वः ॥

रुद्रस्यार्षम् । अभिधेयोऽर्थो देवता । या मन्त्रमयी वाक् तस्यै वाचे नमोऽस्तु । वाचस्पतये वाचां वचनरूपाणां पतिस्तस्मै उच्चारयित्रे नमः। या वागुपदिशन्ती सूक्ष्मा च तस्यै वाचे नमो नमः । नमःशब्दस्य पुनरुच्चारणमतिशयार्थम् । आभ्यां हि भूयांसमर्थं मन्यन्ते यथा अहो रमणीया अहो रमणीयेति । ये च ऋषयो मन्त्रविदो मन्त्रकृतश्च तेभ्यो नमो नमः । तत्र मन्त्रविदो ब्रह्मवक्त्रचतुष्टयतूर्णविनिर्गतान् मन्त्रान् सकृदेव गृह्णन्ति ग्रन्थतोऽर्थतश्च सनकादयस्ते मन्त्रविदः । तथा चारण्यकम्

'यथार्द्रैधाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य विनिःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदः'

इति । अन्यत्रापि

'ये साक्षात्कृतधर्माण ऋषयो बभूवुस्ते परेभ्योऽसाक्षात्कृतधर्मभ्यो मन्त्रान् संप्रादुः'

इत्यादि । मा मामृषयो मन्त्रकृतो मन्त्रविदः परादुर्दैवीं वाचम् इति, ये मन्त्रकृतो मन्त्रविदश्च ऋषयस्ते दैवीं वाचं मां मा परादुः, मामिति पञ्चम्यर्थे द्वितीया, मत्सकाशात् पराङ्मुखीं मा कार्षुः मन्त्ररूपां वाचम् । किन्तर्हि । दैवीं वाचमहमुद्यासं 'या प्रापणे' उत्कर्षेण प्राप्नुयामित्यर्थः । शिवां श्रेयस्करीम्, अजस्रां नित्यां, जुष्टां देवेभ्यः, देवेभ्यः प्रीतिजननीं 'जुषी प्रीतिसेवनयोः' । स्वधावतीं पितृभ्यः, पितृभ्योऽन्नवतीम्, मन्त्रैर्हि देवाः प्रीयन्ते पितरश्च स्वधां भजन्ते । शुश्रूषेण्यां मनुष्येभ्यः, श्रवणार्हां शुश्रूषेण्याम् । तमेवंभूतं मां स्तोतारं देवा अवन्तु, शोभायै शोभयोपलक्षितं सन्तं पितरश्चाऽवन्तु अनुमदन्तु अनुमाद्यन्तु, शोभायै देवाः पितरश्च हृष्टा भवन्तु । किंच देवपितृप्रसादादहमक्षिभ्यां सुचक्षा भूयासमक्षिभ्यां सुदर्शनः स्यामित्यर्थः, मुखेन च सुवर्चा सुदीप्तिर्भूयासम् । ओंभूर्भुवः स्वरिति

संक्षेपेण वाग्विभव उक्तः भुवनत्रयस्य वाग्विभवविवर्तत्वात् ॥

प्राच्या त्वा दिशाग्निना देवतया गायत्रेण च्छन्दसा वसन्तमृतुं प्रविशामि ॥ दक्षिणया त्वा दिशेन्द्रेण देवतया त्रैष्टुभेन च्छन्दसा ग्रीष्ममृतुं प्रविशामि ॥ प्रतीच्या त्वा दिशा सवित्रा देवतया जागतेन च्छन्दसा वर्षा ऋतुं प्रविशामि ॥ उदीच्या त्वा दिशा मित्रावरुणाभ्यां देवतयानुष्टुभेन च्छन्दसा शरदमृतुं प्रविशामि ॥ ऊर्ध्वया त्वा दिशा बृहस्पतिना देवतया पांक्तेन च्छन्दसा हेमन्तमृतुं प्रविशामि ॥ अनया त्वा दिशा प्रजापतिना देवतया अनाप्तेन च्छन्दसा शिशिरमृतुं प्रविशामि ॥ गायत्रीं च्छन्दः प्रविशामि । त्रिष्टुभं च्छन्दः प्र० । जगतीं छन्दः प्र० । अनुष्टुभं च्छन्दः प्र० । पङ्क्तिं च्छन्दः प्र० । अतिच्छन्दसां च्छन्दः प्र० । च्छन्दांसि प्रविशामि । तानि नः पारयन्तु तानि नोऽवन्तु तानि स ऋच्छतु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ आपोऽस्मान् प्रविशन्त्वापोऽस्मासु जाग्रत । आयुर्विश्वायुर्विश्वमायुर्व्यश्नवै सर्वमायुर्व्यश्नवै ॥

उदकावमर्षणप्रवृत्त एव तु छन्दःप्रभृतीनामुदकेन सहाभिन्नत्वमारोप्योदकमाह—हे उदक, त्वां वसन्तर्तुभूतमहं प्रविशामि, प्रस्तुतकर्मणा त्वामाराध्य त्वन्मयफलानि लभेयमित्यर्थः। केन प्रविशामि । प्राच्या दिशाग्निना देवतया गायत्रेण च्छन्दसा । एवमृतुपञ्चकप्रवेशो वा-

क्यानि योजयितव्यानि। एवं गायत्रीं छन्दः प्रविशामीत्यादि। च्छन्दः प्रवेशवचनमात्मादिरक्षार्थं निर्भयस्थानप्रवेशपरत्वेन योजयितव्यम्। तानि च्छन्दांसि नोऽस्मान् पारयन्तु प्रस्तुतसमाप्तिं कुर्वन्तु। तानि नोऽवन्तु रक्षन्तु तर्पयन्तु च। तानि स ऋच्छतु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः, यं वयं द्विष्मो यश्चास्मान्द्वेष्टि, स तानि च्छन्दांसि ऋच्छतु, तानि छन्दःप्रभृतीनि प्राप्य लीयतामित्यर्थः॥

आपः अस्मान् प्रविशन्तु, अधिष्ठात्री देवता रक्षकत्वेन मामधितिष्ठत्वित्यर्थः। आपोऽस्मासु जाग्रत, हे आपः अस्मासु जाग्रत। आयुर्विश्वायुर्विश्वमायुर्व्यश्नवै सर्वमायुर्व्यश्नवै, अपां प्रसादात् आयुर्व्यश्नवै विशेषेण व्याप्नुयां विश्वायुर्विश्वमायुरित्यादि पुनर्वचनमतिशयार्थं पूर्ववत्।

दिव्यो गन्धर्वो भुवनस्य यस्पतिरेकाव्यो मनसा विक्ष्वीड्यः। तं त्वा यामि ब्रह्मणा देव दैवी नमस्तेऽस्तु दिवि ते सधस्थम्॥ दिवि पृष्टो यजत सूर्यत्वगवयातो हरसो दिव्यस्य। एकाव्यो मनुष्यः सुशेवः। मूळादु गन्धर्वो भुवनस्य यस्पतिरनवद्याभिः समजग्माभिरप्सरःस्वपि गन्धर्व

आसीत्समुद्र आसां सदनं व आहुस्ततः सद्य्या च पराचरन्त्यग्निये दिद्युन्नक्षत्रिये या विश्वावसुं गन्धर्वं सचध्वे ताभ्यो नमो अस्तु ता नो मृडयन्तु ता नः शर्म यच्छन्तु ता यं द्विष्मो यश्च नो द्वेष्टि तमासां जम्भे दध्मः ॥

दिवि भवो दिव्यः, गा रश्मीन्धारयतीति गन्धर्वः, स एव रुद्रः इष्टः। स एव भुवनस्य पतिः। श्रूयते हि

'इमे वै लोका भुवनं तेषामेषोऽधिपतिर्यो रुद्र इति'

एक एव अवति सर्वं रक्षतीत्येकाव्यः। मनसा विक्ष्वीड्यः, विक्षु देवसेनासु मध्ये स एव ईड्यः स्तुत्यः मनसा मननध्यानादिना आराधनीय इत्यर्थः, अथवा विक्ष्विति विभक्तिव्यत्ययः विशां मनुष्याणां मनसैवेड्यः योऽसावन्तरादित्ये पुरुष औपनिषदः। हे देव द्योतनादिकर्मक तमेवंभूतं त्वा भुवनाधिपतिभूतत्वात् अहं यामि प्राप्नोमि ब्रह्मणा मन्त्रात्मकेन वेदेन वन्दमानः स्तुवान आयामि वा प्राप्तुमिच्छामीत्यर्थः। अतो नमस्तेऽस्तु यस्य ते दिवि सधस्थं स्थानं तस्मै। 'दिवि पृष्टः' प्रवर्ग्यव्रतहोमारम्भार्थमिदमृत्विज उद्दिश्योच्यते। हे ऋत्विजः दिवि स्वर्गे पृष्टभूतोऽयमादित्यः सर्वदे-

वोत्तम इत्यर्थः । सूर्यत्वक् सूर्यस्य त्वगिव त्वक् यस्य स सूर्यत्वक् सूर्यान्तर्वर्ती पुरुष इत्यर्थः । अवयाः बाल्याद्यवस्थाशून्यो ब्रह्मणोऽनाद्यन्तत्वात् । अतोऽस्य दिव्यस्य हरसस्तेजोरूपस्य यजत हे ऋत्विजः, एकाव्यः, मनुष्षु मनुष्येषु मुमुक्षुषु साधुर्मनुष्यः, सुशेवः, शेव इति सुखनाम, नित्यानन्दस्वभाव इत्यर्थः, सुखसेव्यो वा छान्दसो वर्णव्यत्ययः, सुशेवा इति केचित्पठन्ति, मृडात् मृडं सुखमत्तीति मृडात् नित्यसुखस्य भोक्ता । गन्धर्व इति व्याख्यातम् । काभिर्यजत । अनवद्याभिराहुतिभिः समजग्माभिः समं कृत्वा अग्निं यतन्तीभिः । अनेकर्त्विक्कर्तृकत्वाद्धात्तं यौगपद्यम् । अप्सु सरतीत्यप्सरास्तास्वपि गन्धर्व आदित्य आसीदस्ति । अयमत्र विवेकः यदि कश्चिदाशङ्कते त्रेताया अभावादाहवनीयाः कथं ब्रह्मचारिव्रताहुतयस्तत्रेदमुक्तम् । जलचारिणीष्वप्याहुतिष्वाऽऽदित्योस्ति सर्वत्रगोऽसावित्यर्थः । अतो हे ऋत्विज आसां वो युष्माकं सम्बन्धिनीनामाहुतीनां समुद्रो मन्त्ररूपो वेदः सदनमाश्रयो गृहमाहुः

अतस्तद्बलेन लौकिकाग्नौ हूयन्ताम् । कास्ताः । या हुताः सत्यस्तत एव मन्त्रबलात्सभ्या च सहैव यजमानेन पराचरन्ति । कुत्र । अभ्रिये ऽभ्रच्छन्नेऽन्धतमसे अविद्यावृत इत्यर्थः । नक्षत्रिये प्रकाशे तत्त्वालोके ज्ञान इत्यर्थः । दिद्युत् अतिशयेन द्योतमाना अज्ञानाभ्रपटलमपसारयन्त्य इत्यर्थः । विश्वं सर्वं वासयति विश्वावसुस्तं गन्धर्वमादित्यं ससध्रे गच्छन्ते यूयमपि हे ऋत्विज इति प्रोत्साहना । ताभ्यो व्रताहुतिभ्यो नमोऽस्तु महाप्रभावाभ्यः । ताश्चास्मान् मृडयन्तु सुखयन्तु, तथा शर्म सुखं यच्छन्तु । पुनरभिधानं निरतिशयमुक्तिसुखार्थम् । यं वयं द्विष्मो यश्चास्मान्द्वेष्टि, तं वयमासामाहुतीनां जम्भे स्थाने वह्नौ दध्मः क्षिपामः ॥

आहुस्ते भग चक्षुषी ताभ्यां विपश्य मामभि । यदेतत्सारघं मधु तेन रूपमनज्मि ते तेन रूपमनग्धि मे ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां देवानां क्रतुभिर्देवाभ्यञ्जनैरभ्यञ्जे भगवन्नामासि तस्य त ऋचश्च यजूंषि च सामानि च वागग्ना अन्यच्चक्षुः सूर्येऽन्यदग्ना अन्यद्भगवान्भूयासम् ॥ ऐरोसि चक्षुरसि श्रोत्रमसि पुरन्ध्रिर्नाम

वागसि । येन शतक्रतुर्भागमुपजुह्वे तेन त्वोपह्वये भग ॥
तद्वां नरा सनये दंस उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिम् ।
दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा सुमतिरवोचत् ॥
अग्निरीशो वासव्यस्याग्निर्महः सौभगस्य तान्यस्मभ्यं रासति ॥

अत्रापि च परमात्मैव रुद्ररूप आदित्योऽश्विनाऽग्निरूपेण स्तूयते । भजनीयः सेवनीयो भगो रुद्रः परमात्मा तस्य सम्बोधनम्, हे भग, तव चक्षुषी आहुर्वेदविदः चक्षुष्मन्तं त्वां वेदविद आहुः ।

'तस्य सूर्याचन्द्रमसावेव चक्षुषी'

इति श्रुतेस्ताभ्यां चक्षुर्भ्यां विशेषेण मामाभिमुख्येन चानुकूल्येन पश्य अतिशयार्थं पुनर्वचनम् । सरघा मधुमक्षिका । तासामिदं सारघं यदेतत्प्रसिद्धं मधु, तेन तव रूपं तेजोमयमनज्मि ते इति केचित् । सारं दृढं संसारं हन्तीति सारघं मधुरफलत्वात् मधु तत्त्वज्ञानं, तेन ते चक्षुषी चन्द्रादित्यरूपेऽनज्मि कृताञ्जने संस्कृते संपादयामि तत्त्वज्ञानविषयत्वमापादयामीत्यर्थः । तेन रूपमनग्धि मे, त्वमपि च मया विशोधितचक्षुर्ज्ञानकर्मभिर्मम

यद्रूपं पारमार्थिकब्रह्मतत्त्वात्मकं तदनग्धि अ-ञ्जनेन संस्कुरु विलीनाविद्योपप्लवं कुर्वित्यर्थः।

देवस्येति। हे रुद्र त्वामहमभ्यञ्जे देवानां सम्बन्धिभिरभ्यञ्जनैर्देवैर्द्योतनादिगुणकैः ऋषि-भिर्वेदार्थाभ्यासकुशलैर्यैस्त्वमभ्यक्तो ज्ञानाहु-तिप्रभृतिभिरित्यर्थः, देवस्य सवितुः प्रसवे आ-ज्ञायां वर्तमानः, अश्विनोर्देवभिषजोर्बाहुभ्यां, न तु स्वाभ्यां चर्ममयाभ्यां, सूर्याचन्द्रमसावश्विनौ अश्वरथसंचारित्वात्, पूष्णः आदित्यस्य हस्ता-भ्यां देवानां च। ऋतुभिराहुतिभिः प्रवर्ग्यव्र-तहोमसम्बन्धिनीभिः। ऋामन्तीति ऋतवो नित्यकर्मज्ञानानीति साधारणी व्याख्या। हे रुद्र भगवन्नामासि सर्वस्याधिपतिस्त्वमित्यर्थः। तस्यैवंभूतस्य तव ऋच ऋग्वेदः, यजूंषि यजु-र्वेदः, सामानि सामवेदो वाक् वक्तीति वाक् त्रयी तव वाचिका इत्यर्थः। त्वया वा प्रति-सर्गादिसुप्तप्रतिबुद्धनयेन स्मृतत्वात्तव त्रयी, तथा वाक्। अग्नौ अन्यच्चक्षुः सूर्ये चान्यत्, काम्यकर्माहुतिभिः संतर्प्यतेऽग्नौ या दृष्टिस्तव, सान्या स्वर्गादिफलस्य दात्री। सूर्ये तु प्रकाश-

कैकस्वरूपे ध्यानादिना साक्षात्कृतेऽन्या मोक्षस्य दात्री यापि काम्यनिषिद्धरहितनित्यनैमित्तिककर्माहुतिभिः संतर्प्यतेऽग्नौ त्वदीयस्वभावान्तरे दृष्टिः सूर्ये च पूर्वोक्ता साप्यन्या, ज्ञानकर्मसमुच्चयादपि त्वं मोक्षं साधयसि गृहमेधिनामित्यर्थः,नैष्ठिकब्रह्मचर्यापेक्षया तु केवलज्ञानकृता मुक्तिर्व्यक्ततयोक्ता। अतोऽनेन व्रतेन भगवान्भूयासं ब्रह्मभूयं प्राप्नुयामित्यर्थः । ऐरोसि, इरा अन्नं तस्यायमैरोऽन्नाधिपतिरसीत्यर्थः । चक्षुरसि । श्रोत्रमसि । पुराणि लोकत्रयसमूहान्धारयतीति पुरंध्रिस्तन्नामिका वागसि त्रयीमयोसीत्यर्थः, यावन्तः प्रकाशका भावास्तावन्त इत्यर्थः । हे भग रुद्र तेन मन्त्रेणाऽहं त्वामुपह्वये आह्वयामि, येन शतक्रतुरिन्द्रो भागं सोमादिहविषो दानमुपजुह्वे 'हु दानादनयोः' ददौ, चखाद वेत्यर्थः । तद्वामिति तत् तस्मात् हे नरावश्विनौ सूर्याचन्द्रमसौ वा कल्पितभेदौ सनये विभजनाय इदं भागरूपं हविष आविष्करोमि । उग्रं बहुबलम् । क इव किम् । तन्यतुर्न वृष्टिं, न शब्द उ-

पमायाम्, तन्यतुर्वायुर्मेघादिसंतानभेदत्वात्, यथा वायुर्वृष्टिमाविष्करोति वैद्युतादितेजःसंक्षोभणेन । दध्यङ् ह यन्मध्वाथर्वण इति, अथर्वणोऽपत्यं दध्यङ्ङिति यस्य संज्ञा, स तथा वां युवामश्वस्य शीर्ष्णाऽश्वशीर्षो भूत्वा आहूतवान् सुमतियुक्तः । किमर्थम् । मधु मधुने मोक्षायेत्यर्थः, मोक्षस्य नित्यानन्दसुन्दरमधुमयत्वात्, तद्वदहमपि सुमतिरवोचत् युवामाह्वये इत्यर्थः ॥

अग्निरीश इति, अग्निर्वसव्यस्य ईशः, वसुनि साधु वसव्यम् हिरण्यप्रभृतिकं तस्याग्निरीश्वरः स्वामीत्यर्थः । अग्निर्महः, सौभगस्येश इति संबन्धः, महतः सौभाग्यस्याग्निः प्रभुरित्यर्थः । तानि वसव्यसौभाग्यानि अस्मभ्यं रासति ददात्यग्निः ॥

अग्ने व्रतपते सम्राडसि व्रतपा असि व्रतभृदसि व्रतपतिरसि व्रतमालभे तत्ते प्रब्रवीमि तच्छकेयं तेनर्ध्यासम् ॥ वायो व्रतपते० । सूर्य व्रतपते० ।

अग्ने व्रतपते इति त्रिभिरग्निमुपतिष्ठमानो व्रतमालभते । हे अग्ने व्रतपते व्रतस्य प्रकृतस्य

गोपायितः, असि त्वं सम्राड् सम्यग्राजसे, व्रतपा व्रतस्य पालयिता । व्रतभृदसि व्रतस्य पोषको भवसि । व्रतपतिरसि व्रतस्य स्वामी भवसि । यत एवंभूतस्त्वमत उच्यते–अहं व्रतमालभे आरभे, तत्तस्मात्ते प्रब्रवीमि, तद्व्रतं त्वत्प्रसादादहं कर्तुं शक्नुयाम्, तेन च कर्मणः समृद्धिं फललक्षणां प्राप्नुयाम् । वायो व्रतप० सूर्य व्रतपते० इत्येतावपि गतार्थावनेनैव ॥

पृथिवी समित्तामग्निः समिन्धे तामहं समिन्धे सा मा समिद्धा सुपमिद्धा तेजसा वर्चसा यशसा ब्रह्मवर्चसेन समिन्ध्यात् ॥ अन्तरिक्षं समित्तां वायुः समिन्धे तामहं० ॥ द्यौः समित्तां सूर्य समिन्धे तामहं० ॥

एतैस्त्रिभिर्यथाक्रममग्नौ तिस्रः समिध आदधाति व्रतसाहचर्यात्तिष्ठन्नेव, नासीनः । इयं प्रथमा । समित् पृथ्वी पार्थिवत्वात् । तां समिधमग्निः समिन्धे व्यत्ययेनोत्तमपुरुषः समिन्धते । तामहं समिन्धे दीपयामि । सा समिद्धा सुष्ठु समिद्धा सती मां ब्रह्मवर्चसादिभिः समिन्ध्यात् समिन्धेत् । एवं द्वितीया अन्तरिक्षमिव, तृतीया द्यौरिवेति समानम् ॥

सूर्य व्रतपते सम्राडसि व्रतपा असि व्रतभृदसि व्रतपतिरसि व्रतमचारिषं तदशकं तत्ते प्रब्रूमस्तन्नो गोपाय ॥ वायो व्रतपते० अग्ने व्रतपते० ॥

एतैस्त्रिभिश्चूलिकाक्रमापूतैर्व्रतं विमुच्यते । अर्थस्तूक्त एव, क्रममात्रमेव भिद्यते साधारणपदेषु, तदचारिषं तदशकमिति तु विशेषः । तद्व्रतं चरितं त्वत्प्रसादान्मया, शकितं च, तत् सम्पन्नं सत् रक्षामात्रमेवापेक्षते । तस्मात् हे सूर्य वायो अग्ने तद्व्रतं नोऽस्माकं गोपाय रक्ष । व्रतविमोके समित्त्रयदानं कर्तव्यम् । तत्रापि च मन्त्राः समिदित्यादिचूलिकाक्रमेणेष्टाः समिदादानं च व्रतसाहचर्यात्तिष्ठतः ॥

उदु त्यमिति दशर्चेनानुवाकेन होमः ।

उदु त्यं जातवेदसं देवं वहन्ति केतवः ।
दृशे विश्वाय सूर्यम् ॥

संध्योपासने व्याख्यातेयम् ।

इममूषु त्वमस्मभ्यं सनिं गायत्रं नवीयांसम् ।
अग्ने देवेषु प्रवोचात् ॥

प्रवोचादित्याख्यापने लोडर्थे लेट्, 'इतश्च लोपः परस्मैपदेषु' (३।४।९७।) इतीकारलोपः, 'लेटोऽडाटौ' (३।४।९४।)। ऊ इत्यनर्थकः, षु इति

सुशब्द उपसर्गः सनिशब्देन सम्बध्यते । हे अग्ने इमं होममस्मभ्यमस्माकं सम्बन्धिनं गायत्रं अनया गायत्र्या संपादितं होमं त्वं देवेषु प्रवोचात् प्रब्रूहि, यदुत युष्माकमयं होमो युष्मद्भोग्य इत्यर्थः । सुसनिं 'वन षण संभक्तौ' शोभनसंविभागं, नवीयांसमतिशयेन नवम् ॥

समिन्द्र नो मनसा नेषि गोभिः सं सूरिभिर्हरिवः सं स्वस्त्या । सं ब्रह्मणा देवकृतं यदस्ति सं देवानां सुमत्या यज्ञियानाम् ॥

हे इन्द्र हरिवः हरितवर्णाश्वयुक्त नोऽस्माकं मनसा संनेषि संनयसि संविभजसि शोभनमननध्यानादिकं संप्रयच्छसीत्यर्थः । एवं गोभिः संनयसि, सूरिभिर्विद्वद्भिः ऋत्विग्भिर्यज्ञसहायैः संनयसि, स्वस्त्या अविनाशेन मोक्षप्राप्तिलक्षणेन संनयसि, तथा ब्रह्मणा वेदेन परमात्मना च संनयसि ब्रह्मभूयं गमयसि देवकृतं यदन्यदप्युत्कृष्टमस्ति तेन संनयसि, देवानां बृहस्पतिप्रभृतीनां सम्बन्धिन्या सुमत्या शोभनया बुद्ध्या संनयस्यस्माकम् । कीदृशानाम् । यज्ञियानां यज्ञार्हाणाम् । यज्ञियानां देवानां सुमत्या संनयसीति वा सम्बन्धः ॥

सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सं शिवेन ।
त्वष्टा सुदत्रो विदधातु रायोऽनु नो मार्ष्टु तन्वो यद्विलिष्टम् ॥

हे इन्द्र वयं त्वत्प्रसादाद्वर्चसा दीप्त्या, पयसा तनूभिः शरीरैः स्वपुत्रादिसम्बन्धिभिः समगन्महि संगताः भूयास्म, शिवेन शान्तेन च मनसा समगन्महि । तथा त्वष्टा रायो धनं विधदातु नः, सुदत्रः शोभनदाता सुष्ठु वा दाता, यस्त्वष्टा अनु अनन्तरं नोऽस्माकं मार्ष्टु संशोधयतु अनुमार्ष्टिति वा संबन्धः । किमनुमार्ष्टु । यदनुमार्जनयोग्यं किल्बिषमर्थात् । कीदृशम् । विलिष्टं विलग्नमित्यर्थः इति केचित् । अयं त्वत्रार्थः 'लिश अल्पीभावे' नित्यनैमित्तिकाद्यनुष्ठानेन यद्विशेषेणाल्पीभूतं, तदेव हेलयैवानुमार्ष्टु त्वष्टेति ॥

अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः ।
अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आततन्थ ॥

अग्निः प्रथमो जातवेदाः सर्गादावुत्पन्नो विना तद्रूपेण जातधनो जातप्रज्ञानश्च उषसां रात्रीणामग्रमारम्भमन्वख्यदनुप्रकाशितवान् नि-

र्मितवानित्यर्थः । ततोऽहानि दिवसानन्वख्यत् । ततः सूर्यस्य रश्मीनन्वख्यत्प्रख्यापितवान् । कीदृशोऽग्निः । पुरुत्रा पुरूणां बहूनां त्राता, यद्वा पुरुरेव पुरुत्रा 'पुरुदेवमनुष्येभ्यस्त्रा' (५।४। ५६।) इति त्राप्रत्ययस्ताद्धितः । द्यावापृथिव्यौ चान्वाततन्थ विस्तारितवान् ॥

या वां कशा मधुमत्यश्विना सूनृतावती ।
तया यज्ञं मिमिक्षतम् ॥

हे अश्विनौ या वां युवयोः कशा वाक्, सा हि कशेव नियन्त्री चित्ताश्वानां, मधुमती मधुपरिणामा सूनृतावती सत्यवती तया यज्ञं व्रताङ्गभूतं मिमिक्षतं संमिश्रीकुरुतमिति केचित् । अयं त्वर्थः 'मिह सेचने' सिञ्चतमाप्यायतमित्यर्थः ॥

धाता दधातु नो रयिमीशानो जगतस्पतिः ।
स नः पूर्णेन वावनत् ॥

धाता प्रजापतिर्नोऽस्मभ्यं रयिं धनं दधातु धारयतु वा । स हि ईशानः प्रभुः जगतो जंगमस्य त्रिलोक्या वा, जगतस्पतिर्जगतां पाता । स धाता नोऽस्माकं पूर्णेन अन्यूनेन संविभा-

गेन वावनत् 'वन षण संभक्तौ' अतिशयेन संविभजतु ॥

धाता प्रजानामुत राय ईशिषे धातेदं विश्वं भुवनं जजान ।
संदाशुषे किरति भूरिवांसं वयं स्याम पतयो रयीणाम् ॥

धाता प्रजानामीशिषे ईष्टे । किं वा अल्पोक्त्या धातैवेदं विश्वं समग्रं भुवनत्रयं जजान जनितवान् जातवांश्च । धातैव दाशुषे दत्तवते यजमानाय संकिरति संददाति । किम् । भूरिवांसं प्रभूतमेव नीरं संविभजनीयं यज्ञफलादिकम् । अतो धातुः प्रसादाद्वयं रयीणां धनानां पतयः स्याम ॥

त्रयस्त्रिंशत्तन्तवो यान्वितन्वत इमं यज्ञं स्वधया ये ददन्ते ।
तेषां च्छिद्रं प्रतिदध्मो यदत्र स्वाहायं यज्ञो अप्येतु देवान् ॥

यज्ञं तन्वन्ति ये ते तन्तवो यजमानर्त्विक्प्रभृतयः । त्रयस्त्रिंशदिति तन्त्रं यथासम्भवोपलक्षणार्थत्वात् । यानिति व्यत्ययः । य इमं यज्ञं तन्वते स्वधया अन्नेन, ये ददते यज्ञं, व्यत्ययेन वा स्वधामन्नं ददते देवेभ्यो ये, तेषां च्छिद्रं व्रतविघ्नविधायिफलाचरितादिकं तत्प्रतिदध्मः प्रतिविदध्महे विनिवारयामोऽनेन

होमेन, यदत्र व्रते किंचिद्विघ्नकारि वस्त्वऽनेन होमेन विनिवारयाम इत्यर्थः । स्वाहा सुहुतमस्तु । अयमपि यज्ञो देवानेतु गच्छतु ॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पांसुरे ॥

विष्णुः प्रजापतिर्यज्ञादिरूपमिदं त्रैलोक्यं विचक्रमे विक्रान्तवान् । त्रेधा निदधे पदं, त्रिभिः पदैस्त्रिलोकीरूपेण विवृत्तः परिणतो वेत्यर्थः । समूढमस्य पांसुरे, चतुर्थं पदं चतुर्थचरणरूपमविवृत्तमपरिणतं च यदस्य तात्त्विकं ब्रह्मणो रूपं, तत् पांसुरेऽविद्यया सुच्छन्ने समूढं सम्यग् ब्रुडितं नायोगिभिर्गम्यते इत्यर्थः ॥

अत्र च व्रतापवर्गे 'मा नो घर्म' इत्यनुवाकेन प्रत्यृचमेकोनात्रिंशदाहुतयो होतव्याः ।

मा नो घर्म व्यथितो विव्यथो नो मा नः परमधामाहुतो नैः ।
मोष्वस्मांस्तमस्यन्तराधा मा रुद्रियासो अभिकुर्वतो नः ॥

हे घर्म प्रवर्ग्यव्रत नोऽस्मान् व्यथितः सन् मा विव्यथः प्रमादजेनापराधेन वैगुण्यमापादितोपि सन्नस्माकं व्यथां मा कार्षीरित्यर्थः ।

मा नः परमधामाहुतो नैः, 'ह्वृ कौटिल्ये', अह्रुतः अकुटिलः सन् परमधाम परमं स्थानं मृत्युगृहं मा नैः मा नैषीः । मोष्वस्मांस्तमस्यन्तराधाः, मा-उ-सु माशब्दो निषेधार्थः, उशब्दश्चार्थे, सुशब्दः तमःशब्देन सम्बध्यते । मा चास्मान्सुतमसि अन्धतमसे नरके आधाः क्षैप्सीः अन्तर्मध्ये । मा रुद्रियासो अभिकुर्वतो नः, रुद्रियासो रुद्रसम्बन्धिन्यः क्रूराः शक्तयो नोऽस्माकमभिकुर्वतोऽस्मदाभिमुख्येन स्वकार्याणि मा कार्षुः, अक्रूरभावोऽस्तु ॥

मा नः क्रतुभिरीळतेऽभिद्विषो अस्मान्सुनीते मापराधाः । मा नो अग्निं निर्ऋतिमरातिं मा नो द्यावापृथिवी हेळते हेळयेथाम् ॥

रुद्रः प्रार्थ्यते। नोऽस्मान्येऽभिद्विषोऽभिमुखाः शत्रवस्ते क्रतुभिर्मा ईळते क्रतुकरणे प्रवृत्ताः सन्तः स्तुतिं मा कार्षुः, यथा प्रहृष्टो रुद्रस्तच्छत्रुत्वादस्मासु विरूपं कंचिदादधीतानिष्टमित्यर्थः । अस्मद्विषो याज्ञिका मा भूवन्नित्यर्थः । किं तर्हि । कुकर्माचरणेन स्वयं क्षीयन्तामित्यर्थः । अस्मान्सुनीते मापराधाः । हे सुनीते सुनीति-

रिति बहुव्रीहिः, हे शोभननययुक्तेऽस्मान् मापराधा अपराधयोगिनो मा कृथा इत्यर्थः । मा नो अग्निमित्यादि द्वितीया प्रथमार्थे, नोऽस्मानग्निर्मा हेळते 'हेडृ अनादरे' अनादरं कोपमस्मासु मा कार्षीत् । एवं निर्ऋतिररातिर्मा हेळते इति योज्यम् । एवं द्यावापृथिव्यौ मा हेळयेथामिति समन्वयः कार्यः ॥

अनु नो मित्रावरुणा इहावतामनुदीध्याना अभि नः सखायौ । आदित्यानां प्रसृतिर्हेतिरुग्रा शिवा पाष्टा हविषः परिणो वृणक्तु ॥

मित्रमहः सर्वप्राण्युपकारित्वात्, वरुणो रात्रिकालः वरणात् तमसावरणात् । इह व्रतसमाप्तिकर्मणि मित्रावरुणावन्ववतां रक्षतां नोऽस्माकम् । कीदृशौ । अनुदीध्यानौ दीप्यमानौ तेजसाभिमुखौ, अस्माकञ्च सखायौ । तथा आदित्यानां सम्बन्धी प्रसृतिः प्रसारः करनिकरो नोऽस्माकं हविषः परिवृणक्तु हविष्यान्नादि वर्जयतु अतिदीप्तत्वात्सस्यप्रभृतीन्मा धाक्षीदित्यर्थः । यतोऽसौ हेतिः, हरति बलं तीव्रतयेति हेतिः, शिवा शान्ता भूयात्, यतः सा पाष्टा प्रष्ठा प्रधानभूता । 'प्रष्ठोऽग्रगा-

मिनि' (८।३।९२) इत्यनुशासनात्, अतः उग्रापि सती प्रार्थनावशाच्छान्ता स्यादित्यर्थः ॥

विधुं दद्राणं समने बहूनां युवानं सन्तं पलितो जगार ।
देवस्य पश्य काव्यं महित्वा द्यां ममार सह्यः समानः ॥

रुद्र एवादित्यरूपेण स्तूयते । तस्मादाभ्यां जुहुम इति शेषः। देवस्य द्योतनादादित्यस्य पश्य काव्यं क्रान्तिकर्म महित्वा महत्, यदेतदीयेन विक्रमेण सह्यः सहनार्हः सहभावो वा समानश्च ओजोरूपेण चन्द्रमाः द्यां दिवि ममार प्राणत्यागं कृतवानमावस्यायाम्। तथा ह्ययमादित्यः पलितो वृद्धः परितो वा सर्वतः युवानमपि कलापरिपूर्णं समर्थं जगार भक्षितवान् चन्द्रं विधुं विधावनक्रियायुक्तं अतएव दद्राणं गच्छन्तं सततगतिम्। समने बहूनां, आदित्यरश्मीनां स्वकलानां संगमे सति पौर्णमास्याम्। युवानमपीत्यन्वयः ॥

ॐ भूः स्वाहा । ॐ भुवः स्वाहा । ॐ स्वः स्वाहा । ॐ भूर्भुवः स्वः स्वाहा ॥

उदु त्यं जातवेदसं देवं वहन्ति केतवः ।
दृशे विश्वाय सूर्यम् ॥

व्याख्यातेयम् ।

उद्वयन्तमसस्परि ज्योतिष्पश्यन्त उत्तरम् ।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥

इयमपि व्याख्याता ।

उदु तिष्ठ स्वध्वरावा नो देव्या कृपा दृशे च भासा ।
बृहता सुशुक्कभिरग्ने याहि सुशस्तिभिः ॥

हे स्वध्वर शोभनाध्वर प्रवर्ग्यव्रत उदु तिष्ठ, उत्-उ-तिष्ठ, उशब्दः पादपूरणार्थः, उत्तिष्ठ, नोऽस्मान् अव रक्ष देव्या देवसम्बन्धिन्या कृपा सामर्थ्येन, बृहता महत्या भासा दीप्त्या, दृशे दर्शनाय । हे अग्ने त्वमपि याहि गच्छ सुशुक्कभिः शोभनाभिः शौर्यादिभिर्ज्वालाभिः, सुशस्तिभिः शोभनप्रशंसायुक्ताभिः शुभसूचिकाभिरुपलक्षित इत्यर्थः ॥

ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता ।
ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिः विह्वयामहे ॥

हे अग्ने त्वां वयं विह्वयामहे विविधमाह्वयामः । कैः । अञ्जिभिरभिव्यक्तैर्वाक्यैः । कीदृशैः वाघद्भिः वोढृतमैः संशोधनादिसमर्थैरित्यर्थः । यदिति यस्मादर्थे । यत ऊर्ध्वस्तिष्ठ ऊर्ध्वो भव । ऊ इति निपातोऽनर्थकः । सुशब्द

उपसर्गः ऊतये इत्यनेन संबध्यते। किमर्थ-मूर्ध्वो भव। सूतये शोभनावनाय नोऽस्माकम्। देवो न सविता, नशब्द उपमायां, देव इव सविता त्वमूर्ध्वो वाजस्य अन्नस्य सनिता 'वन षण संभक्तौ' संविभक्ता॥

पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा। पुनर्नः पाह्यंहसः॥

हे अग्ने ऊर्जा आज्यलक्षणेन अन्नेनेष्टः सन्पुनर्निवर्तस्व, पुनरपि इषा ओदनलक्षणेन अन्नेनेष्टः सन्निवर्तस्व आयुषा युक्तः सन् हविषा वृद्ध इत्यर्थः, पुनरपि च नोऽस्मान् पाहि रक्ष अंहसः पापात्॥

सह रय्या निवर्तस्व अग्ने पिन्वस्व धारया।
विश्वप्स्न्या विश्वतस्परि॥

हे अग्ने निवर्तस्व समाप्तेष्वपि व्रतेषु मा गाः रय्या धनेन सह, किंच पिन्वस्व अस्मान् प्रीणीहि। कया। धारया धारयित्र्या शक्त्या। कीदृश्या। विश्वप्स्न्या सर्वस्योत्पत्तौ स्फीतया विश्वतस्परि सर्वस्योपरि स्थितया॥

धाता दधातु नो रयिमीशानो जगतस्पतिः स नः पूर्णेन वावनत्॥

धाता प्रजानामुत राय ईशिषे धातेदं विश्वं भुवनं जजान ।
सं दाशुषे किरति भूरिवांसं वयं स्याम पतयो रयीणाम् ॥

अग्न आयूंषि० । अग्ने पवस्व० । त्वं नो अग्ने० । स त्वं नो अग्ने० ॥ वायुरग्रे गा० ।

एते सप्त मन्त्राः व्याख्याताः ॥

प्र याभिर्यासि दाश्वांसमच्छा नियुद्भिर्वायविष्टये दुरोणे ।
नि नो रयिं सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः ॥

हे वायो याभिर्नियुद्भिरश्वैस्त्वं प्रयासि गच्छसि दाश्वांसं हविषो दातारं यजमानम् । किमर्थम् । इष्टये यजनाय, अच्छेति निपातोऽभिशब्दस्यार्थे वर्तते, अभिप्रयासि । त्वं ताभिर्नियुद्भिर्दुरोणे गृहे नोऽस्मान्नियुवस्व 'यु मिश्रणे' नियोजय, रयिं धनं सुभोजसं शोभनान्नं च नो गृहे नियुवस्व, वीरं च पुत्रं नियुवस्व । कीदृशम् । गव्यं गोषु साधुं, तथाश्व्यं राधश्च धनमश्व्यम् । पुनर्वचनमतिशयार्थम् । अभ्यासे हि भूयांसमर्थं मन्यन्ते यथाहो रमणीयाहो रमणीयेति ॥

हिरण्यगर्भः० ॥ यः प्राणतः० ॥ य ओजोदा० ॥ येन द्यौरुग्रा० ॥ य इमे द्यावा० ॥ यस्य मे विश्व० ॥

एताः षड् व्याख्याताः ॥

यं क्रन्दसी अपसा तस्तभाने अभ्यैक्षेतां मनसारेजमाने ।
यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम ॥

यं क्रन्दसीत्यस्याः अयमर्थः

द्यावापृथिव्यभिधाना प्रसिद्धेयं याज्ञिकानाम् । यत्र सूर आदित्योऽभ्युदितो विभाति, तस्मै कस्मै प्रजापतये सर्वात्मने हविषा विधेम हविर्दध्मः हविषोपचरामस्तमित्यर्थः । यं यत्र क्रन्दसी क्रन्दनयुक्ते घनस्तनितवेदाध्ययनशब्दवत्यौ द्यावापृथिव्यावपसा पापविहीनेऽभ्यैक्षेताम् यदधिष्ठाने सत्यौ कार्याणि निरूपयतः मनसा मननेन तस्तभानेऽवष्टम्भनयुक्ते अरेजमाने चाकम्पमाने च स्थावररूपे इति यावत् । यत्र सर्वं प्रतिष्ठितं, तस्मै प्रजापतये हविराज्यलक्षणं जुहुम इति तात्पर्यम् ॥

अत ऊर्ध्वं प्रवर्ग्यव्रते शान्तिविमोकः सिद्धः। स इहापि कर्तव्यः । तं व्याख्यास्यामः

आयुर्दा आयुर्मे देहि प्राणदाः प्राणं मे देहि व्यानदा व्यानं मे देहि अपानदा अपानं मे देहि चक्षुर्दाश्चक्षुर्मे देहि श्रोत्रदाः श्रोत्रं मे देहि वर्चोदा वर्चो मे देहि आयुषे नः पुनर्देहि ॥

एतानि सप्त यजूंषि। सप्तानामपिच 'आयुषे नः पुनर्देहि' इति साधारणोऽनुषङ्गः ॥

प्रवर्ग्यव्रतं, सर्वकर्मको वा प्रजापतिरुच्यते। हे प्रवर्ग्यव्रत प्रजापते वा, आयुषो दाता त्वं, अत आयुर्मे मह्यं देहि । आयुषे नः पुनर्देहि, आयुष इति तादर्थ्यचतुर्थ्यन्तेन आयुर्लक्षणजीवननिमित्तानि नित्यकर्माण्युपलक्ष्यन्ते, नित्यनैमित्तिककर्मानुष्ठानार्थं पुनरायुर्मह्यं देहीत्यर्थः । एषां षण्णामपि यजुषां तुल्या दिक् ॥

नमो रुद्राय दिविषदे यस्य वर्षमिषवस्तस्मै नमस्ते नमः समरे स मा मा हिंसीः ॥

आदित्योऽत्र रुद्रः। आदित्याय नमः। दिवि सीदतीति दिविषत् तस्मै । यस्य वर्षमिषवः, वृष्टिर्वर्षं धारासारो यस्य शरास्तस्मै पुनःपुनर्नमस्कारोऽस्तु । तेन च नमस्कारेण प्रसादितः संस्त्वं रुद्रो मा मा हिंसीः मां मा वधीः । द्वितीयस्य मा इत्यस्य युष्मदादेशस्य प्रयोगोऽस्मदीयोपलक्षणार्थः, अस्मदीयांश्च पुत्रप्रभृतीन् मा हिंसीरित्यर्थः । समरे संग्रामे ॥

नमो रुद्रायान्तरिक्षसदे यस्य वात इषवस्तस्मै० ॥
नमो रुद्राय पृथिवीषदे यस्यान्नमिषवस्तस्मै० ॥

समानं पूर्वेण ॥

'ब्रह्मण उपस्तरणमसि' इत्यनुवाकं जपन्ति । ते जपन्तो 'मित्रस्य चर्षणी धृत' इति मैत्र्या प्रथमयादित्यमवेक्षन्ते अब्लिङ्गाभिश्चाप उपस्पृशन्ति ।

ब्रह्मण उपस्तरणमसि ब्रह्मणे त्वोपस्तृणामीळायै वास्त्वसि वास्तुमद्वास्तुमान्भूया वास्तुः स भूयाद्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥

हे उदक असि त्वं ब्रह्मण उपस्तरणं, ब्रह्मा त्वामुपस्तीर्य बीजभूतमुप्त्वा लोकान् सृजति । यथोक्तम्

"अप एव ससर्जादौ तासु वीर्यमथाक्षिपत् ।"

इति वीर्यं शक्तिरुदकस्यैव तु सर्वकार्यनिमित्तत्वम् । ब्रह्मणे त्वोपस्तृणामि, ब्रह्मपदप्राप्तये त्वामहमुपस्पृशामि । इळायै च त्वामुपस्पृशामि, इळा अन्नं तच्च ब्रह्मपदार्थिनाप्यभ्यर्थनीयं तद्धेतुकनित्यकर्मादिसाध्यत्वादऽपवर्गस्य । वास्त्वसि गृहमसि सर्वाश्रयत्वात्, वास्तुमत् ब्रह्मा हि तव गृहमाश्रयभूतं वर्तते ।

वास्तुमान् भूयाः पुरुषव्यत्ययोऽत्र । त्वत्प्रसादादहं वास्तुमान् भूयासम् गृहवान्स्यां ब्रह्मभूयं प्राप्नुयामित्यर्थः । अवास्तुः स भूयाद्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः, सोऽप्रतिष्ठो भूयात् ॥

प्रतिष्ठासि प्रतिष्ठा मे भूयादप्रतिष्ठः स भूयाद्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥

प्रतिष्ठन्ते यत्र लोकाः स प्रतिष्ठा असि भवसि उदक त्वमतो मम प्रतिष्ठा भूयात् । यस्तु अस्मान् द्वेष्टि यं च वयं द्विष्मः सोऽप्रतिष्ठो भूयात् ॥

आ वात वाहि भेषजं वि वात वाहि यद्रपः ।
त्वं हि विश्वस्य भेषजो देवानां दूत ईयसे ॥

हे वात भेषजं सत्कर्मफलं ब्रह्मप्राप्तिलक्षणमावाहि प्रापय, यद्रपः पापमविद्यालक्षणं तद्विवाहि अपसारय । यतस्त्वं सर्वस्य भेषजः औषधं संसारव्याधिबाधकत्वात्, तथा देवानां दूतश्च ईयसे सञ्चरसि कर्मानुष्ठानरूपैः फलैर्योजयसि । यत एवंभूतस्त्वं तस्मादुच्यसे ॥

यतदो वात ते गृहे निहितस्य निधिहितः ।
ततो नो धेहि जीवसे ततो नो अभयं कृधि ॥

हे वात तव निधिहितो निधिमतो गृहे निहितस्य सर्वकर्मफलस्य यतः संभवः, तेनातः कर्मणो यद्भागधेयं, तन्नस्ततो निधेहि । यतद् इति दकारस्य तकारश्छान्दसः । केचित्तु यदत इति पठन्ति । शताध्ययनस्याध्येतारः निधिर्हि स इत्यपि पठन्ति । स तव गृहे त्वनाश्रयत्वेन व्यवस्थितः प्रजापतिः सर्वफलविधानभूत इति तत्रार्थः। किमर्थं देहि भागधेयम् । जीवसे जीवनाय चिरतरोपभोग्यस्वर्गादिफलोपभोगायेत्यर्थः। ततो नोऽभयं कृधि, यदस्माभिः कर्म क्रियते ततोऽस्माकमभयं कृधि संसारतमोऽविद्यास्मितारागद्वेषाभिनिवेशलक्षणक्लेशभयनिवारणं कुर्वित्यर्थः । एवमपि व्याचक्षते–हे वात तव यततो यतमानस्य गृहे यद्व्यवस्थितं फलं ततो निधेहि किंचिज्जीवनाय अभयाय इति ॥

द्युभिरक्तुभिः परिपातमस्मानरिष्टेभिरश्विना सौभगेभिः । तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

हे अश्विनौ अस्मान् परिपातं समन्ताद्रक्षतम् । कैः । द्युभिर्दिवसैः । कीदृशैः । अक्तुभि-

रभिव्यक्तैः निरभ्रैरत एव सुभगैः, रिष्टं हिंसकं तद्रहितैररिष्टैः । यच्च किञ्चन वयं कुर्मस्तन्मामहन्तामतिशयेन पूजयन्तु । के ते । मित्रो वरुणोऽदितिः सिन्धुर्नदीसमुद्रलक्षणः पृथिवी उत द्यौः ॥

पृथिवी शान्तिरन्तरिक्षं शान्तिर्द्यौः शान्तिर्दिशः शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिस्त्वयाहं शान्त्या सर्वशान्त्या मह्यं द्विपदे चतुष्पदे शान्तिं करोमि शान्तिर्नो अस्तु शान्तिरसि शान्तिः शान्तिः शान्तिः ॥

पृथिवी नोऽस्माकं शान्तिः 'अस्तु' इति सर्वत्राऽनुषङ्गः । अस्त्वित्यस्य चानुषक्तस्य बहुवचनान्तेषु वनस्पतिप्रभृतिषु विपरिणामः ।

हे उदक त्वया शान्त्यात्मकेन सर्वशान्त्यात्मकेनाहं 'शान्तियुक्तो भूयासम्' इति शेषः । अतोऽहं मह्यं स्वार्थं द्विपदे पुत्राद्यर्थं, चतुष्पदे गवाद्यर्थं शान्तिं करोमि । यतोऽसि त्वं शान्तिरतः शान्तिर्नो अस्तु, अविद्यादिक्लेशाः शाम्यन्तु नः इत्यर्थः । मुमुक्षुं प्रति शान्तिः शान्तिः शान्तिरिति अभ्यासोऽतिशयार्थः संसारक्लेशैकमयत्वप्रदर्शनार्थः ॥

या वागुदिता या चानुदिता शिवा नः शंतमा भव सुमृळीका सरस्वति मा ते व्योम संदृशि ॥

हे वाक् सरस्वति या त्वमुदितोच्चारिता वैखरीरूपा, या च अनुदिता अन्तःसंजल्पादिरूपा मध्यमा पश्यन्ती सूक्ष्मा च, सा नोऽस्माकं शिवा क्षेमकारिणी भव शंतमा सुखतमा, सुमृळीका शोभनसुखा। अभ्यासोऽतिशयार्थः। मा ते व्योम संदृशि, व्योम च्छिद्रं ते तव व्योम च्छेदं मा द्राक्षं त्वद्विहीनः कदाचिदपि मा भूवमित्यर्थः, अविच्छिन्नस्थितिं च त्वां दिव्येन चक्षुषा जानीयामित्यर्थः ॥

मित्रस्य त्वा चक्षुषा प्रेक्षे मित्रस्य त्वा चक्षुषान्वीक्षे।
सूर्यस्य त्वा चक्षुषा प्रेक्षे सूर्यस्य त्वा चक्षुषाभिवीक्षे ॥

हे वाक् त्वामहं मित्रस्य चक्षुषा प्रेक्षे, मित्रस्य चक्षुषान्वीक्षे मित्रदृष्ट्या अनुपश्यामीत्यर्थः। एवं सूर्यस्येति व्याख्येयम्। अभिशब्द आभिमुख्येऽत्र ॥

'मित्रस्य चर्षणीधृत' इति मैत्रीं जपन्नादित्यमीक्षते।

मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसि।
द्युम्नं चित्रश्रवस्तमम् ॥

मित्रस्य सर्वप्रीतिकारिण आदित्यस्य श्रवो धनं रश्मिलक्षणं अन्नादिहेतुत्वात् 'अहं वीक्षे' इति शेषः। कीदृशस्य मित्रस्य। चर्षणीधृतः चर्षणयो मनुष्यास्तेषां धारकस्य, देवस्य द्योतनादिधर्मकस्य। कीदृशं श्रवः। सानसि स्नेहकारि, उणादिषु स्नेहार्थ एव सानसिशब्दो निपातितः। द्युम्नं द्योतमानं यशोयुक्तमन्नयुक्तं वा। तथा च 'द्युम्नं द्योततेर्यशो वान्नं वा' इति निरुक्तकारः। चित्रश्रवस्तमं आश्चर्यभूततमधनमित्यर्थः॥

मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसि।
सत्यं चित्रश्रवस्तमम्॥

आत्मनैवैतां पठति। अत्र सत्यमेतावन्मात्रं विशेषः॥

'आपो हि ष्ठा' इत्यादयस्तिस्रः। ताश्च संमार्जने व्याख्याताः॥

आपः पृणीत भेषजं वरूथं तन्वो मम।
ज्योक् च सूर्यं दृशे॥

हे आपः मम भेषजं हितकारि कर्म वेदाध्ययनादिकं कर्म पृणीत पूरयत। वरूथं तन्वो मम, मदीयायास्तनोः शरीरस्य यूयमेव वरूथं

गृहमाश्रयः। ज्योक् चिरकालं च त्वत्प्रसादा-
दहं सूर्यं दृशे पश्यन् भूयासम्॥

शं नो देवीरभीष्टय

इति व्याख्याता॥

शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा।
शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः॥

मित्रादयोऽस्माकं सुखरूपाः सुखकरा भवन्त्वित्यर्थः। विष्णुरुरुक्रमः त्रैलोक्यस्य क्रमणे विततक्रम इत्यर्थः॥

शं नो मित्रः शं वरुणः शं नो अस्त्वर्यमा।
शं न इन्द्रश्चाग्निश्च शं नो विष्णुरुरुक्रमः॥

अत्रास्त्विति विशेषो देवताविशेषश्च॥

त्यमूषु वाजिनं देवजूतं सहोवानं तरुतारं रथानाम्।
अरिष्टनेमिं पृतनाजमाशुं स्वस्तये तार्क्ष्यमिहाह्वयेम॥

त्यं तं तार्क्ष्यं गरुडमिह स्वसन्निधौ आह्वयेम आह्वयामः, ऊ इति निपातोऽनर्थकः। षु इति सुशब्दः, सुवाजिनं शोभनकम्पनं देवजूतं देवानां प्रीतिकारणमभिमतं, सहोवानं, सह इति बलनाम, बलवन्तं, रथानामपि तरुतारं तारयितारमरिष्टनेमिमहिंसितगतिं, पृतनाजं पृ-

तनानां परसेनानां जेतारं, आशुं शीघ्रगतिम् । किमर्थमाह्वयामः, स्वस्तयेऽविनाशाय ॥

'कया नश्चित्र' इति वामदेव्यस्तृचः शान्त्यर्थ एवोच्चार्यते ।

कया नश्चित्र आ भुवदूती सदावृधः सखा ।
कया शचिष्ठया वृता ॥

हे इन्द्र कया वृता वर्तनेन कर्मणा ऊतिरवनं संसारक्लेशनिवारणमाभुवत् आ समन्ताद्भवति । चित्रः, चित्रा आश्चर्यभूता परपुरुषार्थरूपेत्यर्थः । सदावृधः सर्वकालाश्च समृद्धयः कया वृता भवन्ति । सखा, एतदूतेर्विशेषणम् । शचिष्ठयेति वृतेत्यस्य विशेषणं शक्ततमयेत्यर्थः ॥

कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदंहसः ।
दृढा चिदारुजे वसु ॥

हे इन्द्र त्वा त्वां, 'मुक्त्वा' इत्यध्याहारः, त्वां वर्जयित्वा कः सत्यः सत्यसंकल्पः । मदानां मंहिष्ठः नित्यानन्दात्मकहर्षयोग्यतया हृष्टानां मध्ये मंहिष्ठोऽतिशयेन पूजनीयः । अतस्त्वां मुक्त्वा कः सत्यः, यो अंहसः मत्सदंहसः माद्यत्पापस्य संसारक्लेशकारिणः संबन्धि वसु ध-

नमनाद्यविद्यावासनात्मकं सामर्थ्यं आरुजे आरुजति विनाशयति, दृढा चित्, सुदृढया चिता चैतन्येन विद्यारूपेणेत्यर्थः ॥

अभी षु णः सखीनामविता जरितॄणां शतं भवास्यूतिभिः ॥

हे इन्द्र नोस्माकं सुसखीनां शोभनसमानख्यानानामविता, जरितॄणां स्तोतॄणामभ्यविता आभिमुख्येन रक्षिता भवासि भव ऊतिभिः, शतशब्दोऽतिबाहुल्यलक्षणार्थः, अतिबह्वीभिरूतिभिरवनक्रियाभिरविता भवेत्यर्थः । भवासीति लोडर्थे लेट् ॥

य उद्गात्पुरस्तान्महतोऽर्णवाद्विभ्राजमानः सरिरस्य मध्ये ।
स मा वृषभो रोहिताक्षः सूर्यो विपश्चिन्मनसा पुनातु ॥

स सूर्यो विपश्चिद्विद्यामयो मनसा मननेनाऽनुध्यानेन मां पुनातु पावयतु, यः पुरस्तात्पूर्वस्यां दिशि उद्गादुदितः महतोऽर्णवात्समुद्रात् । विशेषेण भ्राजमानो दीप्यमानः सरिरस्य सरणमार्गस्याऽन्तरिक्षस्य मध्ये । वृषभः कामानां वर्षयिता, वृषभो वा सर्वज्योतिषामुत्कृष्टः। रोहिताक्षः लोहितलोचनः कनकनयनः॥

यद्ब्रह्मावादिष्म तन्मा मा हासीत्सूर्याय विभ्राजाय वै नमो नमः ॥

यद्ब्रह्म वेदमवादिष्म पठितवन्तो वयं तन्मा मा हासीन्मात्याक्षीत्। सूर्याय विशेषेण भ्राजमानाय पुनः पुनः नमस्कारोऽस्तु ॥ शान्तिविमोकः ॥

आपमापमपः सर्वा अस्मादस्मादितोऽमुतः ।
अग्निर्वायुश्च सूर्यश्च सह सञ्चस्करर्धिया ॥

औपनिषदाः परमरहस्यमन्त्रा अमी परमाः पावनाः संसारघोरसागरसन्तरणोपायाः प्रायः सर्वत्र समर्थाः, प्रवर्ग्यव्रतेऽपि शान्तिप्रस्तावोपयोगिन आपमापमित्यादय इतीहावश्यं विवरणीयाः। अपः पात्रे निधायोपस्तौति—सर्वा अप अहमापमापं प्राप्तवान् । अभ्यासोऽतिशयार्थः। अस्मादस्मादितोऽमुतः, अस्मादिति प्रत्यक्षनद्यादिजलाशयनिर्देशः, अमुत इति परोक्षाधाराभिधानम्। अभ्यासः साकल्यार्थः। एता अपः सर्वा अग्निवायुसूर्याः सञ्चस्करुः संस्तम्भवन्तः। धिया प्रज्ञया ॥

वाय्वऽश्वा रश्मिपतयो मरीच्यात्मानो अद्रुहः ।
देवीर्भुवनसूवरीः पुत्रवत्त्वा इमेऽसुवः ॥

वायुवदश्वा व्यापकाः । के । रश्मिपतयः

रश्मयश्च ते पतयः पालकाः अपां, रश्मय एव ह्यब्गर्भाः सन्तो मेघा भवन्ति । अतश्च मरीच्यात्मानः, आपो मरीच्यन्तर्वर्तित्वेन स्थिता इत्यर्थः । अद्रुहः सूक्ष्मरूपेण मरीचिमध्यगता अपि द्रोहशून्या अनुपहिंसिका इत्यर्थः । देवीः देव्य आपः । भुवनस्य भुवनानां सूवरीः सूवर्यः प्रसवशीलाः । इमे इमान् लोकान् असुवः सूतवत्यः । पुत्रवत्त्वै पुत्राणां जीवात्मनामवत्त्वै अवनाय संसारक्लेशशान्तये ॥

महानाम्नीर्महामाना महायामा महासोमासः ।
देवीः पर्जन्यसूवरीः पुत्रवत्त्वा इमं सुव ॥

महानाम्नीभिर्ऋग्भिरुदकमुच्यते । ऋचश्च महानाम्न्यः तदभिधानादापस्तथा, महद्यतो नाम आसामपामिति, महाप्रभावा इत्यर्थः । अत एव च महामाना, बृहत्या पूजया युक्ताः । महायामा महापरिमाणाः । तथा महासोमासः, ताभिरेव ह्यभिषुतः सोमो यागयोग्यो भवति । एवंभूताश्च पर्जन्यसूवरीः पर्जन्यस्य मेघस्य सवित्र्यः । पुत्रवत्त्वा इमं सुव, इमं ब्रह्मचारिणं पुत्रवत्त्वाय सुव पुत्रजननयोग्यं संपादय ॥

अपाश्चुष्टिमपारक्षमपाश्नुष्टिमपारसम् ।
अपाघमनुजावर्ति मम देवीर्ऋते हिताः ॥

अप इति षष्ठीबहुवचनस्य सुपां सुलित्यादेशः । श्नुष्टिरेकदेशः । स्पृशामीत्यध्याहारः । अपामेकदेशं स्पृशामीत्यर्थः । उद्धृत्य हि जलैकदेशोऽत्राभिमन्त्र्यत इत्युक्तम् । एवमपां रक्षकमंशमुद्धृतं स्पृशामि, अपां रसं सारम् । अपाघमनुजावर्ति, अपामघं पापं स्पृशाम्यपसारयामि । सद्भावेऽप्सु पापस्य प्रमाणमाह—अनुजावर्ति, अपामनुजा जीवात्मानस्तज्जन्यत्वात्, तेष्वावर्तमानमघमशुचित्वं कारणेऽप्यनुवृत्तिं गमयति, घटादिगतमिव गन्धादि मृत्पिण्डादिके । अतो वर्तमानं अघं आसामुद्धृत्य मन्त्रैः पावनं शान्त्यादौ । मम देवीर्ऋते हिताः, मम ऋते हिता मम ऋते यज्ञे सत्ये च हिताः । अथवा मम देव्यो हिता आपः, यथा ऋतो यज्ञो हितो मम, ऋतः सत्यशब्दो वा ॥

वज्रं देवीरुदिताः स्थ वरुणं देवस्वरीः ।
आदित्यानुदितं देवीर्योनिनोर्ध्वमुदीषत ॥

यूयं पापनिवारणाय वज्रमिवोदिताः स्थ

भवथ । यतो वरुणस्य दोषनिवारकस्य देवस्य सूवर्यो यूयम् । आदित्यानुदितं कर्म व्रतादिकं काम्यं च, तस्य कर्तारं हे देव्य ऊर्ध्वमुदीषत सर्वोत्कृष्टं संपादयतेत्यर्थः योनिना स्वजन्मनिमित्तेन परब्रह्मशक्त्येत्यर्थः ॥

एवमादयो मन्त्रा बहुशक्तयः शान्तिविमोकेऽप्युपयोगिनः ॥

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षिभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥

एवमादयो जपमन्त्राः शान्त्युपयोगिनः । हे देवा वयं कर्णैर्भद्रं भन्दनीयं कल्याणं शृणुयामः ब्रह्मप्राप्तिपर्यवसायि वेदान्तादिकम् । हे यजत्राः यष्टॄणां त्रातारोऽक्षिभिर्नेत्रैर्भद्रं पश्येम । तथा स्थिरैरविनाशिभिरङ्गैः करचरणादिभिरुपलक्षिताः सन्तस्तुष्टुवांसस्तुवन्तो देवहितं देवेषु निहितं यदायुः, तत् व्यशेम विशेषेणाश्नुवाम तनूभिः शरीरैः ॥

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

इन्द्रो वृद्धश्रवाः वृद्धधनः बहुधनो नोऽस्म-

भ्यं स्वस्ति अविनाशं दधातु ददातु धारयतु वा । एवं पूषा आदित्यो विश्ववेदाः सर्वज्ञः स्वस्ति नो ददातु । तार्क्ष्यो गरुत्मानरिष्टनेमिः, 'रिष्टिर्हिंसाकर्मा', अरिष्टोऽनुपहिंसितः नेमिरास्पदं स्थानं यस्य सः, अनुपहिंसितास्पदः । प्रान्तो वा नेमिरहिंसितमर्यादः केनाप्यनुल्लङ्घित इत्यर्थः । बृहस्पतिर्देवगुरुश्चास्मभ्यं स्वस्ति दधातु धारयतु वा ॥

केतवोऽरुणाः सश्वर्षणयो वातरशनाः प्रतिष्ठां शतधाय समाहिता अथो सहस्रधायसम् ॥

केतुसंज्ञका अरुणवर्णा ज्ञातारो वातमेखला शतधाय समाहिता समाश्रिताः प्रतिष्ठां समाधिस्थैर्यादिकं शरीरगतेष्वनुभूय ततो मोक्षं गता इत्यर्थः । शतधायेति यकारोऽनर्थकः । अथो सहस्रधायसं, सहस्रधा इत्यर्थः, चिरतरलभ्यो मोक्ष इत्यर्थः । तथा च स्मृतिः

'महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ।'

इति ॥

शिवा नः शंतमा भवाथ दिव्या आप ओषधयो वनस्पतयः ॥

नोऽस्माकं शिवाः क्षेमकारिण्यः शंतमाश्च सुखतमा यूयं भवथ ॥

सुमृळीका सरस्वति मा ते व्योम संदृशि ॥

अनेन भूमिमालभते। हे सरस्वति उदकवति सुमृळीका सुसुखदा भव, मा ते तव व्योम विच्छेदविप्लवं दस्युप्रभृतिकृतं द्राक्षम् ॥

इत्यरुणमन्त्रविवृतिः ॥

---

नैष्ठिकब्रह्मचारिणो व्रतमुक्तमधुना मन्त्रार्थो विव्रियते। तत्र शताध्ययन उपनिषत्त्वेन प्रसिद्धेष्वनुवाकेषु पञ्चदशसु प्रथमैकादशद्वादशानामिहोपयोगोऽस्ति। प्रथमस्य विघ्नशान्तौ, एकादशस्य शिष्यानुशासने, द्वादशस्यापि शान्तौ। तत्र प्रथमद्वादशौ तावत्

शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा।
शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः ॥

नमो ब्रह्मणे नमो वायवे नमस्ते वायो त्वमेव प्रत्यक्षं ब्रह्मासि त्वामेव प्रत्यक्षं ब्रह्म वदिष्याम्यृतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवत्ववतु मामवतु वक्तारं शान्तिः शान्तिः शान्तिः ॥

मित्रादयोऽत्राध्यात्मिक्यो देवताः। तथा च श्रुतिः

'प्राणो वै मित्रोऽपानो वरुणः'

इति । परमात्मविवर्तास्तत्परिणामा वा जगत्सूत्रप्राणप्रभृतयस्तदधिष्ठात्र्यो देवता मित्रादयः । एवं चक्षुषोऽधिष्ठाता देवताविशेषः अर्यमा । अरीन् स्वाध्यायादिविरोधिनः नियच्छति यः सोऽर्यमा । नोऽस्माकं मित्रः शं सुखं भवतु सुखमस्माकं भावयत्वित्यर्थः । एवं वरुणादिष्वपि योज्यम् । विष्णुर्व्यापकोऽन्तर्यामी उरुक्रमो बृहत्क्रमः । नमो ब्रह्मणे, परमात्मने नमस्कारोऽस्तु । एवं वायवे वायुरूपाय जगत्सूत्रभूताय नमस्कारोऽस्तु । हे वायो नमस्तेऽस्तु । परोक्षेण स्तुत्वा प्रत्यक्षेण स्तौति—हे वायो त्वमेव प्रत्यक्षं ब्रह्मासि भवसि, नाभेरुत्थितस्त्वमेव वेदरूपेण प्रत्यक्षेण विवर्तसे विपरिणमसे वेत्यर्थः । अतस्त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि यतस्त्वमेव प्रत्यक्षं ब्रह्म । त्वामेव ऋतं वदिष्यामि सत्यं च ।

इह समुच्चीयमाने मोक्षोपायभूते ज्ञानकर्मणी ऋतशब्देनोक्ते, तदितिकर्तव्यता तु सत्यशब्देन । अथवा ऋतसत्यशब्दयोरेकार्थ-

त्वात्पुनर्वचनमतिशयार्थम् । तद्दतं च सत्यं च मामवतु, वक्तारमवतु । पुनर्वचनं पूर्ववत् । अथवा मामवतु वक्तारं, प्रवक्तारं चोपाध्यायम् । शान्तिः शान्तिः शान्तिरित्यस्तु विघ्नानामिति शेषः । त्रिर्वचनं संसारस्य विघ्नभूयस्त्वादतिशयार्थम् । एष प्रथमोऽनुवाकः ॥

शं नो मित्रः शं वरुणः शं नो अस्त्वर्यमा शं न इन्द्रश्चाग्निश्च शं नो विष्णुरुरुक्रमः ॥ नमो ब्रह्मणे नमो वायवे नमस्ते वायो त्वमेव प्रत्यक्षं ब्रह्मासि त्वामेव प्रत्यक्षं ब्रह्मावादिषमृतमवादिषं सत्यमवादिषं तन्मामावीत्तद्वक्तारमावीदावीन्मामावीद्वक्तारं शान्तिः शान्तिः शान्तिः ॥

अत्र प्रथमाद्देवतामात्रं विशिष्यतेऽतीतकालता च ॥

सह ना अवतु सह नौ भुनक्तु सह वीर्यं करवावहै । तेजस्विना अधीतमस्तु मा विद्विषावहै शान्तिः शान्तिः शान्तिः ॥

इदं शिष्योपाध्यायौ सह ब्रूतः, अन्यत्र तु दम्पती अपि । मित्रादिदेवतागणो नौ आवां शिष्योपाध्यायौ कर्मभूताववतु रक्षतु सह स्थितौ, तथा भुनक्तु पालयतु भोजयतु वा नित्यानन्दरूपमपवर्गफलम् । सहैव च स्थितौ वीर्यं वेदाभ्याससमुद्भूतमतिनैर्मल्यलक्षणं क-

रवावहै कुर्वहे । तेजस्विनौ अभिभवितुं केनाप्यशक्यौ । यद्धीतं, तदावयोरस्तु स्थिरम् । मा विद्विषावहै, आवयोरन्योन्यं विद्वेषो मा भूत् । शान्तिरिति व्याख्यातम् । एवमावापस्थाने शान्तिं कृत्वा, शिष्यं मेधावित्वमनिराकरिष्णुत्वं च कामयमानमाचार्यो वाचयेदृग्द्वयम् ॥

यच्छन्दसामृषभो विश्ववेदाश्छन्दोभ्योऽध्यमृतात्संबभूव ।
स मामिन्द्रो मेधया स्पृणोत्वमृतस्य वेदधारणो भूयासम् ॥
शरीरं मे विचक्षणं वाङ्मे मधुमद्दुहे । कर्णाभ्यां भूरि सुश्रवं ब्रह्मणः कोशोसि मेधया पिहितः श्रुतं मे गोपाय ॥

मन्त्रवर्णाज्जपमात्रादेव मेधादिफलं धारणशक्तिरनिराकरिष्णुता तां च प्राप्नोति । यः छन्दसां वेदानां ऋषभो वर्षिता कामानां प्रधानभूतो वा ओँकारः विश्ववेदाः सर्वज्ञः सर्वधनो वा, छन्दोभ्यो वेदान्तेभ्योऽमृतरूपोऽधिबभूव । अविद्यावशेन द्वैतापन्नो वेदान्तार्थानुष्ठानेन सर्ववेदार्थानुष्ठानेन वा ज्ञानकर्मसमुच्चयेनाधिकामृतरूपो नित्यानन्दाद्वैतरूपो भवतीत्यर्थः । स इन्द्रः प्रजापतिः मा मां मेधया

स्पृणोतु प्रीणातु। अमृतस्यामृतत्वाय मोक्षायाहं वेदधारणशक्तियुक्तः स्याम्। अनिराकरिष्णुताप्यत्रोक्ता। तथा मम शरीरं विचक्षणं मोक्षोपायानुष्ठानचतुरं भूयात्। वाक् च वेदयुक्ता मधुमत् मधुररसयुक्तं कर्मफलं दुहे दोग्धु। कर्णाभ्यां भूरि बहु चिरं सुश्रवं शोभनं शृणुयां वेदान्तरूपम्। ब्रह्मणो वेदस्याहं कोशो वेदार्थज्ञानरत्ननिचयभाण्डागारं भूयासम्। भाण्डागारं च पिधानेन स्थगितं भवतीत्याह—मेधया प्रज्ञाजनितसंस्कारेण पिहित आच्छादितो रक्षितः दृढसंस्कारवशेन वेदार्थस्याविस्मरणात्। श्रुतं मे गोपाय, मम श्रुतं च रक्ष परप्रयोजनयुक्तं कुर्वित्यर्थः॥

श्रीकामः 'आवहन्ती वितन्वाना' इत्यादिभिर्जुहुयात्।

आवहन्ती वितन्वाना कुर्वाणा वरमात्मनः।
वासांसि मम गावश्चान्नपानेन वर्धय॥
अतो मे श्रियमावह लोमशां पशुभिः सह स्वाहा॥

ऋग्यजुषाभ्यामाभ्यां द्वे आहुती जुहुयात्। एकामित्येके, ऋग्यजुषान्त एकस्वाहाकारात्।

अन्याश्चाहुतयोऽत्र पूर्वव्याख्यातैः स्त्रीलिङ्गकैर्मन्त्रैर्होतव्याः । हे श्रीः मम वासांसि गाश्चाऽन्नपानेन सह वर्धय। किं कुर्वती। आवहन्ती प्रापयन्ती ढौकयन्ती । वितन्वाना विविधं विशेषेण वा विस्तारयन्ती। आत्मनश्च वरं कुर्वाणा वरणीयं वरमुत्कृष्टं मणिकनकादिकमात्मसम्बन्धितया कुर्वाणा ।अतो मे श्रियमावह, यस्मात्सम्यगधीतवेदोऽहमुपाध्यायावश्यदेयदक्षिणायोग्यतोपनतार्थिविशेषो वा, ततो हेतोर्लोमशां लोमशाजाविप्रभृतिभिर्विभूषितां पशुभिरश्वादिभिः सह । उपकुर्वाणकस्यैतदुक्तमित्याहुः ॥

यशस्काम 'आ मा यन्तु' इत्यष्टाभिर्जुहुयात् । यद्याचार्यो जुहोति, अथापि ब्रह्मचारी, उभयथा ब्रह्मचारिणः फलं तदुद्देशेन कर्मकरणात् ।

आ मा यन्तु ब्रह्मचारिणः स्वाहा । सं मा यन्तु ब्रह्मचारिणः स्वाहा । तपोयशोयशानि स्वाहा । जनोयशोयशानि स्वाहा । तं त्वा भग प्रविशामि स्वाहा । स मा भग प्रविश स्वाहा । श्रेयान्वसो यशोयशानि स्वाहा । अस्मिन्सहस्रशाखे विभजाहं त्वयि मृजे स्वाहा ॥

ये ब्रह्मचारिणो धर्माः सिद्धयश्च ते मा मां आयान्तु । प्रजापतिरेवमभ्यर्थ्यते । तदर्थं च

सुहुतमस्तु। एवं सम्यगायान्तु मां ये ब्रह्मचारिणः सम्बन्धिनो यमनियमादयः। तपोयशोयशानि स्वाहा, तपांस्येव यशःप्रकाराः तपोयशोयशानि तपोयशोयशांसि समायान्तु, 'प्रकारे गुणवचनस्य' (८।१।१२) इति द्विर्वचनम्। तदर्थं च सुहुतमस्तु। तपोलोके वा स्वर्गविशेषे ये यशःप्रकारास्ते समायान्त्वित्यर्थः। एवं जनोयशोयशानि स्वाहेति व्याख्येयम्। तं त्वा भगेति, हे भग भजनीय ब्रह्मन् त्वामहं प्रविशामि। स मा भगेति, स त्वं हे भग मां प्रविश। श्रेयान्वसो यशोयशानि स्वाहा, हे वसो वासयितः धनद त्वं श्रेयान् प्रशस्योऽतिशयेन, अतस्त्वत्प्रसादान्मां यशांसि प्रविशन्तु तदर्थं च सुहुतमस्तु। अस्मिन्सहस्रेति, अस्मिन्बहुशाखे यजुर्वेदे ब्रह्मविभवोपनिषत्पथे वा विभज विभागयोगिनं कुरु। अहं त्वयि विषयभूते हे ब्रह्मन् मृजे आत्मानं शोधयामि, विगतनिखिलमलं सम्पादयामि ब्रह्मणि क्षीणं, तदर्थं तु सुहुतमस्तु। आरण्यकव्रतपद्धतिपर्यवसाने त्विदं कार्यम्॥

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति इदं कर्तव्यमिदमकर्तव्यमित्यौपनिषदैकादशानुवाकेन । एकादशानुवाकस्तु–

सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमद । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छैत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । यत्नान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । यज्ञाद्देवपितृकार्येभ्यो न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि तानि त्वया कर्तव्यानि नो इतराणि । अथ यान्यस्माकं सुचरितानि तानि त्वया कर्तव्यानि नो इतराणि । अथ ये केचनास्मच्छ्रेयांसो ब्राह्मणा आगच्छेरन् तेषां त्वयासनेन प्रश्रयितव्यम् । श्रद्धया देयमश्रद्धया देयम् । संविदा देयमसंविदा देयम् । ह्रिया देयम् । भिया देयम् । वित्त्यै देयम् । अवित्त्यै देयम् । भूत्यै देयम् । अभूत्यै देयम् । अथ यदि ते कर्मविचिकित्सा वृत्तिविचिकित्सा वा स्याद्ये तत्र ब्राह्मणाः संमर्शिनो युक्ता आयुक्ता अलक्षा अलुब्धा धर्मकामा वा स्युर्यथा ते तत्र वर्तेरंस्तथा त्वं तेषु वर्तेथाः । अथाभ्याख्यातेषु ये तत्र ब्राह्मणाः संमर्शिनो युक्ता आयुक्ता अलक्षा अलुब्धा धर्मकामा वा स्युर्यथा ते तत्र वर्तेरंस्तथा त्वं तत्र वर्तेथाः । एष आदेश एष उपदेश एषा वेदोपनिषदेतदनुशासनमेतदुपास्यम् ॥

उपनिषत्संहितामधीत्यैवेदमुच्यते। आचार्य एकादशानुवाकाभिहितां नीतिमुपनिषदध्ययनान्ते ग्राहयति, अत एव "वेदाध्ययनानन्तरमेव धर्मजिज्ञासा कर्तव्या" इति जैमिनिमुनिना निगदितम् । यत एकादशानुवाकारम्भ एव 'वेदमनूच्य' इति श्रुतिरप्यस्ति मूलभूता। वेदसमुत्थ एव हि न्यायः प्रमाणम् । यत्रोच्यते

"आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः" ॥

इति । अवेदमूलस्तु मानुषमतिमात्रकल्पितः कुतर्कौ धर्माधर्मौ प्रति न प्रमाणं, यथा सौगतबार्हस्पत्यकल्पः । यत्रेदमुच्यते

"पुराणं मानवो धर्मः सांगो वेदश्चिकित्सितम् ।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः" ॥

"तर्कोऽप्रतिष्ठः स्मृतयो विभिन्ना
नासावृषिर्यस्य मतं न भिन्नम् ।
धर्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः" ॥

"हस्तस्पर्शादिवान्धेन"

इति ॥ हे ब्रह्मचारिन् सत्यं वद, सत्यं पुनः परोप-

कारपर्यवसायि, असत्यमपि सत्यफलं कदाचिद्व-क्तव्यं येन ब्राह्मणवधादिकं रक्ष्यते । यथोक्तं

"सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् ।
असत्यं च प्रियं ब्रूयादेष धर्मः सनातनः" ॥

धर्मं चर, विहितकर्माचारसंग्रहादिकमनु-तिष्ठ। स्वाध्यायान्मा प्रमद, स्वाध्यायविषयं प्रमा-दमालस्यादिनानध्ययनं मा कृथाः । आचार्य-दक्षिणार्थमभिमतं धनमाहृत्य पुत्रपौत्रादिस-न्तानविच्छेदं मा कार्षीः, गुरवे दक्षिणां दत्त्वा विवाहं कुर्यादित्यर्थः । सत्यस्यासत्यभाषणं प्र-मादः । धर्मस्य नित्यनैमित्तिकलक्षणस्याकरणं प्रमादः । काम्यस्य तु विगुणस्य करणमकरणं च । एवं यत्नस्य प्रमादः आलस्याद्युपहतता । कुशलं शरीररक्षादिकं तत्र प्रमादः स्वास्थ्ये-प्यभयेन तच्छान्त्यादिकरणं, स्वस्त्ययनं हि प्रत्यहं शान्तिरूपं वैश्वदेवादावाम्नातम् । स्वा-ध्यायप्रमादो न कर्तव्यः, प्रवचने चाध्यापने आवृत्तोऽपि वेदो गुणितव्योऽध्यापयितव्यश्च । एवं यज्ञेषु पाकयज्ञादिषु प्रमादोऽननुष्ठानल-क्षणो न कर्तव्यः । माता देव इव यस्य स

मातृदेवो भव । त्वयाऽनवद्यानि अगर्हितान्येव कर्माणि कर्तव्यानि, न कदाचिदितराणि । श्रुतिस्मृतिविहितान्यपि लोकविगर्हितानि वर्जनीयानि पुराणमोक्षनिवेशनादीनि । अस्माकं च गुरुतद्भार्यापत्यप्रभृतीनां शोभनान्येव चरितानि कर्माणि आचरितव्यानि, नेतराणि । गुरुभिरपि सद्भिर्यानि व्यामोहदानि चरितानि अनुष्ठितानि तानि श्रद्धया नानुष्ठातव्यानि, यथा विश्वामित्राचरितश्वजघन्याशनचण्डालयाजनादीनि । तथा ये केचनास्मत्सकाशादतिशयेन ज्यायांसो बहुविद्यत्वादिना[1] ब्राह्मणा आगच्छेयुस्तेषां त्वयासनेन प्रश्वयितव्यं, आसनदानपादसंवाहनात् प्रश्वसनं खेदापनोदनलक्षणं कर्तव्यम्, नतु दर्पेणोद्ग्राहणिकादिकमारब्धव्यमित्यर्थः, श्रद्धा आस्तिक्यबुद्धिस्तयैव देयम् । कदाचित्त्वश्रद्धयाऽपि देयं लोकविगर्हापरिहाराय । बहुजनेषु संघटितेषु गायनादिविषयेषु समुदायदाने प्रस्तुते कर्मण्यप्रसिद्धिपरिहारायाऽश्रद्धयापि देयमित्यर्थः ।

---

१ बहुविस्त्वादिना.

अथवाऽश्रद्धयाऽदेयमित्यकारप्रश्लेषः। संवित् भृत्यादिभरणाय प्रतिज्ञा—इदं मया देयमिति। तया देयमित्यर्थः। असंविदाप्यप्रतिज्ञातमपि कर्मकौशलमवलोक्य देयम्। दौर्गत्येऽपि संबन्धिबान्धवार्थिजनायाभ्यागताय वाक्भूमितृणोदकादि यथाशक्ति ह्रिया देयम्। नागविनायकदुर्गाद्युग्रदेवताभ्यः पूर्वतरसंकल्पितं बल्युपहारादि तदाक्रमणभिया देयम्। वित्तं प्रयोजनं यत्रास्ति सा वित्तिस्तदर्थं देयम्। अवित्त्यै च देयं कदाचित्। भूत्यै विभवाय देयमभूत्यै अपि कदाचित्। श्रद्धया देयमित्यस्यैव सर्वोऽनुवादः स्तुत्यर्थत्वेन वा। एवं वेदार्थे वर्तमानस्य यदि कदाचित्कर्मसु वैदिकेषु संशयः स्यात् केषुचित्, वृत्तौ वा जीवनोपायधनार्जने किमस्मादादेयं उत नेति, तदा ये तत्र त्वन्निवासदेशे ब्राह्मणास्तेभ्यः सन्देहोऽपसारयितव्यः। कीदृशा ब्राह्मणाः। सम्यग्विमर्शकुशलाः, युक्ताः अविकलकरणाः, आयुक्ताः अनुष्ठानसक्ताः अलक्षाः अक्रूरमतयः, अरूक्षा इति पाठेऽप्ययमेवार्थः, अलुब्धाः अलोभिनो लोभ-

शून्याः । धर्मकामा वा स्युः, धर्मकामा एव यदि स्युः यथा ते तत्र कर्मवृत्त्यादौ प्रवर्तन्ते तथैव त्वं प्रवर्तेथास्तत एव निर्णयं कुर्या इत्यर्थः । अन्याचार्यपृष्टेन च यथार्थोपदेशिना भवितव्यमर्थात् । ये तु तत्र अभ्याख्याता आभिमुख्येन असंभिन्नबुद्धयस्तेषां बुद्धिसंभेदं विरोधं च मा कार्षीः । किं तर्हि । यथा ते पूर्वोक्तगुणका ब्राह्मणाः प्रवर्तेरन्, तथा वर्तेथाः संवृत्तिमत्त्वेन । अभ्याख्याताः आभिमुख्येन ख्याताः मन्त्रिप्रभृतयः । यदेतन्मदीयं शासनं एष आदेशः धार्मिकस्य राजादेराज्ञा । उपदेशो वैदिको हितपर्यवसायी वा विशेषोपनिषद्रहस्यमित्यर्थः । प्रत्यवायाभावेन बलेन लोभेन रहस्यसंबोधनेन चानुष्ठातव्यमेवमेतदित्यर्थः ॥

इत्यारण्यव्रतानि संपूर्णानि ॥

इति त्रयश्चत्वारिंशी काण्डिका ॥ ४३ ॥

अथ

## चतुश्चत्वारिंशी काण्डिका ।

अथ गोदानसंज्ञकं व्रतमुच्यते यस्य केशान्तसमावर्तनशब्दावन्यौ पर्यायौ ।

**षोडशे वर्षे गोदानमग्नौ वा समाप्ते तद्व्याख्यानं जटाकर्मणा ॥ १ ॥**

जन्मनः प्रभृति षोडशे वर्षे वर्तमाने ब्रह्मचारिणा गोदानसंज्ञकं व्रतं कर्तव्यम् । यस्त्वरितं दारस्वीकारार्थी । अस्मादूर्ध्वं स्नात्वा दारकर्मोच्यते । यस्तु सर्वकालं वेदमधीत्य विवाहं चिकीर्षति तस्योपनयनादारभ्य षोडशे वर्षे गोदानम् । 'त्रिवेद्यां ह्यष्टाचत्वारिंशद्वर्षाणि ब्रह्मचर्यं चरणीयम्' इति पक्षः । तदेकवेदग्रहणे षोडश संवत्सरा भवन्ति त्रिभागेन । यस्य त्वापत्कालेन षोडशे वर्षे भवत्युपनयनं तस्याग्नौ समाप्ते गोदानव्रतम्, अध्ययध्ययने समाप्त इत्यर्थः । योऽपि वेदैकदेशमधीत्य सिस्नासति तस्याप्येष पक्षोऽग्नौ समाप्त इति । तच्चैतत्केशान्तिकापरपर्यायं गोदानव्रतं जटाकर्मणा व्याख्यातं

शिखाकर्मणेत्यर्थः । अत्रापि ह्युपसमाधानादि-क्षुरकर्मान्तं समम् ॥ १ ॥

दर्भेष्वासीनं दर्भानध्यधिकृत्य हिरण्यं चाभिषिञ्चत्याग्निकीभिर्वा राजसूयिकीभि-र्वा या आपो दिव्या इति द्वाभ्याम् ॥२॥

कृतशौचार्थस्नानमग्नेः पश्चात्प्राङ्मुखं दर्भेषूपविष्टं ब्रह्मचारिणं 'या आपो दिव्या' इति द्वाभ्यामभिषिञ्चति आग्निकीभिरद्भिर्यदि वा राजसूयिकीभिः। तत्र आग्नेय्यो वहन्त्याद्या नद्यादिप्रभवा मन्त्रलिङ्गात् सूर्यतेजःप्रबन्धाच्च । सरस्वत्यादिप्रभवास्तु राजसूयिक्यः राजसूये राजाभिषेकार्थमाम्नानात् । किं कृत्वाऽभिषिञ्चति । दर्भान् हिरण्यं चाध्यधिकृत्य, ब्रह्मचारिणः शिरसि दर्भान् तदुपरि सुवर्णं निधायेत्यर्थः ॥

या आपो दिव्याः पयसा संबभूवुर्या अन्तरिक्ष्या उत पार्थिवासः। तासां त्वा सर्वासां रुचाभिषिञ्चामि वर्चसा ॥

प्रस्तारपङ्क्तिश्छन्दः, मृत्योः साम्परायिकस्यार्षम्, उत्तरस्याप्यनुष्टुभा नृपस्यैव। हे ब्रह्मचारिन् तासामपां सर्वासां वर्चसा वीर्येण त्वाम-

भिषिञ्चामि । कीदृशेन वर्चसा । रुचा सुवर्णेन सह वर्तमानेन । कासामपाम् । या दिव्याः दिवि भवाः आदित्ये स्थिताः, 'आदित्याज्जायते वृष्टिः' इत्यागमात् । याश्चान्तरिक्ष्या अन्तरिक्षे भवा मेघस्था इत्यर्थः । उत अपिच पार्थिवासः पार्थिवा नद्यादिभवाः, याश्च पयसा क्षीरेण संबभूवुः संभूता मिश्रीभावमापन्नाः, अग्निहोत्रादौ सर्वेण वा हविषा संभूता इत्यर्थो ज्ञेयः, पयोग्रहणस्य हविर्मात्रोपलक्षणत्वात् ॥

अभि त्वा वर्चसा सिचं यज्ञेन पयसा सह ।
यथासो मित्रवर्धनस्तथा त्वा सविता करत् ॥

अनुष्टुप् । अहं त्वा त्वामभिषिचं अभिषिञ्चामीति लिङ्व्यत्ययः । वर्चसा पयसा यज्ञेन सह वर्तमानम् । मयाभिषिक्तस्त्वं वर्चस्वी पयस्वी होता याज्ञिकश्च भवेत्यर्थः । यथा त्वं मित्रवर्धनः मित्राणां वर्धयिता असः भवसि तथा त्वां सविता करत् "लिङर्थे लेट्" कुर्यात् ॥ २ ॥

एवं राजानम् ॥ ३ ॥

एवमेव राजानं क्षत्रियमभिषिञ्चेत् इति समस्तस्य मन्त्रद्वयस्य विनियोगात्तस्यातिदेशः ॥ ३ ॥

विशेषमाह

**सावीर्हि देवेति चानुवाकेनान्यद्यथोक्तमक्रतुज्यानिम् ॥ ४ ॥**

'सावीर्हि देव प्रथमाय पित्रे वर्ष्माणमस्मै' इत्यादिनानुवाकेनान्यद्यथोक्तं कवचसन्नहनादिकं कुर्यात्। किं सर्वम्, नेत्याह अक्रतुज्यानिं, क्रतुर्मृत्युसवः, ज्यानिरर्थत्यागादिकृत आयासस्तद्वर्जम्। अनुवाकनिर्देशाद्धि तल्लिङ्गादेतावपि प्राप्नुतः इति प्रतिषिध्येते ॥ ४ ॥

**सर्वान्नं हविष्यं क्षीरोदकाभ्यां पितुं नु स्तोषमित्यादिनानुवाकेन संयूय तस्यौडम्बरेण स्रुवेण जुहोति वाजस्य नु प्रसव इति च चतुर्दशभिः ॥ ५ ॥**

सर्वं यवादिकमन्नं हविष्यं माषादिवर्जं क्षीरोदकाभ्यां सह संयूय मिश्रीकृत्य 'पितुं नु स्तोषं' इत्यनुवाकेन, ततस्तेनानुवाकेन जुहोति। यद्वा तस्येति व्यत्ययेन षष्ठी। वेदवद्वेदविदां वचांसि प्रवर्तन्ते। यत औडम्बरेण स्रुवेण

'वाजस्य नु प्रसव' इति होमप्रकरणनिर्दिष्टैश्चतुर्दशभिर्मन्त्रैश्चतुर्दश आहुतयः ॥ ५ ॥

यस्य न जुहुयात्तदाग्नीषोमीयस्येध्मेऽपि प्रोक्षेच्छेष उदकमासिच्य तेनाभिषिञ्चति ॥ ६ ॥

प्रकृतस्य क्षीरोदसंमिश्रितस्य सर्वहविष्यान्नस्य यमंशं न जुहुयात् तस्यैकदेशमग्नीषोमीयस्येध्मे प्रोक्षेत् । ततोऽपि यदवशिष्यते तत्रोदकमासिच्य तेन तं क्षत्रियं ब्रह्मचारिणमभिषिञ्चेत् । एतत् 'यस्य न जुहुयात्' इत्यादि इहानार्षं केचिदेव नराः पठन्ति ॥ ६ ॥

सावीर्हि देव प्रथमाय पित्रे वर्ष्माणमस्मै वरिमाणमस्मै ।
अथास्मभ्यं सवितर्वार्याणि दिवे दिव आसुवा भूरि पश्वः ॥

अत्र मृत्योः साम्परायण(?यिक)स्यार्षमनुवाके । सावीर्हि त्रिष्टुप् । मृत्युसवे यजमानस्य कवचसन्नहने विनियुक्ता । हे देव सवितः अस्मै यजमानाय वर्ष्माणं वर्म कवचं सावीर्हि अभ्यनुजानीहि वरिमाणमतिशयेन वरमुत्कृष्टम् । कीदृशाय यजमानाय । प्रथमाय प्रधानाय,

पित्रे पालयित्रे । अथानन्तरं वार्याणि वरणीयानि धनानि अस्मभ्यं यजमानाय याजकेभ्य आसुव जनय, दिवे दिवे दिने दिने, तथा भूरि बहून् पश्वः पशूनासुव ॥

भूतो भूतेषु चरति प्रविष्टः स भूतानामधिपतिर्बभूव ।
तस्य मृत्योश्चरति राजसूयं स राजा राज्यमनुमन्यतामिदम् ॥

त्रिष्टुप् । मृत्युरूपः प्रजापतिर्देवता । भूतः सत्यो भूतेषु जीवात्मसु प्रविष्टः सन् चरति जानात्यन्तर्यामितया, अत एव स भूतानां जीवात्मनामधिपतिः प्रभुर्बभूव भवति, लडर्थे लिट्। यथोक्तम्

'अज्ञो जन्तु······················।'

इति । यतस्तस्य मृत्योर्जगत्स्वामिनः राजसूयं राजन्यानुज्ञातं राजशासनं चरति । स राजा प्रतिशरीरं स्वप्रकाशतया राजते । स इदं राज्यं यजमानस्य राजमानत्वं विशिष्टकर्मफलभोगितया शोभमानत्वमनुमन्यतामभ्यनुजानातु । चरतीति निर्मातृत्वं, अधिपतिरिति पालयितृत्वं, तस्य मृत्योश्चरति राजसूयमिति च संहर्तृत्वमुक्तम् ॥

येभिः शिल्पैः पप्रथानामदृंहद्येभिर्द्यामभ्यपिंशत्प्रजापतिः ।
येभिर्वाचं विश्वरूपेभिरव्ययंस्तेनेममग्न इह वर्चसा समङ्ग्धि॥

जगती । अग्निर्देवता । येभिः शिल्पैः प्रथमानां प्रत्यक्षां पृथिवीं दृढीकृतवान्, यैः कर्मभिः द्यामभ्यपिंशत् उत्तम्भितवान्, कः प्रजापतिः, यैश्च कर्मभिर्वाचं त्रिवेदीं विश्वरूपैः सर्वैः कर्मभिरुपलक्षितां अव्ययन् निर्मितवान्। अनेकार्थत्वाद्धातूनां व्ययतिरिह निर्माणे वर्तते। हे अग्ने तेन कर्मगणेन पराक्रमकृतेनेमं यजमानं समंग्धि 'अञ्जू व्यक्तिम्लक्षणगतिषु' सम्यक् अंग्धि प्रत्यक्षं प्रापय वा समंग्धि विशेषात् वर्चसा च दीप्त्या च यजमानं समंग्धि संयोजय॥

येभिरादित्यस्तपति प्रकेतुभिर्येभिः सूर्यो ददृशे चित्रभानुः।
येभिर्वाचं पुष्कलेभिरव्ययंस्तेनेममग्न इह वर्चसा समङ्ग्धि॥

जगती । प्रकृष्टाः केतवो रश्मयो यैः प्रकेतुभिरादित्यस्तपति, येभिः यैश्च प्रकेतुभिश्चित्रभानुराश्चर्यकारिकिरणः सूर्यो लोकान् ददृशे दृष्टवान् । गतार्थमन्यत् ॥

आयं भातु शवसा पञ्च कृष्टीरिन्द्र इव ज्येष्ठो भवतु प्रजानाम् । अस्मिन्नस्तु पुष्कलं चित्रभान्वायं पृणातु रजसो विमानम् ॥

जगती । अयमादित्य आभातु प्रकाशयतु ।

किम् । पञ्च कृष्टीः, पञ्च मनुष्यान् । शवसा बलेन यथायमादित्यः प्रजानां ज्येष्ठोऽतिशयेन प्रशस्यो भवत्विन्द्रवत् । अस्मिन्नादित्ये पुष्कलं बहुलं चित्रभानु विचित्रप्रकाशोऽयमापृणातु आपूरयतु रजसो लोकस्य विविधं मानं प्रमाणम् ॥

यत्ते शिल्पं कश्यप रोचनावदिन्द्रियावत्पुष्कलं चित्रभानु ।
यस्मिन्सूर्या अर्पिताः सप्त साकं तस्मिन्राजानमधिविश्रयेमम् ॥

त्रिष्टुप् । मृत्युसवे चर्मास्तरणे विनियुक्ता । कशामर्हति कश्यं शरीरं पातीति कश्यपं चर्म, तस्यामन्त्रणं हे कश्यप व्याघ्रचर्मन्, यत्तव शिल्पं रूपं चरितं वा तस्मिन् राजानं राजमानं यजमानमिममधिविश्रय उपर्याश्रितं कुरु । रोचनावत् रोचमानं, इन्द्रियावत् इन्द्रिययुक्तं, पुष्कलं प्रभूतं, चित्रभानु विचित्रकान्तिमत्त्वादेव यत्र सप्त सूर्यरश्मयोऽर्पिताः प्रतिफलिताः सूर्यप्रतिबिम्बानि वा । सप्तग्रहणं बाहुल्योपलक्षणम् । साकं सह ॥

व्याघ्रो वैयाघ्रे अधि विक्रमस्व दिशो महीः ।
विशस्त्वा सर्वा वाञ्छन्त्वापो दिव्याः पयस्वतीः ॥

अनुष्टुप् । यजमानं चर्म आरोहन्तमनुमन्त्रयते । हे यजमान अधिक्रमस्व आक्रमस्व य-

तस्त्वं व्याघ्र उत्कृष्ट इत्यर्थः । व्याघ्र इवेति वार्थः । सर्वा विशः सर्वे मनुष्यास्त्वां वाञ्छन्तु अभिलषन्तु तथा दिव्या आपः पयस्वतीः पयसा क्षीरेण युक्तास्त्वां वाञ्छन्तूपसर्पन्तु ॥

या आपो दिव्या पयसा संबभूवुर्या अन्तरिक्ष्या उत पार्थिवासः । तासां त्वा सर्वासां रुचाभिषिञ्चामि वर्चसा ॥

अभि त्वा वर्चसासृजं यज्ञेन पयसा सह ।
यथा सो मित्रवर्धनस्तथा त्वा सविता करत् ॥

अभ्यां प्रस्तारपङ्क्तिभ्यामासिञ्चति । या आपो दिवि भवा दिव्या अन्तरिक्षे भवा अन्तरिक्ष्याः पृथिव्यां भवाः पार्थिवासः पार्थिव्याः पयसा संबभूवुः, पयोग्रहणमुपलक्षणार्थं, हविषा सम्भूताः युक्ता, आहुतित्वं प्राप्ता इति यावत्, तासां सर्वासां रुचा दीप्त्या वर्चसा ब्रह्मवर्चससंवृद्ध्या तत्त्वं जानानोऽहं यजमानं त्वामभिषिञ्चामि । अनेन चाभिषेकेण त्वामहं वर्चसा अभ्यसृजं अभिसृजामि योजयामि, यज्ञेन यज्ञफलेन पयसा च सह संसृजामि । यथा स सविता मित्रवर्धनस्तथा त्वां मित्रवर्धनं करतु करोतु ॥

इन्द्रं विश्वेति चतसृभिः रथमारोहन्तमनुमन्त्रयते

इन्द्रं विश्वा अवीवृधन्समुद्रव्यचसं गिरः ।
रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥

विश्वाः सर्वा गिरो वाच इन्द्रं यजमानमवीवृधन् वर्धयन्तु । समुद्रव्यचसं, सम्यग्मुदं रातीति समुद्रो नित्यानन्दः 'व्यच संभवे' नित्यानन्दसंभविनं, रथीनां रथवतां रथीतमं रथितममिन्द्रं विश्वातिशयरथयुक्तं, वाजानामन्नानां पतिं, सत्पतिं साधूनां पालयितारम् ॥

अभि प्रेहि वीरयस्वोग्रश्चेता सपत्नहा । आतिष्ठ मित्रवर्धनस्तुभ्यं देवा अधिब्रुवन् ॥ आतिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी । अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना ॥

हे यजमान अभिप्रेहि रथमारोह, वीरयस्व यज्ञानुष्ठाने विक्रमयुक्तो भव । उग्रः तीव्रः, चेता चैतन्ययुक्तः, सपत्नहा शत्रूणां हन्ता । आतिष्ठ रथमधितिष्ठ मित्रवर्धनश्च भव । तुभ्यं देवा अधिब्रुवन् देवा अपि एतत्तव वदन्ति, नत्वहमेव ॥

वृणोत्यावृणोति तत्त्वमिति वृत्रं पापं भि-

ध्याज्ञानं च । हे वृत्रहन् यजमान रथमातिष्ठ । हरी हरयः अश्वास्तव युक्ताः संयुक्ताः रथेन यतो ब्रह्मणा वेदेन सहातिष्ठ, मन्त्रैर्वा योजिताः। कर्मज्ञानानुष्ठानेन तव सुमनो ग्रावा ग्रावाणं पाषाणप्रायं दुर्भेदमविद्यारूपमर्वाचीनं अधोमुखं करोतु । वग्नुना वाचा, वक्ति तच्छीलो वग्नुः शब्दः ॥

आतिष्ठन्तं परि विश्वे अभूषञ्छ्रियो वसानश्चरति स्वरोचिः।
महत्तदस्यासुरस्य नामा विश्वरूपो अमृतानि तस्थौ ॥

आतिष्ठन्तं रथमारोहन्तं यजमानं विश्वे सर्वे देवाः पर्यभूषन् परिभूषयन्ति, आरूढो भूषितश्चायं यजमानः श्रियः शोभाः वसान आच्छादयन् स्वरोचिः स्वदीप्तिः स्वर्गदीप्तिश्च सन् चरति आक्रामति शत्रून् । यतो महत्तदस्यासुरस्य नाम, यजमान इति यत् नाम, तदस्य महाप्रभावम् । असुरस्य प्राणवतः, असवः प्राणा विद्यन्ते यस्य सोऽसुरः, मत्वर्थीयो रप्रत्ययः। यतोऽयं यजमानो विश्वरूपः सर्वरूपः प्राप्तब्रह्मलयः सन्नमृतानि अमृतत्व(मा) तस्थौ आतिष्ठति ॥

'अनु त्वेन्द्र' इति तिसृभिर्गच्छन्तमनुमन्त्रयते

अनु त्वेन्द्रो मदत्वनु बृहस्पतिरनु सोमो अन्वग्निरावीत् । अनु त्वा विश्वे अवन्तु देवाः सप्त राजानो य उदाभिषिक्ताः ॥

अनु त्वा त्वां गच्छन्तमिन्द्रोऽनुमदतु । तथा बृहस्पतिरन्ववतु, सोमश्चान्ववतु । अग्निश्चान्वावीदन्ववतु । किं बहुना । विश्वे सर्वे देवास्त्वामन्ववन्तु अनुरक्षन्तु । ये सप्त राजानः सप्तर्षय उत्कर्षेण आ समन्तादभिषिक्तास्तेऽपि त्वामन्ववन्तु ॥

अनु त्वा मित्रावरुणा इहावतामनु द्यावापृथिवी ओषधीभिः । सूर्योऽहोभिरनु त्वावतु चन्द्रमा नक्षत्रैरनु त्वावीत् ॥

हे यजमान त्वां मित्रावरुणावन्ववतां, द्यावापृथिव्यौ च ओषधीभिः सह । सूर्योऽहोभिर्दिवसैः सह, चन्द्रमाश्च नक्षत्रैः सह त्वामन्वावीत् अन्ववतु ॥

द्यौश्च त्वा पृथिवी च प्रचेतसा यज्ञो बृहद्दक्षिणा त्वा पिपर्तु । अनु स्वधा चिकिते सोमो अग्निरनु त्वावतु सविता सवेन ॥

जगती । हे यजमान त्वां द्यौश्च पृथिवी च प्रकृष्टेन चेतसा पिपर्तु काम्यमानैरर्थैः प्रपूर-

यतु । तथा यज्ञो, बृहती परिपूर्णा दक्षिणा च त्वामन्वागच्छत्विति भविष्यता सम्बन्धः । स्वधा च पितृहविः त्वामन्वागच्छतु चिकिते चैतन्यविशेषे वर्तमानम् । तथा सोमः, अग्निः सविता च सर्वेन आज्ञया सङ्कल्पमात्रेण त्वामन्ववन्तु ॥

एना व्याघ्रं परिषस्वजानं सिंहं हिन्वन्ति महते धनाय ।
मर्मृज्यन्ते द्वीपिनमप्स्वन्तररुषं न सुभ्वस्तस्थिवांसम् ॥

जगती । सुगन्धिद्रव्यैर्यजमानस्य समालभने क्रियमाणेऽनुमन्त्रणमनया क्रियते । हे यजमान एना अनेन इषुणा परिषस्वजानं संबध्यमानं व्याघ्रं सिंहप्रायमपि शत्रुं भवन्तो हिन्वन्ति स्वीकुर्वन्ति । किमर्थम् । महते धनाय । अपिचाप्स्वन्तर्मध्येऽपि वर्तमानं द्वीपिनं द्विधाविदारितस्थापितजलसम्बन्धिगतं कृत्वा शत्रुं मर्मृज्यन्तेऽतिशयेन शोधयन्ति अरुषं निष्क्रोधं कृत्वा । क इव कम् । सुभ्वः स्वर्णकार इवारुषं सुवर्णं तस्थिवांसं कषपट्टिकादौ स्थितम् । नेत्युपमार्थीयः ॥

पितुं नु स्तोषं महोधर्माणं तविषीम् ।
यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत् ॥

अत्रैकादशर्चेऽनुवाकेऽगस्त्यस्य गरलनिगिरण आर्षम् । उष्णिक् च्छन्दः । पितुशब्दोऽन्नवचनः । तं पितुं स्तोषं स्तौमि । मह इति बलनाम । महो धारयते महोधर्मा तं, अतएव तविषीं बलवन्तम् । कम् । यस्य पितोः त्रितः त्रिस्थानस्य लोकत्रयस्थस्य सम्बन्धिना तेजसा बलेन वृत्रं मेघदानवं व्यर्दयद्विशेषेणार्दितवान् । कः । अर्थादिन्द्रः । कथंकारम् । विपर्वं विघटितसन्धिं कृत्वा ॥

स्वादो पितो मधो पितो वयं त्वा ववृमहे ।
अस्माकमविता भव ॥

हे पितो स्वादो स्वादुरस हे मधो मधुरपरिणाम वयं त्वां ववृमहे वरं प्रार्थयामहे । किम् । अस्माकं त्वमविता रक्षिता भव ॥

उप नः पितवाचर शिवः शिवाभिरूतिभिः ।
मयोभुरद्विषेण्यः सखा सुशेवो अद्वयः ॥

हे पितो पालयितः नोऽस्माकं उपाचर उपागच्छ । शिवः क्षेमकारी । शिवाभिरूतिभिः सुखकारिभिः रक्षणैः । मयः सुखं भावयतीति मयोभूः, अद्विषेण्यः अद्वेषणीयः, सखा समा-

नख्यानो मित्रभूतः, सुशेवः सुखेन यः सेव्यते, अद्वयः अद्वितीयः प्रतिबन्धकशून्यः ॥

तव त्ये पितो रसा रजांस्यनुविष्ठिताः ।
दिवि वाता इव श्रिताः ॥

तव त्ये पितो रसाः, रज इति लोकनाम, ये केचिदुत्कटा रसाः रजांस्यनुविष्ठिता लोकत्रयमाश्रिताः, हे पितो, त्ये सर्वे तव सम्बन्धिनः । दृष्टान्तमाह—यथा सर्वे वाता दिवमाश्रिताः ॥

तव त्ये पितो ददतस्तव स्वादिष्ठ ते पितो ।
प्र स्वाद्मानो रसानां तुविग्रीवा इवेरते ॥

हे पितो स्वादिष्ठ स्वादुतम, तव ददतस्तव यज्ञादौ दीयमानस्य, सम्बन्धिनां रसानां स्वाद्मान उत्कृष्टस्वादवन्तो रसास्त ईरते लोकत्रयं गच्छन्ति युगपत् । तुविग्रीवा इव बहुग्रीवा इव सहस्रशीर्षाः परमात्मरूपाः सर्वत्र प्रवृत्ता इत्यर्थः ॥

त्वे पितो महानां देवानां मनो हितम् ।
अकारि चारुकेतुना तवाहिमवसावधीत् ॥

हे पितो त्वे त्वयि महानां महतां देवानां मनो हितं निहितम् आसतामस्मदादयः, मह-

तामपि देवानामिन्द्रप्रभृतीनां मनस्त्वय्येवाहितं त्वामेव ते ध्यायन्तीत्यर्थः । तथाहि—तव अवसा बलेनाहिं वृत्रमवधीत् अर्थादिन्द्रः इत्यर्थः । तथा स एव तव सम्बन्धिना चारुकेतुना उत्कृष्टप्रज्ञया अकारि अर्थादहेर्वधम् ॥

यदद: पितो अजगन्विवस्व पर्वतानाम् ।
अत्रा चिन्नो मधो पितोऽरं भक्षाय गम्याः ॥

हे पितो यदद एतत् पर्वतानां सम्बन्धि ओषध्यादि रसत्वमजगन् गतमुत्पन्नं, तत् हे पितो मधो अरमलं पर्याप्तं कृत्वा भक्षाय गम्याः गतम् । विवस्वेत्यामन्त्रणपदम् । हे विवस्व विशेषेण वसितः ॥

यदपामोषधीनां परिंशमारिशामहे ।
वातापे पीव इद्भव ॥

यदपामोषधीनां परिंशं स्पर्शमारिशामहेऽनुभवामः, स सर्वस्तव महिमेति शेषः । हे वातापे वातानां प्राणापानादीनामाप्यायक पीवः पीवरो निविडोऽस्मद्गृहे भव ॥

करम्भ ओषधे भव पीवो वृक्क उदारथिः ।
वातापे पीव इद्भव ॥

हे ओषधे ओषधिरूप पितो करम्भो भव

दधिक्षीरादिमिश्रभक्तादिना रूपेणास्मद्गृहे तिष्ठेत्यर्थः । वृक्को व्याधीनां वर्जकः उदारथिः उत्कृष्टरथः ॥

यत्ते सोम गवाशिरो यवाशिरो भजामहे ।
वातापे पीव इद्भव ॥

हे सोम यत्ते तव गवाशिरो घनं दधि, यवाशिरो यवकरम्भादिकं भजामहे सेवामहे, तेन रूपेण हे वातापे पीवरो भवास्माकम् ॥

तं त्वा वयं पितो वचोभिर्गावो न हव्या सुषूदिम ।
देवेभ्यस्त्वा सधमादमस्मभ्यं त्वा सधमादम् ॥

हे पितो तं त्वा वयं स्तुतिवचोभिः सुषूदिम क्षरामः । गावो न हव्या, यथा गावो हव्यं क्षीरं क्षरन्ति । देवेभ्यः सधमादं सहमदनं त्वां सुषूदिम । एवमस्मभ्यं त्वा सधमादमिति समानम् ॥

वाजस्य नु प्रसवः सुषुवेऽग्रे सोमो राजौषधीष्वप्सु ।
ता अस्मभ्यं मधुमतीर्भवन्तु वयं राष्ट्रे जागृयामा पुरोहिताः ॥

वाजस्येत्यऽनुवाक इन्द्रस्य जयवत आर्षम् । 'सोमो वा ओषधीनां राजा' इति श्रुतेः । सोम ओषधीनां व्रीह्यादिकानां राजा । स च प्रजापतेर्विवर्तत्वात् परिणतत्वाद्वा प्रजापतिरूपेण

स्तूयते । वाजस्यान्नस्य सम्बन्धी प्रसवः कार्यसारः ओषधीष्वप्सु च राजा, षष्ठ्यर्थे व्यत्ययेन सप्तमी, ओषधीनामपां च राजा अग्रे प्रथमसर्गादौ सुषुवे जनितवान् यज्ञद्वारेण जगत्त्रयम्। जगत्कारणभूतस्यापि सोमस्यैव वाजीकरणमित्यन्नस्तुतिपर्यवसाय्येतत् । अतोऽन्नहोमबलादस्मभ्यमस्मदर्थमोषध्यो मधुमत्यो मधुररसयुक्ताः सन्तु । 'ताः' इति सर्वासामोषधीनामनाख्येयातिशयप्रतिपादनार्थं 'ते लोचने' इतिवत्, जगत्कारणस्यापि सोमस्य या हेतुभूतास्ताः का अपीत्यर्थः । राष्ट्रे जगति वयं जागृयामा रागादिदोषनिवारणाय गृहीतोद्यमाः स्याम । पुरोहिताः पुरःसरा अग्रेसरा अग्रे परलोके हिता इत्यर्थः ॥

वाजस्येदं प्रसव आबभूवेमा विश्वा भुवनानि सर्वतः ।
अदित्सन्तं दापयति प्रजानन्त्सोमो रयिं सहवीरं नियंसत् ॥

वाजस्य नु प्रसवः शिश्रिये देवीमा विश्वा भुवनानि सम्राट् । स विराजा परियाति प्रजानन् प्रजां पुष्टिं वर्धमानो अस्मे ॥

वाजस्येदम्, इदं जगत् वाजस्य प्रसवो बभूव । किं तत् जगत् । इमानि विश्वानि

सर्वाणि भुवनानि सर्वतः सर्वत्र स्थितानि । सोमोऽन्नरूपः, अदित्सन्तं न दानेच्छायुक्तम- दानशीलमपि दापयति प्रजानां मध्ये स्थितम् । किं दापयति । रयिं धनं, सहवीरं सपुत्रं, नियंसत् नियमयुक्तम् ॥

वाजस्य प्रसवः सम्राट् प्रजापतिर्विश्वा विश्वानि भुवनानि शिश्रिये आश्रितवान् । स विराजा विशेषेण राजमानः परियाति देवान् प्राप्नोति अग्नौ सोमादिरूपः 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति विराजेति समासान्ताभावः । प्रजानन् प्रकृष्टज्ञानयुक्तः । किं कुर्वन् परियाति । अस्मेऽस्माकं रयिं धनं वर्धमानः ॥

सोमं राजानमवस इन्द्रं दानाय चोदय ।
विष्णुं वाचं सरस्वतीं सवितारं च वाजिनम् ॥

अनुष्टुप् । हे वाजप्रसव सोमं राजानं विष्णुं सरस्वतीं इन्द्रं वाजिनमन्नवन्तं चोदय प्रेरय तर्पयित्वाऽभिमुखं कुरु । किमर्थम् । अवसे रक्षणाय दानाय चाभिमतफलानाम् ॥

प्र नो यच्छत्वर्यमा प्र पूषा प्र बृहस्पतिः ।
प्र वाग्देवी ददातु नः ॥

गायत्री । अर्यमा पूषा बृहस्पतिस्त्वं च

वाग्देवी प्रददातु नोऽस्मभ्यमभिमतम्। प्रयच्छ-त्विति भूयोवचनमतिशयार्थम् ॥

अग्ने अच्छा वदेह नः प्रत्यङ् नः सुमना भव ।
प्र नो रास्व विशस्पते धनदा असि नस्त्वम् ॥

अनुष्टुप्। हे अग्ने इह यज्ञे नोऽस्माकं प्रत्यगभिमुखः सन् सुमना भव अच्छ वद् च अभिमुखमनुकूलं वद । हे विशस्पते पुरुषप्रभो नोऽस्माकं धनदो भवसि, अतो नोऽस्मभ्यं प्ररास्व प्रदेहि धनम् ॥

इन्द्रवायू सुसंदृशा सुहवेह हवामहे ।
यथा नः सर्व इज्जनः संगमे सुमना असत् ॥

इन्द्रवायू हवामहे आह्वयामः इह यज्ञे सुष्ठु सम्यक् दृशौ ययोस्तौ सुसंदृशौ सुहवा सुखाह्वानौ । यथा सर्वो जनोऽस्माकं सङ्गमे सुमना असत् भवति, तथा कुरुतम् । इदिति पादपूरणः ॥

सोमं राजानं वरुणमग्निमन्वारभामहे ।
आदित्यं विष्णुं सूर्यं ब्रह्माणं च बृहस्पतिम् ॥

सोमादीनन्वारभामहे तदुद्देशेन कर्म कुर्मः ॥

विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे मा देवा अवसागमन्निह विश्वमस्तु द्रविणं वाजो अस्मिन् ॥

विश्वे अद्येति । त्रिष्टुप् । अद्यास्मिन्नहनि विश्वे सर्वे मरुतो विश्वऊतीः सर्वाण्यवनानि रक्षणानि भवन्तु । एवं सर्वे अग्नयः समिद्धा भवन्तु । विश्वे देवा अवसा अवनेन मा मामागमन् आगच्छन्तु । इह यजमाने विश्वं द्रविणमस्तु । वाजो अस्मिन्, अस्मिन् यजमाने वाजः अन्नमस्तु ॥

आ मा वाजस्य प्रसवो जगम्यादा मा द्यावापृथिवी विश्वरूपे । आ मा गन्तां पितरा मातरा चा मा सोमो अमृतत्वेन गम्यात् ॥

आ मा वाजस्य । वाजस्याऽन्नस्य प्रसवः सारः मामाजगम्यात् अतिशयेनागच्छतु । गतार्थमन्यत् ॥

वाजो मा सप्त प्रदिशश्चतस्रो वा परावतः ।
वाजो मा विश्वैर्देवैर्धनसाता इहावतु ॥

इह यज्ञे धनसातौ धनविभागनिमित्तं वाजोऽन्नं मामवतु आगच्छतु विश्वैः सर्वैर्देवैः सह । वाजो मां सप्तप्रकारो व्रीह्यादिरूपेण,

प्रदिशश्चतस्रो दिश इति संवरणीयम् । त्रिभिर्लोकैः सह सप्त प्रदिश इत्याहुः ॥

वाजो मे अद्य प्रसुवाति दानं वाजो देवान्हविषा वर्धयाति ।
वाजस्य हि प्रसवे नन्नमीति विश्वा आशा वाजपतिर्जयेयम् ॥

वाजो यज्ञो वाजसाध्यत्वात् दानं प्रसुवाति जनयति अवजानाति वा, हविषा च देवान्वर्धयति । यतश्च वाजस्य प्रसवेऽनुज्ञायां वर्तमाना विश्वा आशा नन्नमीति अतिशयेन नमन्ति, तस्माद्वाजपतिर्भूत्वा विश्वा आशा दिशोऽहं जयेयम् ॥

वाजः पुरस्तादुत मध्यतो नो वाजो देवानृतुभिः कल्पयाति ।
वाजस्य हि प्रसवे नन्नमीति सर्वा आशा वाजपतिर्भवेयम् ॥

पुरस्तान्मध्ये च नो वाजोऽस्तु, तथा ऋतुभिः सर्वेषु ऋतुषु देवान् कल्पयतु । गतार्थमन्यत् ॥

सं मा सृजामि पयसा पृथिव्याः सं मा सृजाम्यद्भिरोषधीभिः ।
सोऽहं वाजं सनाम्यग्ने ॥

पयः पृथिव्यां पय औषधीषु पयो दिव्यन्तरिक्षे पयोधाः ।
पयस्वतीः प्रदिशः सन्तु मह्यम् ॥

सं मा सृजामीति व्याख्यातं, पयः पृथिव्यामिति च ॥

इति चतुश्चत्वारिंशी काण्डिका ॥ ४४ ॥

अथ

## पञ्चचत्वारिंशी कण्डिका ।

**अथैकाग्नेः समाधानम् ॥ १ ॥**

व्रतसमाप्त्यनन्तरमधीतवेदेन स्नात्वा विवाहः कर्तव्यः । कृतविवाहस्य पाकयज्ञा आम्नाताः । ते चाग्नौ क्रियन्ते । जीवत्पितृकस्य वैवाहाग्नौ विकल्पः । यो जीवत्पितृको यदा न धारयते, तदा तेनाभ्यन्तरमुत्पादनीयमवश्यम्, पितृप्रमयेऽभ्यन्तरार्जनं च पैतृकाग्न्युपशमपूर्वकमित्युपशमनमाह । पितरि प्रेते एक एवासहायः शिष्यते पैतृकोऽग्निः । तस्यैकाग्नेः समाधानं प्रतिपत्तिकर्म कर्तव्यं पुत्रेणैव न तु पुरोहितप्रभृतिभिः ।

अपरा व्याख्या—एक एवाग्निः पैतृको यस्यास्ति नतु वैवाहनः स्वयं वृत्तः स एकाग्निर्गृहस्थः प्रमीतपितृकः । समाधानशब्दस्तन्त्रेण द्वयमाह—पूर्वाग्नेस्त्यागमावसथाग्नेराहरणम् । यतः सम्यगाधानमर्जनमपि अनेकार्थत्वाद्धातुनिपातानाम् ॥ १ ॥

एतदेव स्फुटयितुमाह

परमेष्ठिमरणे पुत्रस्याग्निसमाधानम् २

परमेष्ठी स्वामी पिता । तस्य प्रमये पुत्रेणैवाग्नेः समाधानं शमनं कर्तव्यमित्युक्तार्थम् ॥२॥

सर्वानुपवासयेत् ॥ ३ ॥

ऋत्विग्बन्धून्सर्वान् उप समीपेऽग्नेर्वासयेत् ॥३

यावद्रात्रिं तमग्निं प्रज्वालयेदाकालमुपव्युषम् ॥ ४ ॥

उषा रात्रिः विगता उषा यत्र स व्युषः स प्रभातकालः । तस्य समीपमुपव्युषमादित्योदयकालं यावत् तं प्रकृतमेकाग्निं ज्वालयेत् सन्दीपयेत् । यावद्व्युषा रात्रिस्तावत् अग्निं प्रज्वालयेदिति भावः ॥ ४ ॥

माषकणमन्थेनौदुम्बरेण कंसेनाग्निं शमयेत् हिरण्यपाणिं सवितारं वायुमिन्द्रं प्रजापतिम् । देवां अङ्गिरसो हवामह इमं क्रव्यादं शमयन्त्वग्निमिति ॥ ५ ॥

उदकमिश्रमाषचूर्णसंपादितेन मन्थेन औदुम्बरकंसपात्रनिक्षिप्तेन तमग्निं शमयेत् ॥

विराट्पंक्त्यौ । ब्रह्मण आर्षम् । ऋगर्थस्तु–हवामहे जुहुमः देवान् ह्वयामो वा । कान् । सवितारं हिरण्यपाणिं तथा वायुं, इन्द्रं, प्रजापतिं, अङ्गिरसश्च । किमर्थम् । क्रव्यादं शमयन्त्वग्निम् ॥ ५ ॥

काशानामूते कटे भस्म समारोप्य स्थापयेत्–क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्ञो गच्छत्वरिप्रवाहः । इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्निति ॥ ६ ॥

काशानां तृणविशेषाणां सम्बन्धिनि ऊते ग्रथिते कटे समारोप्य तत् प्रशमितैकाग्निभस्म स्थापयेत् गमयेत् क्रव्यादमग्निमिति त्रिष्टुभा । काशानां मूढकट इति वा पाठः । तत्रासमअसमूलाग्रतृणनिर्मिताकारो मूढकटः ।

ऋगर्थस्तु–क्रव्यादमाममांसभक्षकमग्निं यजमानाद्दूरं प्रहिणोमि प्रक्षिपामि । यमराज्ञः

सम्बन्धी योऽरिप्रवाहः पापनिचयस्य वोढा, सोऽनेनैवाग्निना सह दूरं गच्छतु। इतरः पुनर्यमाहरिष्यामि, अयमिहैव स्थाने देवेभ्यो हव्यं वहतु प्रकर्षेण जानन्। कीदृशः। जातवेदा जातधनो जातज्ञानो वा । अस्मान्मन्त्रलिङ्गाद्कृतविवाहस्यापि परमेष्ठिप्रमयेऽभ्यन्तरपरिग्रहमिच्छन्ति ॥ ६ ॥

निर्दग्धमिति दक्षिणापरस्यां दिशि चतुष्पथे निधायोपधानं सीसं च तस्मिन्नध्यधि मार्जयन्ते—सीसे मलिम्लुचामहे शीर्ष्णां चोपवर्हणे। क्रव्यादः समया मृष्ट्वा तं प्रेत सुदानव इति ॥ ७ ॥

निर्दग्धमिति मन्त्रेण दक्षिणापरस्यां दिशि नैर्ऋत्यां दिशि याम्यपश्चिमदिगन्तराले यश्चतुष्पथस्तत्र निधाय स्थापयित्वा काशकटनिहितं भस्म, उपधानशब्दवाच्यं च यत् जीवतः पितुः शिरोऽवष्टम्भनं गडुकादिकमासीत् ॥ ७ ॥

अपास्मदेत्विति चतसृभिरुपस्थाय ॥८॥

'अपास्मदेतु' इत्यादिभिश्चतुर्भिर्मन्त्रैरुपस्थानं कर्तव्यम् ॥ ८ ॥

अपास्मदेतु निर्ऋतिर्नेहास्या अपि किञ्चन ।
अगोर्तां नाष्ट्रां पाप्मानं सर्वं तदपहन्महे ॥ १ ॥
अपास्य नैर्ऋतान्पाशान्मृत्योरेकशतं च ये ।
अपास्य ये सिनाः पाशा मृत्योरेकशतं सुवे ॥ २ ॥

एकशतं सिना नद्धास्तान् पाशान् अपास्य अहं सुवे ईशे, कार्येषु समर्थो भवामीत्यर्थः २

ये ते पाशा एकशतं मृत्यो मर्त्याय हन्तवे ।
तांस्ते यज्ञस्य मायया सर्वानवयजामहे ॥ ३ ॥

हे मृत्यो ये ते तवैकशतं पाशा मर्त्यस्य हन्तवे हननाय, तांस्तव सम्बन्धिनः सर्वान् अवयजामहे यज्ञकर्मणापनयामो यज्ञस्य मायया यज्ञनिर्माणेन ॥ ३ ॥

देवीमहं निर्ऋतिं बाधमानः पितेव पुत्रं दमये वचोभिः ।
या जायमानस्य जायमानस्य शिरो देवी प्रति सूरिर्विचष्टे॥४॥

यस्माद्यो जायते जन्तुस्तस्य सर्वस्य देवी निर्ऋतिः शिरः प्रतिविचष्टे प्रतिकूलं वीक्षते अयं मया संहर्तव्य इति । अत एवंभूतां निर्ऋतिं देवीमहं दमयेऽनुशास्मि वचोभिर्वैदिकमन्त्रैरपसारयाम्यकार्यात् । पितेव पुत्रं बाधमानः, यथा पिता पुत्रं वचोभिर्निवारयन्ननुशास्ति,

तथा। नचैवं निवारणेनानुशिष्यमाणा देवी कोपं कर्तुमर्हति यतः सा सूरिः पण्डिता ॥४॥

शं नो देवीरित्युपस्पृश्य ॥ ९ ॥

'शं नो देवीर्' इत्यनया उदकोपस्पर्शनं कुर्युः सर्वे। 'शं नो देवीर्' इति व्याख्याता ॥ ९ ॥

प्रतीपमायान्तः पदानि लोभयन्ते नडैर्वेतसशाखया वा मृत्योः पदं लोभयन्त इति ॥ १० ॥

ततो भस्मकटसीसप्रदेशात् प्रतीपमायान्तः प्रत्यावर्तमानाः पदानि लोभयन्ते सर्वे पादप्रतिबिम्बानि नाशयन्ति लोपयन्त्युत्पुंसयन्ति। कैः। नडैर्दीर्घैर्बहुभिः, वेतसशाखया वा द्राघीयस्या सपर्णया। सामर्थ्याच्चात्र सीसभस्मसांमुख्येन प्रत्यावर्तमानाः सप्ताष्टौ वा पदानीति गम्यते। 'मृत्योः पदं' इत्यादिर्मन्त्रप्रतीकः ॥ १० ॥

मृत्योः पदं लोभयन्तो यदीमो द्राघीय आयुःप्रतरं दधानाः। आप्यायमानाः प्रजया धनेन शुद्धाः पूता भवत यज्ञियासः ॥

यत्प्रसादान्मृत्योः पदं लोभयन्तो लोपयन्तः ईमो गच्छामः, अतिशयेन दीर्घमायुषः प्रतरं

विस्तारं दधानाः कुर्वन्त इत्यर्थः । तस्मात् हे ऋत्विक्प्रभृतयः शुद्धाः पूता भवत, तथा यज्ञियासो यज्ञार्हाश्च भवत । किं कुर्वाणाः । प्रजया धनेन चाप्यायमानाः वर्धमानाः ॥

अत्रैव शाखां निदध्युः ॥ ११ ॥

अनन्तरं वेतसशाखां नडमुष्टींश्च अत्रैव प्रकृते सीसभस्मकटे निदध्युः प्रक्षिपेयुः ॥ ११ ॥

अनड्वाहं पुरस्कृत्य व्रजन्त्यनड्वाहं प्लवमिति ॥ १२ ॥

अनयर्चा ॥

अनड्वाहं प्लवमन्वारभध्वं स वो निवक्षद्दुरितानि विश्वा ।
आरोहत सवितुर्नावं हिरण्मयीं षड्भिरूर्मिभिरमृतत्वं तरेम ॥

हे बन्धुप्रभृतयः अनड्वाहं प्लवं संसारतरणोपायमन्वारभध्वं तदनुगमनरूपां प्राप्तिं यात स्पृशत वेत्यर्थः । स चानड्वान् वो युष्माकं विश्वानि सर्वाणि दुरितानि पापानि निवक्षत् निर्हरतु निःशेषेण वाहयतु अपसारयतु । किञ्च सवितुः सम्बन्धिनीं नावं तत्त्वबुद्धिं विद्यामारोहत । सविता आदित्यः प्रजापतिः सर्वकार्याणां सविता । हिरण्मयीं निर्मलाम-

विद्यया॒ऽनुपप्लविताम् । यतः षड्भिरूर्मिभिराकु-
लिता वयमतस्तानुल्लंघ्यामृतत्वं तरेम परब्र-
ह्मरूपं संसारसागरपारं प्राप्नुयामेत्यर्थः । राग-
द्वेषसुखदुःखमोहमदाः षडूर्मयः, षडिन्द्रियाणि
वा कणादगदितानि, विषया वा रूपरसगन्ध-
स्पर्शशब्दसुखाद्याः । षडूर्मयः सबुद्धयः अवि-
द्यास्मितारागद्वेषाभिनिवेशाः ॥ १२ ॥

प्रत्यागतानक्षतधूममुपस्पृश्य गवा-
ग्निना च प्रदक्षिणमग्निं त्रिः परियन्ति
परीमे गामनेषतेति ॥ १३ ॥

प्रत्यागतान् गृहप्राप्तान् बान्धवादीन् ये च
गृहे स्थितास्तानपि अक्षतधूममनवहतयवा-
दिबीजधूममुपस्पर्शयन्ते । ये भस्मकटेन स-
हागताः ते स्वयं चोपस्पृशन्ति । उपस्पृश्य च
हस्तेऽग्निमादाय प्रकृतेन गवा सह यत्राग्नौ
भूमिष्ठोऽक्षतधूमः कृतः, तं प्रदक्षिणं यथा
भवति तथा त्रिः परियन्ति पर्यावृत्य भ्रमन्ति
'परीमे गामनेषत' इत्यादिकया ऋचा ॥

परीमे गामनेषत पर्यग्निमहृषत ।
देवेष्वक्रत श्रवः क इमाँ आदधर्षति ॥

परीमे गामनेषत, पर्यग्निमहृषत, अग्निं परिहृतवन्तः । देवेषु अक्रत श्रवः, श्रवोऽन्नं हविस्तद्देवेषु कृतवन्तः । अतः क इमान् आदधर्षति अभिभवितुं प्रभवति ॥ १३ ॥

**उदपात्रेऽश्मानं हिरण्यं चावधायाथैनानभिमर्शयन्ते—अश्मन्वती रीयते संरभध्वमुत्तिष्ठत प्रचरता सखायः । अत्राजहाम ये असन्नशेवाः शिवान् वयमुत्तरेमाभिवाजानिति ॥ १४ ॥**

उदकेन पूर्णे पात्रेऽश्मानं हिरण्यं सर्वबीजानि वा आचारान्निधायानन्तरमेनान् ज्ञात्यादीन् संस्पर्शयन्ति, स्वयं च स्पृशन्ति 'अश्मन्वती रीयते' इति त्रिष्टुभा ॥

इयमश्मन्वती रीयते 'लीङ् श्लेषणे' अश्मादियुक्ता जलमूर्तिः, अतो हे सखायो ज्ञात्यादय उत्तिष्ठत, संरभध्वं ससंरम्भाः सोद्यमा भवत, प्रचरत जपहोमयागादीनि कर्माणि कुरुत । जलस्पर्शपवित्रिततनवः सन्तः अत्राजहाम ये असन्नशेवाः येऽविद्यमानान्नाः, ता-

न्वयमाजहाम त्यजामः, शिवान् वयमुत्तरेमाभिवाजान्, अभिवाजान् अभिमुखान्नान् अभिमुखानेव मार्गान् वयं शिवत्वादुत्तरेम गच्छेम प्राप्नुयाम ॥ १४ ॥

इति पञ्चचत्वारिंशी काण्डिका ॥ ४५ ॥

अथ

षट्चत्वारिंशी काण्डिका ।

एकाग्नित्यागे

## शुचिर्भूतः पितृभ्यो दद्यात् ॥ १ ॥

परमेष्ठिप्रमयनिमित्ते ब्राह्मणादीनां दशरात्रादिना यथास्वमशौचे शुद्धे सति परमेष्ठिने श्राद्धं कुर्यादग्निं साधयेदिति तात्पर्यार्थः । यद्यपि च परमेष्ठिनः श्राद्धं मासिकाद्येकोद्दिष्टं, तथाप्यऽमावस्यादिश्राद्धमनेकोद्दिष्टं तत्रैवाग्नौ कर्तव्यं तस्याग्नेस्त्यागाभावादिति तदभिप्रायं पितृभ्य इति बहुवचनम् । सर्वं हि पाकयज्ञादिकमुच्यते । अभार्येणापि वाग्निरुत्पादनीयः

श्राद्धादिसंसिद्ध्यर्थम् । ततश्च तेन विवाहः कर्तव्योऽवश्यकर्तव्यसिद्धये । एवं तावदादित्यदर्शनप्रभृतयो व्यवस्थिताः । प्रायेण त्वार्यावर्तनिवासिनामविवाहानां प्रमृतपितृकादीनां लौकिकाग्नावेव प्रथमश्राद्धानि विधाय सपिण्डीकरणादूर्ध्वं विवाहं विधायाऽग्निपरिग्रहे त्वरा निरीक्ष्यते, तत्राप्यनादरं न विदधति सन्तः॥१॥

सिद्धवदग्नौ श्राद्धकर्तव्यतामुक्त्वौपसदाग्न्याधानमाह

**औपवस्त्रं भुक्त्वा कुतश्चिदग्निमानीय तं जागरयीतोपशयीत च ॥ २ ॥**

उपवस्तुरशनमौपवस्त्रं तत् पुनर्व्रत्यं हविष्यान्नं शाकमाषलवणमांसादिवर्जं व्रीहियवपयोघृतप्रभृतिभिर्भुक्त्वा स चासद्वितीयः कुतश्चिदनिषिद्धाच्छावादिव्यतिरिक्तादग्निं लौकिकमानीय समिन्धेदिन्धनविशेषैः। औपवस्त्रभोजनं तु दशम्यामेव ह्येकादश्यां श्राद्धं भवति। एकादश्यां त्वौपवस्त्रे द्वादश्यां श्राद्धं स्यात् । तं जागरयीत नैशान्तं रक्षेदित्यर्थः । उपशयीत

च ऋत्विक्बान्धवसहितस्तत्समीपे शयीते-त्यर्थः। चशब्दाद्गार्हपत्यगर्तोपलेपनार्थोपढौकि-तपार्थिवसंभारशब्दवाच्योषशर्करावराहविहत-वाल्मीकवपासिकतानां पयसा मिश्रीकरणं समुच्चीयते ॥ २ ॥

उपकाश उपशान्ते भस्मोद्धृत्य ॥ ३ ॥

उपकाशे प्रकाशनकालेऽल्पे प्रकाशे रजन्यन्ते, उपशान्ते तस्मिन्नेवाग्नौ ततोऽग्न्यागारात् गार्हपत्यसदृशगर्तात् भस्मन उद्धरणमपसारणं कृत्वा ॥ ३ ॥

पार्थिवान्संभारान्पूर्वया न्युप्य ॥ ४ ॥

ऊषादीन् सिकतापर्यन्तान् पार्थिवसंभारान् न्युप्य गर्ते प्रक्षिप्य पूर्वया ऋचा, सप्त हि पठिताः, तासां या पूर्वा 'उत्समुद्रात्' इति तया ॥४॥

उत्तरया व्यूह्य ॥ ५ ॥

षडुत्तरा भवन्ति। तत्राविशेषेऽपि सर्वान्त्या मन्त्रवर्णाद् गृह्यते 'यत्पृथिव्या अनामृतम्' इत्यादिका, 'इयत्यग्र आसीत्' इत्यादिरुत्तरा,—इत्यन्ये ॥ ५ ॥

**तमपरेण यथोत्पादितमुत्पाद्य ॥ ६ ॥**

तस्य गर्तस्यापरेण पश्चार्धे यथोत्पादितमुत्पाद्य गार्हपत्यवदुत्पाद्येत्यर्थः, करणेतिकर्तव्यतामन्त्रैस्तैरेवोत्पाद्येत्यर्थः । यथैव आश्वत्थीभ्यां शमीगर्भाभ्यामरणीभ्यां मन्त्रविशेषादिभिश्च गार्हपत्य उत्पाद्यते तथैवायमौपसदो गृह्याग्निरावसथ्यः ॥ ६ ॥

**जानुदघ्नं धारयित्वादधाति भूर्भुवःस्वरङ्गिरसामिति पूर्वेण, सुगार्हपत्यो विनुदन्नरातीरुषामुषां श्रेयसीं श्रेयसीन्नः । दीर्घायुत्वाय शतशारदायाधीयस्व महते सौभगायेति ॥ ७ ॥**

तमरणिनिर्मथनोत्पन्नं समिद्धमग्निं जानुपरिमाणं धारयित्वा भूर्भुवःस्वरित्याधानमन्त्राणामायोगपठितत्वादाद्येन 'सुगार्हपत्य' इत्यनेन वा आदधातीत्यर्थः । जानुदघ्नं संक्षिप्य धारयित्वादधातीति यावत् ॥ ७ ॥

**हिरण्यवानस्पत्याः समिध आदाय ॥८॥**

हिरण्यशल्कवानस्पत्याश्च समिधः पृथक्

पृथगादाय । उदुम्बराश्वत्थशमीपलाशविहित-तरूणामत्र सत्वचः समिधः । 'स त्वमग्न' इति मन्त्रः ॥ ८ ॥

**तुल्येन पूर्णाहुती हुत्वा ॥ ९ ॥**

परिसमूह्य पर्युक्ष्य परिस्तीर्य 'सप्त ते अग्ने' इत्येकामाज्यपूर्णया स्रुचा, द्वितीयामन्नेन तण्डुलादिना प्रजापतये स्वाहेति जुहुयात् स्रुचा । तुल्यत्वमत्र हविषस्तन्नालिपूरणत्वम् । आहुतिद्वयं तु चतुर्गृहीतेन ॥ ९ ॥

**आग्नेयेन स्थालीपाकेन पशुना वा यजेत ॥ १० ॥**

पशुना वेति अत्राग्नेयेन सम्बध्यते ॥ १० ॥

**गौर्वासः कंसो हिरण्यं च दक्षिणा ११**

गौर्दक्षिणा वस्त्रादिकं च यथाशक्ति ॥ ११ ॥

अथाधानोपयोगिनो मन्त्रानुद्धृत्य यथोपयोगं व्याख्यास्यामः । तत्र 'यथोत्पादितमुत्पाद्य' ( ६ सू० ) इत्यनेनातिदेशेन संगृहीता यथासम्भवमाधानप्रकरणानुसारेणानेतव्याः ॥

सक्षेहि या ते यज्ञिया तनूस्तयारोह ॥

अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः ।
तं जानन्नग्न आरोह ततो नो वर्धया रयिम् ॥
यो अश्वत्थः शमीगर्भ आरुरोह त्वय्यपि ।
तं ते गृह्णामि यज्ञियैः केतुभिः सह ॥

यो अश्वत्थस्ततो ये सम्पादिते अरण्यौ, ते शमीवत्यौ । शम्या गर्भः शमीगर्भः इति हि तत्पुरुषोऽन्तोदात्तत्वात्, नतु बहुव्रीहिः । अग्निः सम्बोध्यते । हे सक्ष पचनसमये समवेत साक्षाच्छब्दस्य वा सक्षभावः । हे समवेत अर्थादरण्यौ एहि साक्षाद्वा आगच्छ । या ते यज्ञिया तनूः यज्ञार्हा तया अरण्यौ समारोह, अयं तव योनिः, ऋतुः प्राप्तोऽस्य ऋत्वियः, यतो विराजसे । अरोचथाः इति लकारव्यत्ययः । तं जानन्योनिं जानन्नारोह, ततोऽनन्तरमस्माकं रयिं धनं वर्धय ॥

मयि गृह्णाम्यग्रे अग्निं रायस्पोषेण सह वर्चसेह देवाः ।
मयि प्रजां मयि पुष्टिं दधामि मदेम शतहिमाः सुवीराः॥

अनेनाध्वर्युररण्यावात्मन्यारोपयति । हे देवा अग्रे प्रथमतो मयि आत्मनि अग्निं गृह्णामि समारोपयामि रायो धनस्य पोषेण पुष्ट्या वर्चसा दीप्त्या सह मयि आत्मनि प्रजां च पुष्टिं

दधामि । मदेम हृष्टाः स्याम शतं हिमाः समाः, सुवीराः कल्याणवीराः सन्तः ॥

योनो अग्निः पितरो हृत्स्वन्तरमर्त्यो मर्त्यां आविवेश। तमात्मनि परिगृह्णीमहे वयम् ॥

हे पितरः पालयितारः आध्यात्मिकाः प्राणप्रभृतयः, यो नोऽस्माकं हृदयेष्वन्तरग्निः परमात्मरूप आविष्टो वैश्वानरो विश्वेषु सर्वेषु नरेषु भवः, तमग्निमात्मनि वयं गृह्णीमहे ॥

मैषो अस्मानवहाय परागान्मा वयमेतमवहाय परागाम॥

अरणी यजमानाय प्रयच्छति । एषोऽग्निरस्मान् त्यक्त्वा मा परागात् । वयमपि एतमग्निं त्यक्त्वा मा परागाम ॥

मही विश्पत्नी सदनी ऋतस्यार्वाची एतं धरुणे रयीणाम्। अन्तर्वती जन्यं जातवेदसमध्वराणां जनयतं पुरोगाम् ॥

यजमानोऽरणी गृह्णाति । हे मही महत्यौ विश्वस्य पत्न्यौ सर्वस्य पालयित्र्यौ, सदनी सदन्यौ सीदत्यनयोरिति सदन्यौ । कस्य सदन्यौ । ऋतस्य यज्ञस्य सत्यस्य च तदधीनयज्ञे नानृतं वदेदिति अनृतप्रतिषेधात् । अर्वाची अर्वाग्गामिन्यावनुकूलचेष्टिते एतमागच्छतं हे

धरुणे धारयित्र्यौ । केषाम् । रयीणां कर्मफलानां, अन्तर्वर्ती अन्तर्वर्त्यौ अग्निगर्भेण गर्भिण्यौ जन्यमग्निं जातवेदसं जातप्रज्ञं जातधनं वा जनयतमुत्पादयतं, अध्वराणां यज्ञानां पुरोगामग्रगामिनम् ॥

उत्समुद्रान्मधुमाँ ऊर्मिरागात्साम्राज्याय प्रतरं दधानः ।
अमी च ये मघवानो वयं चेषमूर्जं मधुमत्संभरेम ॥

समुद्रादूर्मिरुदागात् उद्गतः, मधुमान् मधुररसः, साम्राज्याय सम्यक्पालनाय प्रजानां प्रतरं दधानः प्रतीर्यत इति प्रतरो धनधान्यादिः, तं कुर्वन् । तत्प्रसादादेव ह्यमी परिदृश्यमाना ये मघवानो धनवन्तः ऊर्जं बलमिषमन्नं मधुमन्मधुररसं बिभ्रति । वयं च संभरेम संबिभृमः पार्थिवान् सम्भारान् इषमूर्जं च ॥

इयत्यग्र आसीरदो देवि प्रथमाना पृथग्यत् ।
देवैर्नुत्ता व्यसर्पो महित्वा ॥

इयती एतत्प्रमाणा, अग्रे प्रथमं सर्गादौ प्रजापतिकर्तृकयज्ञारम्भसमये गार्हपत्याधानस्थनिरासीत् । तथाच श्रुतिः

'तस्य यावन्मुखमासीत्तावतीं मृदमुदहरत्सोऽयमभवत्'

इति । अदः प्रथमाना पृथग्यत्, इदं प्रथमं या प्रथमाना विस्तरन्ती पृथग्भूता यत् यस्मात् हे देवि देवैर्नुत्ता प्रेरिता सती व्यसर्पः विसृतासि महित्वा महित्वेन, अतस्त्वं मया पुण्यवशात्प्राप्तेत्यर्थः ॥

इयमप्यत्र

अदृंहथाः शर्कराभिस्त्रिविष्टपेऽजयो लोकान्प्रदिशश्चतस्रः ।

हे खनि त्वं शर्कराभिर्दृढीभूता सर्वं जितवतीत्यर्थः, त्रिविष्टपे तृतीयस्थाने स्वर्गे वर्तमाना सती अजयस्त्वं लोकान् ॥

अधिमन्थनशल्केऽरणिं स्थापयति

उर्वश्यसि आयुरसि पुरूरवा असि ॥

पुरून् बहून् रावयति ऋग्यजुःसामानि यज्ञद्वारेण पाठयतीति पुरूरवाः आयुश्च भवसि, आयुः प्रजाकर्मसंपादनद्वारेण ॥

शल्केऽवस्थाप्यानुमन्त्रयते

इत एव प्रथमं जज्ञे अग्निरेभ्यो योनिभ्यो अधि जातवेदाः । स गायत्र्या त्रिष्टुभा जगत्यानुष्टुभा देवेभ्यो हव्यं वहतु प्रजानन् ॥

इत एव निर्मथ्यमानाभ्यामरणिभ्यां प्रथमं

सर्गादौ अग्निर्जज्ञे जातः आभ्यामेव योनिभ्यामरणिभ्यामिदानीं ममेति शेषः। जातवेदाः जातप्रज्ञानः सोऽग्निः गायत्र्यादिभिर्हव्यं वहतु प्रजानन् प्रकर्षेण चेतयमानः । प्रातःसवने गायत्र्या, मध्यन्दिने त्रिष्टुभा, तृतीयसवने जगत्यानुष्टुभा च पर्यायेण ॥

सहाग्न इति मथ्नाति

सहाग्ने अग्निना जायस्व सह रय्या सह पुष्ट्या सह प्रजया सह ब्रह्मवर्चसेन ॥

हे अग्ने अग्निना सहात्मना सह जायस्व, तथा रय्या धनेन सह, पुष्ट्या पोषेण सह, प्रजया सह, ब्रह्मवर्चसेन सह प्रजायस्व ॥

अजन्यग्निरिति जातमनुमन्त्रयते

अजन्यग्निर्होता पूर्वः पूर्वेभ्यः पवमानः पावकः शुचिरीड्यः ॥

मन्त्रेऽत्र देवगणस्यार्षम्। अयमग्निर्जातः,होता देवानामाह्वाता पूर्वेभ्योऽपि देवेभ्यः प्रथमः, पवमानस्तथा पावकः शुचिः, आभिस्तनूभिरुपलक्षितः सन्नीड्यः स्तुत्यः ॥

असुरसीति नासिकोष्मणाभिवृत्य

असुरसि प्रथमजा असुर्नामासुरुच्यसेऽसुरहमसुस्त्वं किमद्यासुरसुं करदसोरसुं प्रतीतन संजानीध्वम् ॥

प्राणस्यार्षम् । असुः प्राणोऽसि भवसि त्वं हे अग्ने प्रथमजा हिरण्यगर्भरूपः 'हिरण्यगर्भः समवर्तताग्रे' इति तस्यैव प्रथमजत्वात् । यतश्चासुरिति नाम ते अतोऽसुरुच्यसे । असुरहमसुस्त्वम् । अद्यासुरसुं करत्, असुमग्निमहमद्य कृतवान् । अतः असोः सकाशादसुमग्निं प्रतीतन अवगच्छत ॥

उपविश्योद्दीप्याह

भूर्भुवःस्वरङ्गिरसां त्वा देवानां व्रतेनादध आदित्यानां त्वा देवानां व्रतेनादधे द्यौर्मह्नासि भूमिर्भूम्ना तस्यास्ते देव्यदित उपस्थेऽन्नादमन्नाद्यायान्नपत्यायादधे ॥

भूर्लोकस्य भुवर्लोकस्य अन्तरिक्षस्य च अधिष्ठात्र्यो या देवताः तासाम् अङ्गानि रसयन्तीत्यङ्गिरसः प्राणादयस्तेषां देवानां द्योतनादिधर्मकाणां तथादित्यानां व्रतेन कर्मणा व्यापारेण हे अग्ने त्वामहमादधे । हे देवि अदिते दैन्यशून्ये पृथिवि त्वं मह्ना महिम्ना द्यौरसि, भवसि, भूम्ना च भूमिः । अतस्तस्यास्तवोपस्थे

उत्सङ्गेऽग्निमादधे । अग्निं कीदृशं, अन्नादमन्नस्य देवपितृहविषोऽत्तारं भोक्तारम् । किमर्थम् । अन्नाद्यायाऽन्नार्थम् । अग्नेर्हि यागादिद्वारेणान्नं भवति अन्नपत्याय ॥

आ यं गौः पृश्निरक्रमीदसदन्मातरं पुरः ।
पितरं च प्रयन्त्स्वः ॥

अग्ने गृहपतेऽहिर्बुध्न्य परिषद्य दिवः पृथिव्याः पर्यन्तरिक्षाल्लोकं विन्द यजमानाय पृथिव्या मूर्धन्सीद यज्ञिये लोके ॥

अयमग्निः पुरः पूर्वं गौरादित्यरूपो वाऽऽक्रमीत् ससार । क्रान्त्वा च मातरं निर्मातरं पितरं च पालयितारं प्रजापतिमसदत् उपसन्नो यजमानफलविशेषयोगयोग्यस्थानविशेषान्वेषणाय । किं ससार । लोकत्रयम् । पृश्निः पृच्छकः । प्रयन्त्स्वः, स्वः स्वर्गमग्निः प्रयन् गच्छन् ॥ अतोऽग्यापि, हे अग्ने गृहपते अहिर्बुध्न्य परिषद्येति चत्वारि सम्बोधनानि, यजमानाय लोकं परिविन्द लभस्व बुध्यस्व वा लोकत्रयमध्ये यत् भद्रं फलं बुध्यसे, तद्यजमानाय प्रयच्छ लब्ध्वेत्यर्थः । पृथिव्या मूर्धनि यो दिव्यो लोकस्तत्र सीद । यज्ञिये यज्ञार्हे ॥

यो नो अग्निर्निष्ठ्यो यो अनिष्ठ्योऽभिदासतीदमहं तं त्वयाभिनिदधामि ॥

यो नोऽस्माकमग्निर्निष्ठ्यः संहत्य उत्पन्नोऽभिदासति आभिमुख्येनोपलक्षयति स्वोत्पत्तये प्रेमत्वातिरेकं कारयति, तं त्वया सह अभिनिदधामि मन्त्रबलेन क्षिपाम्यग्न्याधाने ॥

सुगार्हपत्यो विनुदन्नरातीरुषामुषां श्रेयसीं श्रेयसीं नः ।
दीर्घायुत्वाय शतशारदायाभियस्व महते सौभगाय ॥

हे अग्ने सुगार्हपत्यः शोभनगार्हपत्यः सन् अभियस्वाहितो भव महते बृहते सौभगाय सप्रभावकर्मफलसिद्धये । किं कुर्वन्नाहितो भव। विनुदन्नरातीः, अपसारयन्नरातीः शत्रून्, रातिर्दानं, तन्निषेधेनारातिरदानं कार्पण्यानि निवारयन्निति वार्थः । उषामुषां, रात्रिं रात्रिं श्रेयसीं श्रेयसीमतिशयेन प्रशस्तां कुरु अस्माकम्। दीर्घायुष्ट्वाय चाहितोऽस्माकं भव। दीर्घायुष्ट्वं विशिनष्टि, शतशारदाय संवत्सरशतपरिमाणायेत्यर्थः ॥

यास्ते शिवा इति हिरण्यशल्कमादधाति

यास्ते शिवास्तन्वो जातवेदो या अन्तरिक्षे दिवि याः

पृथिव्याम् । ताभिः संभूय सगणः सजोषा हिरण्ययोनिर्वह हव्यमग्ने ॥

हे अग्ने हव्यं हवनीयं वह हिरण्यशल्कादिकं देवादिभ्यः प्रापय । हे जातवेदो जातप्रज्ञान संपन्नधन वा यास्ते तव क्षेमकारिण्यस्तन्वः शरीराणि, अन्तरिक्षे दिवि पृथिव्यां च याः स्थितास्ताभिर्वह हव्यं संभूय सर्वात्मीयतनुसङ्घातं कृत्वा । किं तनुसमुदायेनैव, नेत्याह सगणः सपरिवारः सन्, सजोषाः समानप्रीतिः सन् समं प्रविभजेत्यर्थः, तथा हिरण्ययोनिः सन् हिरण्यहेतुः सन् यजमानानाम् । अथवा हेतुगर्भः, यतस्त्वं हिरण्ययोनिर्ब्रह्मपुत्रोऽतो नैककः सन् वोढुं हविरर्हसि ॥

उदुम्बरादीनादधात्येकैकं मन्त्रावृत्त्या ।

स त्वमग्ने दिव्येन ज्योतिषा भाहि समन्तरिक्ष्येण सं पार्थिवेन । वैश्वानर्या समिधा दीदिही न ऊर्जस्वत्या वर्चस्वत्या भास्वत्या रश्मिमत्या ज्योतिष्मत्या ॥

दिवि भवं दिव्यं ज्योतिर्भानवीयम्, अन्तरिक्षे भवमान्तरिक्ष्यं विद्युदुल्कादिसम्बन्धि, पृथिव्या इदं पार्थिवं काष्ठादीन्धनजम् । हे

अग्ने वैश्वानर्या समिधा संभाहि सम्यग्दीप्यस्व वैश्वानरो देवता यस्याः सा वैश्वानरी, दिव्यादिकेन ज्योतिषा भाहि समिज्जनितेनास्मान्दीदिहि प्रकाशय ऊर्जस्वत्याऽन्नवत्या उदुम्बरसम्बन्धिन्या ऊर्गौदुम्बरइत्यादिवचनात्, पक्वफलसम्बन्धात् यत ऊर्गन्नमुदुम्बरः । वर्चस्वत्या रूपवत्या, भास्वत्या दीप्तिमत्या, रश्मिमत्येत्यादित्याद्यभिप्रायम् । अन्ये ऊर्जस्वत्या इहोदुम्बरे भास्वत्यादिविशेषणचतुष्टयं शम्यादिवृक्षचतुष्टयापेक्षया किञ्चित्साधर्म्यमपेक्ष्य योजयन्ति ॥

सप्त ते अग्ने समिधः सप्त जिह्वाः सप्तर्षयः सप्त धाम प्रियाणि । सप्त होत्रा अनुविद्वान्सप्तयोनीरापृणस्वा घृतेन स्वाहा ॥

कश्चिद्व्याचष्टे—

घ्रेयं पेयं च दृश्यं च स्पृश्यं श्रोतव्यमेव ।
मन्तव्यमथ बोद्धव्यं ताः सप्त समिधो मताः ॥
चक्षुर्नासा च जिह्वा च त्वक् श्रोत्रं चैव पंचमम् ।
मनो बुद्धिश्च सप्तैता जिह्वा वैश्वानरार्चिषः ॥

सप्तर्षयः—शीर्षजाः प्राणाः प्राणाद्याः पञ्च कर्मेन्द्रियवर्गो बुद्धीन्द्रियवर्गश्चेति सप्तर्षयः । सप्त धामानि स्थानानि प्रियाणि, ते तु सप्त लोका

महाव्याहृतिवाच्या योगसारे व्याख्याताः । सप्त होत्रा होतार ऋत्विग्विशेषास्ताननुविद्वान् जानन् । एतास्ते तव हे अग्ने सप्त योनयः कारणानि । तास्ता आपृणस्व सन्तर्पय घृतेन स्वाहा सुहुतमस्तु । अध्यात्मिकज्योतिरपेक्षं चैतत् । प्रजापतये स्वाहा सुहुतमस्तु ॥

इत्यग्न्याधानसरस्वती परिपूर्णा ॥

इति षट्चत्वारिंशी काण्डिका ॥ ४६ ॥

---

अथ

सप्तचत्वारिंशी काण्डिका ।

विवर्तं परिणामं वा आहुर्यस्य जगत्त्रयम् ।
तं प्रणम्य हरिं पाकयज्ञानां भाष्यमुच्यते ॥

एष औपसदोऽग्निर्वैवाहनो वा ॥ १ ॥

एष अनन्तरोक्त आहवनीयधर्मक आहितो वैवाहनो वा दक्षिणाग्न्याकृतिः । उभयेऽप्यौपसदः । अन्वर्थसंज्ञेयम्, उपसीदन्त्यस्मिन्नित्युपसत् आवसथः, तत्र भवः औपसदः । वाशब्दो विकल्पार्थः, तेन समुच्चयाभावः । संव्यवहा-

रार्था औपसदसंज्ञा। औपसदेऽग्नौ सायं प्रातरित्यादि। वैवाहनस्य विवाहकर्मण्येव संस्कारः, इतरस्य त्रेताया इवाधानम्। तत्र वैवाहने नष्टे दुष्टे वा पुनराज्यभागान्ते पावमानीभिर्होमसंस्कारो, नान्यो दम्पत्योः संस्कारत्वात् प्रासङ्गिकत्वादग्नेरितरस्य पुनराधानम् ॥ १ ॥

तस्मिन्पाकयज्ञाः ॥ २ ॥

भवन्तीति वाक्यशेषः। औपसदे प्रथमश्राद्धार्थमाहिते पाकयज्ञा नतु लौकिके गर्भाधानादिसंस्कारवत्। स्थालीपाकनिर्वर्त्या यज्ञाः पाकयज्ञा अष्टकाद्याः ॥ २ ॥

तेषामुक्तमुपसमाधानम् ॥ ३ ॥

यदुक्तमुपसमाधानं तदेव तेषां पाकयज्ञानाम्। किमुक्तम्। पञ्चदश्यामौपवस्त्रं भुक्त्वा व्रतचारिणौ स्याताम्, श्वोभूते प्रातर्होमं कृत्वा बर्हिः सन्नह्य समिधौ चोद्धतावोक्षितेऽग्निं साधयित्वा परिसमूह्य पर्युक्ष्य परिस्तीर्याग्नेरुपसमाधानं विभूरसीत्यनुवाकेन। त्रिभिः स्तरैः परिस्तरणं वैश्रवणीये दर्शनात्। सर्वसम्भार-

ढौकनमुपसमाधानमित्यपि व्याचक्षते । इष्टिविकारत्वादैष्टिको विध्यन्तः सन्निपत्योपकारकोऽभीष्टः, अन्वाधानं तु नेष्यते गृह्याग्नौ । प्रयाजानुयाजाश्चारादुपकारिणः । अन्वाधानमुद्धारः । उपयामं कृत्वोत्तरतः संस्तीर्य पात्राणि प्रयुनक्ति कृष्णाजिनमुलूखलं स्थालीमेक्षणमुपयामं स्रुवं स्रुचमाज्यधानीं हविष्यांश्चापरेणाग्निमासादयेत् । तांश्च निर्वपेत् अग्नय इन्द्राग्निभ्यामित्यमावस्यायाम् । सावित्रादिनिर्वपणमपि केचिदिच्छन्ति सावित्रादिहविर्निर्वपणं सर्वत्रेति वचनात् नह्यन्यत्रास्य वचनस्यावकाशोऽस्तीति । तदयुक्तम्, यत्र हविर्निर्वपणं श्रूयते गम्यते वा चतुर्थ्या, तत्रैव सावित्रादिनिर्वापो युक्तो यथा गृहमेधीये मारुतेषु त्रैयम्बकेषु । तत्रैव च सूत्रस्यार्थवत्त्वम् । नच गृह्ये निर्वापशब्दोऽस्ति कस्य सावित्रेण मन्त्रेणानुष्ठानम् । गृह्ये हि चत्वारि हवींष्यासादयेदित्यादिशब्दैर्हविर्निर्वापस्यैवाभावात् । तस्मादिदमस्मै देवतायै हविरित्येव संकल्पनीयं हविः । अग्नये अग्नीषोमाभ्या-

मिति पौर्णमास्यां, अग्नये इन्द्राग्निभ्यामित्यमावस्यायां संकल्पमात्रेण मारुतं चरुम् इत्यादिदर्शनात् । गृह्ये हि तस्यै तस्यै देवतायै चतुरश्चतुरो मुष्टीर्निर्वपतीति दृश्यते । सर्वशाखाप्रत्ययवच्च सर्वदेवप्रत्ययं कर्मैकम् ॥ ३ ॥

'तेष्वावृदुपचारस्तूष्णीम्, दर्शपूर्णमासप्रकृतयः पाकयज्ञाः' (१३।७।८) इति चोक्तम्। तत्रामन्त्रकत्वस्य तूष्णींपदार्थस्य क्वचिदपवादमाह

**यथाचरितं च पवित्रसंस्करणाज्यनिर्वपणग्रहणाधिश्रयणोत्पवनमवेक्षणं च ४**

यथाचरितं मन्त्रवदित्यर्थः । अवेक्षणं पत्न्या अपि । तत्राच्छिन्नाग्रौ समौ प्रादेशमात्रौ दर्भौ पवित्रकम् । यथोक्तमुपसमाधानमिति तत्र तत्रोक्तम् । हविष्यान्नेन चरुस्थलीं पूरयित्वा अमुष्मा इति संकल्प्यावहृत्य, निष्पूय चरौ पवित्रान्तर्हिता अपो निषिच्य, तण्डुलादिकं निक्षिप्यावधानेनानास्रावितान्त ऊष्मपक्वं चरुं श्रपयित्वाऽभिघार्योद्वास्योदगभिघार्याघारसमिधावादधाति ।

विष्णोर्मनसा पूते स्थः ॥

भृग्वऽङ्गिरसामार्षम् । हे पवित्रे विष्णोर्व्यापकस्य परब्रह्मणो मनसा शुद्धसंकल्पितेन पूते भवथः ॥

देवो वः सवितोत्पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥

स्पष्टार्थः । पवित्राभ्यामुदकमुत्पूय, तेनैव तूष्णीं हविष्यान् पात्राणि च प्रोक्षति ॥

आज्यधान्यां पवित्रान्तर्हितायामाज्यं निर्वपति ।

पृश्न्याः पयोऽसि तस्य तेऽक्षीयमाणस्य पिन्वमानस्य पिन्वमानं निर्वपामि ॥

सूर्यस्यार्षम् । हे आज्य असि त्वं पृश्न्याः पृथिव्याः दिवो गोर्वा पयः कार्ये कारणस्योपचारात् । संसृष्टा असंसृष्टा वा अपः पर्षति इति पृश्निः । दिवो हि जलं पतति, ततस्तृणादिद्वारेण घृतम् । एवं पृथिव्यां योज्यम् । गौस्तु साक्षात्क्षीरेण संपृक्ता । तस्य तवाक्षीयमाणस्य प्रवाहरूपेणाविनश्यतो निदाननित्यत्वात् पिन्वमानस्य सिच्यमानस्य पिन्वमानमंशं निर्वपामि आज्यधान्यां प्रक्षिपामि ॥

देवेभ्य आज्यं निरुप्य गृह्णाति

पञ्चानां त्वा वातानां धर्त्राय गृह्णामि ॥

स्यूमरश्मिः सुरश्मिः पृथुरश्मिरिति त्रयो यतयः तेषामिहार्षम् । हे आज्य पञ्चानां प्राणादीनां वातानां जगत्सूत्रभूतानां धर्त्राय धारणार्थं त्वां गृह्णामि । धारणमेव धर्त्रम् ॥

पञ्चानां त्वा सलिलानां धर्त्राय गृह्णामि ॥

आज्यकृताद्यज्ञाद्वृष्टिर्भवतीति कृत्वा पञ्चापि कूप्यप्रभृतीनि सलिलान्याज्येन धार्यन्ते, एवं जीवनहेतुत्वमाज्यस्य वृष्टिद्वारेणोक्तम् । अथवा सरणशीलाः सलिला वन्याः पशवः श्वापदादयः ॥

पञ्चानां त्वा पृष्ठानां धर्त्राय गृह्णामि ॥

रथन्तरबृहद्वैरूपवैराजशाक्वररैवतानि पञ्च पृष्ठानि ॥

पञ्चानां त्वा दिशां धर्त्राय गृह्णामि ॥

ऊर्ध्वात्र पञ्चमी दिक्, अधस्तु न गण्यते तस्या अधर्मधार्यत्वात् । यथोक्तं

'............गतिरधस्ताद्भवत्यधर्मेण ।'

इति ॥

पञ्चानां त्वा पञ्चजनानां धर्त्राय गृह्णामि ॥

चत्वारो वर्णाः, अनुलोमजो रथकारप्रभृतिवर्गः पञ्चमः—इति पञ्चजनाः । पञ्चजनानामित्यत्र विस्तारवचनः पञ्चशब्दः, पञ्चानामित्यत्र संख्यावाची । विस्तारेण वर्गात्मकेन व्यवस्थितानां जनानां पञ्चानामित्यर्थः ॥

भूरस्माकं हव्यं देवानामाशिषो यजमानस्य चरोस्त्वा पञ्चबिलस्य धर्त्राय गृह्णामि ॥

चरन्त्यमुष्मिंल्लोका इति चरुस्त्रिभुवनं, तस्य पञ्च दिशो बिलानि इमे वै लोकाश्चरुः पञ्चबिल इति अन्यार्थदर्शनात् । जगत्त्रयस्य धृत्यै त्वा गृह्णामि यतस्त्वमस्माकं भूः, यज्ञद्वारेण जन्मनिमित्तम् । ते च मद्व्यतिरिक्ता अहं च वयं, तेषामस्माकं हव्यं देवानां देवानुद्दिश्य हवनात् आशिषो यजमानस्य आज्ये हुते यज्ञसम्पत्तौ यजमानस्याशिषः सम्पद्यन्ते यतः ॥

धामासि प्रियं देवानामनाधृष्टं देवयजनं देवताभिस्त्वा देवताभ्यो गृह्णामि ॥

धीयते इति धाम । नामानि स्थानानि वीर्याणीति धामानि हे आज्य त्वं धाम भवसि ।

केषाम् । देवानां द्योतमानानां यजमानप्रभृतीनाम् । प्रियं तर्पणं कान्तं च, अनाधृष्टमनभिभवनीयम्, देवा इज्यन्तेऽनेनेति देवयजनं देवताभिः शरीरस्थाभिः प्राणादिभिर्यज्ञदेवतार्थं त्वां गृह्णामि ॥

अधिश्रयति

इषे त्वा ॥

इष्यत इतीट् अन्नं, तादर्थ्ये चतुर्थी 'सावेकाचस्तृतीयादिर्विभक्तिः' ( ६।१।१६८ ) इति, अन्तोदात्तः इति शेषः । अन्नार्थं त्वामधिश्रयामीत्यर्थः । यदापीट् विद्यतेऽस्यासौ इषः कामः 'अकारेकाररेफाश्च प्रत्ययाः' इत्यप्रत्ययान्त इषशब्दः, तथापि 'एकादेश उदात्तः' ( ८।२।५ ) इत्युदात्तत्वम् ॥

ऊर्जे इत्यपि तथैव ॥

इषऊर्जशब्दयोरकारान्तयोर्व्यत्ययेन सप्तमीति जिनेन्द्र उक्तवान् शब्दलक्षणे सस्मार ॥

अदब्धेनेति पव्यवेक्षते ॥

अदब्धेन त्वा चक्षुषावपश्यामि रायस्पोषाय सुप्रजास्त्वाय ॥

इन्द्राण्या आर्षम् । रूयवेक्षणे । इन्द्राण्या अदब्धेनानुपहिंसितेन चक्षुषा नयनेन, दृक्शक्तेरेकत्वादेकवचनं, हे आज्य त्वां पश्यामि अवलोकयामि । किमर्थम् । रायो धनस्य पोषाय पुष्ट्यर्थं, सुप्रजास्त्वाय शोभना प्रजा यस्याः सा सुप्रजाः, तस्या भावः सुप्रजास्त्वं, तदर्थम् ॥

ऊर्जे त्वेति अग्ना अधिश्रयति । ऊर्गन्नं तस्येट्शब्देनोक्तत्वात् बलायेति, इत्युक्तं भवति, अथवा लेह्यमन्नमूर्गिति, तस्यै ऊर्जे त्वाधिश्रयामि इति शेषः । यज्ञाद्धि अन्नं भवति ॥

अग्नेर्जिह्वेति पवित्रेणोत्पुनाति । केशकीटाद्यपनयति । ब्रह्मण आर्षं, देवानां वा ।

अग्नेर्जिह्वासि सुपूर्देवेभ्यो धाम्ने धाम्ने त्वा यजुषे यजुषे ॥

हे आज्य अग्नेर्जिह्वा भवसि, अग्नेस्त्वयि हुते ज्वालोत्तिष्ठति, सैव जिह्वेव जिह्वा । जिह्वाकारणत्वात्त्वमेवाग्नेर्जिह्वा । सुपूर्भव शोभनं पूतमनुपहतं भव देवेभ्योऽग्न्यादिभ्यः, धाम्ने धाम्ने स्थाने स्थाने यत्र यत्र विनियुज्यसे उपस्तराभिघारादिभिः, तथा यजुषे यजुषे यज्ञाय यज्ञाय त्वां पुनामीत्यध्याहारः ॥

हविरसीत्यनेनावेक्षते प्रकृतमाज्यम् ।

हविरसि वैश्वानरमुन्नीतशुष्मं सत्यौजाः सहो नामासि सहस्वारातिं सहस्व पृतनायतः सहस्रवीर्यमसि तन्माजिन्वाज्यस्याज्यमसि हविषो हविः सत्याभिघृतमसि सत्येन त्वाभिघारयामि सत्यं वै चक्षुः ॥

इन्द्रस्यार्षम् । हविरसि भवसि वैश्वानरं सर्वगामि सर्वयज्ञसाधनं, उन्नीतशुष्ममुत्पादितबलमुपभुज्यमानमाज्यं बलमुत्पादयति, तथा सत्यौजास्त्वं सत्यमविसंवादि ओजो वीर्यं यस्य स सत्यौजाः । लिङ्गव्यत्ययश्छान्दसः । यस्मै कामाय हूयसे तमेवावश्यं जनयसि, सहो नामासि सह इति बलनाम, अभिभवितृ किल त्वम्, अतः किं कुरु । सहस्वाभिभवारातिं शत्रुं, तथा सहस्व पृतनायतः संग्रामकारिणः । पृतनामिच्छन्तीति क्यप् । ततः सहस्रवीर्यमसि सहस्रं वीर्याणां भवसि । त्वं तन्मा जिन्व प्रीणय कामैर्बलेन वा, आज्यस्य लौकिकस्य सकाशात् त्वमाज्यं श्रेष्ठं यज्ञोपयोगात् यथा देवानामपि दैवतमिति स्तुतिः । एवं हविषः पुरोडाशादिकात् त्वं हविरसि अयातयामत्वात् 'अया-

तयामं ह्येतत्प्राजापत्यं यदाज्यम्' इति। सत्यं चक्षुस्तेनाभिघृतं सत्यं वै चक्षुरिति मन्त्रः सत्याभिघृतमसि । सत्यस्य हविषः घृतेनाभिघारणं, त्वं पुनः सत्याभिघृतम् । सत्यं चक्षुरिति, यतः सत्याभिघृतमसि अतः सत्येन त्वाभिघारयामि चक्षुषा इत्यर्थः । अवेक्षणमेवाभिघारणम् । तथा सन्तमर्थं याति गमयतीति सत्यं चक्षुः । अवेक्षणं चेति योगविभागात्पत्न्या अप्यवेक्षणं ज्ञायते, अन्यथा एक एव योगोऽभविष्यत् । मैत्रायणीयानां च गृह्ये स्फुटमेवाभिहितं पत्न्यवेक्षणम् ॥

प्रागाज्यभागाभ्यामुक्ता आघारौ ॥५॥

स्रुक्स्रुवौ प्रतिताप्य समुन्मृज्य स्रुचि चतुर्गृहीतं गृहीत्वाऽऽघारसमिधावादाय चरुमभिघार्योदग्दर्भेषूद्वास्याभिघार्योपयामपाणिः प्रजापतये स्वाहेत्युत्तरार्धेऽग्नेः संततं दीर्घं प्राञ्चं प्रज्वालितायां समिध्याघारयति ।

प्रजापतये स्वाहा ॥

प्रजापतये मनसा आत्मने सुहुतमस्तु स्रुवेण ।

तिष्ठंश्चतुर्गृहीतेन दक्षिणमाघारमाघारयति ॥

ऊर्ध्वो अध्वरो दिवस्पृगह्रुतो यज्ञो यज्ञपतेरिन्द्रवान्बृहद्भाः स्वाहा ॥

देवानामार्षम् । अयमाघाराख्यो यज्ञो यज्ञपतेः सम्बन्धी ऊर्ध्व उत्पन्नः । अध्वरो 'ध्वृ हूर्च्छने, हूर्च्छा कौटिल्ये' अकुटिलः । दिवस्पृक् स्वर्गस्पर्शी स्वर्गप्रद इत्यर्थः । अह्रुतः 'ह्वृ कौटिल्ये' अकुटिलः । पुनर्वचनमतिस्तुत्यर्थम् । इन्द्रवान् इन्द्रदैवतत्वात्, अत एव मन्त्रवर्णात् इन्द्रो दक्षिणाघारे देवता । बृहद्भातीति बृहद्भाः, अतिशयेन प्रकाशमानः सन्तताज्यस्रावणेनाग्नेर्दीप्यमानतया ॥

तत उपविश्य

युक्तः पुरस्तादिति पञ्चभिराज्यस्य जुहोति ॥ ६ ॥

आज्यस्येति द्वितीयार्थे षष्ठी, अवयवावयविसम्बन्धे वा, आज्यस्यांशं जुहोतीत्यर्थः । आज्यग्रहणात् पाकयज्ञेष्वन्यदप्यौषधिद्रव्यं प्रधानमस्तीति ज्ञापयति ॥

युक्तः पुरस्ताद्वह हव्यमग्नेऽग्रे विद्धि क्रियमाणं मयेदम् । त्वं भिषग्भेषजस्यासि गोप्ता त्वया प्रसूता गामश्वं पुरुषं सनेम स्वाहा ॥ १ ॥

आग्नेय्यस्त्रिष्टुभः सर्वाः । हे अग्ने युक्तोऽभियुक्तः सावधानः सन् हव्यं वह प्रापयान्यदेवताभ्यः, पुरस्तात् पूर्वस्यां दिशि या व्यवस्थितास्ताभ्यः । मम किमभिहितम् । यतो यत् किंचित् क्रियमाणं मयेदं कर्म, तदग्रे प्रथमं तवैवेति विद्धि बुध्यस्व, त्वन्मुखेनैवान्यदेवताभिरुपभुज्यमानत्वात् । त्वं हि सर्वकर्मणां भिषक् चिकित्सकः, विगुणकर्मणस्त्वत्प्रसादादेव परिपूर्तेः । भेषजस्य संसारदुःखनिवृत्तिहेतोर्यज्ञस्य त्वमेव गोप्ता भवसि । त्वयैव च प्रसूता अनुज्ञाताः सन्तो वयं गां स्वर्गं धेनुरूपं, तथा पुरुषं भृत्यादिकमश्वं च कर्मफलभूतं सनेम प्राप्स्यामोऽनुभविष्यामः ॥

हृदा पूतं मनसा जातवेदो विश्वान्यग्ने वयुनानि विद्वान् । सप्तास्यानि तव यान्यग्ने तेभ्यो जुहोमि स जुषस्व हव्यं स्वाहा ॥ २ ॥

हे अग्ने हृदान्तरात्मना मनसा च सत्यसंकल्पेन मानसेन पूतं पवित्रं हव्यं जुषस्व । हे

जातवेदः उपजातप्रज्ञान विश्वानि सर्वाणि वयुनानि पराभिप्रायप्रकाशकानि ज्ञानानि जानन् अन्तरात्मविवर्तवैश्वानररूपेण । हे अग्ने यानि तव सप्त आस्यानि मुखानि, तेभ्यो जुहोमि । अतस्त्वमेवं ज्ञात्वा जुषस्व । सप्तास्यानि, बाह्यानि बुद्धीन्द्रियाणि मनो बुद्धिश्च । अस्यति क्षिपति ह्येतैर्विषयेषु जीवात्मनो वैश्वानरः । तथाच प्राणप्रकरणे गीतासूक्तं

'तेषामन्योन्यभक्षाणां सर्वेषामेव देहिनाम् ।
अग्निर्वैश्वानरो मध्ये सप्तधा निहितोऽन्तरा ॥
घ्राणं जिह्वा च चक्षुश्च त्वक् छ्रोत्रं चैव पञ्चमम् ।
मनो बुद्धिश्च सप्तैता जिह्वा वैश्वानरार्चिषः ॥
घ्रेयं पेयं च दृश्यं च स्पृश्यं श्रव्यं तथैव च ।
मन्तव्यमथ बोद्धव्यं ताः सप्त समिधः स्मृताः ॥'

इति । आस्यानां भक्षणीया इत्यर्थः ॥

यावन्तो देवास्त्वयि जातवेदस्तिर्यञ्चो घ्नन्ति पुरुषस्य कर्म । तेभ्य एतद्भागधेयं जुहोमि ते मे तृप्ताः काममनु तर्पयन्तु स्वाहा ॥ ३ ॥

जाते जाते विद्यते जातवेदाः परमात्मान्तर्यामी वैश्वानररूपः, तस्य सम्बोधनं हे जातवेदः यावन्तो देवा द्योतमानाश्चक्षुरादयस्त्वयि

स्थिताः सप्त तिर्यञ्चस्तिरश्चीनाञ्चनाः विषयान् प्रति कुटिलगतयः, अत एव पुरुषस्य परापरपुरुषार्थफलं कर्म घ्नन्ति नाशयन्ति कर्तुमेव न ददति, कृतमपि वा प्रतिबध्नन्ति तीव्रपापवर्तनात्, तेभ्यस्तदधिष्ठातृदेवताभ्यो रविप्रभृतिभ्य एतद्भागधेयं जुहोमि। ते चानेन तृप्ताः प्रीताः सन्तो मम कामं काम्यमानं परापरपुरुषार्थं तर्पयन्तु साहाय्यमानुकूल्यं तत्राचरन्तु॥

अग्ना अग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः। स नः सूनुः सयुजायुजा च मा देवानां रीरिषद्भागधेयं स्वाहा॥ ४॥

अग्नौ आहवनीयेऽग्निर्निर्मन्थ्यः प्रविष्टः सन् चरति हवींषि भक्षयति। ऋषीणामृत्विजां पुत्रो जन्यस्तैर्निर्मन्थ्यारणिभ्यामुत्पादितत्वात्। एषोऽधिराजः, आधिक्येन राजमानः। सोऽग्निर्नोऽस्माकं सूनुर्जन्यः सयुजा सहयोगेनाहवनीये प्रविष्टत्वेन अयुजा च स्वरूपपृथक्त्वेन वर्तमानो देवानां भागधेयं यज्ञं मा रीरिषत् मा हिंसीत्। निर्मन्थ्यो गृह्याग्नि-

राहवनीयकुण्डसादृश्यात् तत्र प्रविष्ट उपचर्यते, वैवाहने त्वात्यन्तिक उपचारः । यद्वा अन्तरात्मा ब्रह्मान्तर्यामी जाठरमग्निं प्रविष्टः स्वयमग्निर्वैश्वानरश्चरति पश्यति ऋषीणामवबोधधनानामिन्द्रियाणां पुत्रः पात्रं तदधिष्ठान एव तेषां स्वकार्यकरणात्, अधिराजः अधिष्ठातृत्वेन राजमानः स्वप्रकाशः , एष इति प्रत्यात्मं प्रत्यक्षनिर्देशः । सर्वो हि स्वयं चेतयते परमेश्वरपरतन्त्रोऽहमिति । यत उक्तम्

'अज्ञो जन्तुरनीशोऽयम्········ ।

इति । स नोऽस्माकं सूनुः सविता अनुज्ञाता वा, सयुजा सहयोगेन, अयुजा च पृथग्भावेन वर्तमानो जाठरोऽग्निर्देवताभागं मा रीरिषत् मा गात्, किं तर्हि परमात्मगामिन्यः सर्वा आहुतयः सम्पद्यन्ताम् । रिषिरिह गत्यर्थः । अथवा परमात्मैव भागधेयं विभागमविद्यापरिकल्पितं देवानां इन्द्रियाणां संबन्धि मा गात्, किं तर्हि स्वरूपे विमले विश्राम्यत्विति प्रकृतफलाशंसनम् ॥

१ 'सहचरिता' क. पाठः ।

प्रजापते नहि त्वदन्य एता विश्वा जातानि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥५॥

हे प्रजापते परमात्मन् नहि त्वदन्य एतानि जातानि त्वत्तो विवृत्तानि परिणतानि वा हिरण्यगर्भादीनि कीटपर्यन्तानि विश्वानि सर्वाणि भूतानि परिबभूव परिभवति व्याप्नोति, अतस्त्वामेवाभ्यर्थयामहे—त्वमेवाविद्याजालं संहृत्य मोचयसि याज्ञिकान् । अतो यत्कामयमानास्तव होमं कुर्मस्तदस्माकं सम्पद्यताम् । वयं त्वदर्थयागसम्पत्तये रयीणां धनानां पतयः स्याम । स्वाहाकारनिर्देशेष्वर्थलुप्तो वषट्कारः । याज्याभावाच्च[1] वषट्कारलोपः । याज्यभावोऽपि देवतामात्रनिर्देशात् चतुर्थ्यन्तेन स्वनाममात्रनिर्देशेन वा देवताप्रतीतेः । नहि तद्वत्त्वं विना विशेषेण देवता प्रतीयते वार्त्रघ्नावाज्यभागावित्यादाविव ॥

## आयुषः प्राणमिति सन्तनीर्जुहोति ७

आयुषः प्राणं संतनु स्वाहा प्राणाद्व्यानं सं० व्यानादपानं सं० अपानाच्चक्षुः सं० चक्षुषः श्रोत्रं सं० श्रोत्राद्वाचं

1 'ज्यभा' क. पाठः ।

सं० वाच आत्मानं सं० आत्मनः पृथिवीं सं० पृथिव्या अन्तरिक्षं सं० अन्तरिक्षाद्दिवं सं० दिवः स्वः संतनु स्वाहा ॥

आयुषः प्राणमिति एकादश नाभेर्भौवनस्य वैखानसानां वा आर्षम्। आयुषो जीवनस्य प्राणं संबद्धं कुरु । प्राणादित्यादिपञ्चमी षष्ठ्यर्थे । सर्वत्र च योजना तुल्या। द्युशब्देन स्वर्गस्याभिहितत्वात् स्वःशब्देन ब्रह्मलोक उक्तः। अन्तरात्मनश्चैते प्रेष्याः। आभिराहुतिभिरनया प्राणाग्निकया ब्रह्मप्राप्तिः, मा पुनरत्र निमग्नो भूः येन कर्मणा इच्छेत्तत्र जयाञ्जुहुयादितीहापि विनियोगः। ते च त्रयोदश, तान्मन्त्रान् व्याख्यास्यामः ॥

जयाभ्यातानान् ॥ ८ ॥

त्रयोदश जयाः। अभ्यातानहोमश्चतुर्दशः। जयाश्च, अभ्यातानाश्च जयाभ्यातानाः, तान् जुहोतीत्यनुषङ्गः ॥

आकूतं च स्वाहा । आकूतिश्च स्वाहा । आधीतं च स्वाहा । आधीतिश्च स्वाहा । विज्ञातं च स्वाहा । विज्ञातिश्च स्वाहा । चित्तं च स्वाहा । चित्तिश्च स्वाहा । नाम च स्वाहा । क्रतुश्च स्वाहा । दर्शश्च[1] स्वाहा । पूर्णमासश्च[2] स्वाहा ॥

---

१ 'दार्शे' क. पाठः। २ 'पौर्ण' क.।

जयानां देवानामार्षम् । क्वापि पूर्वकल्पे ये द्वादश आदित्या बभूवुस्ते त्वभिव्यक्तनित्यनिर्मलज्ञानानन्दा अपवर्गनगरद्वारवर्तिनो जाताः, तत एवात्र मन्त्रेषु देवताः । एतच्च ब्रह्माण्डपुराणे यथावदवस्थितम् । ब्राह्मणनिगमस्त्वन्यथा व्याचष्टे—सोऽनुस्रियते यथाविनियोगं तस्योपयोगादमीषां सर्वगत्वेन । यज्ञो वा आकूतं, दक्षिणा आकूतिः । आकूतं हि संकल्पः तत्प्रभवत्वाद्यज्ञ आकूतं, 'आकूताय वै प्रायो यज्ञः प्रयुज्यते' इति 'यज्ञः संकल्पसंभवः' इति । दक्षिणा आकूतिरित्यप्येवमेव । प्रजा वा आधीतं, पशव आधीतिः । प्रजां[1] हि प्रति सर्वस्याध्यानं भवति, पशूंश्च सर्वो ध्यायति । साम वै विज्ञानं, ऋग्विज्ञातिः । ऋक्सामयोः शब्दरूपत्वात्, शब्दस्य च विज्ञापनत्वादेवमुक्तम् । मनो वै चित्तं वाक् चित्तिः । प्रजापतिर्नाम वै ब्रह्मा ऋतुः । दर्श[2]पूर्णमासौ कालविशेषौ प्रसिद्धौ ॥

---

१ 'प्रजायां हि स.' क. । २ 'दार्शपौर्णमासौ प्रसिद्धौ' क. ।

प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाजिषु । तेभिर्वाजं वाजयन्तो जयेम तेनेमा विश्वाः पृतना अभिष्याम स्वाहा ॥

प्रजापतिर्जयानिन्द्राय प्रायच्छत् प्रादात् । कीदृशायेन्द्राय वृष्णे सेक्रे, वर्षति ददाति कामानिति वा वृषा, तस्मै वृष्णे । उग्रः समर्थः । कुत्रविषये प्रायच्छत् पृतनाजिषु सेनासंग्रामेषु । स च तैर्जयैः पराः पृतना जितवानिन्द्रः । अतो वयमपि तेभिस्तैर्जयैर्वाजमन्नं जयेम प्राप्नुयाम वाजयन्तो वाजमन्नमिच्छन्तः । तेन वाजेन प्रक्रान्तेन इमा विश्वाः समस्ताः परसेना अभिष्याम अभिभवेम ॥

बृहस्पतिपुरोहिता देवा देवानां देवा देवाः प्रथमजा देवा देवेषु पराक्रमध्वं, प्रथमा द्वितीयेषु द्वितीयास्तृतीयेषु त्रिरेकादशास्त्रयस्त्रिंशा अनु व आरभ, इदं शकेयं यदिदं करोमि, ते मावत ते मा जिन्वतास्मिन्ब्रह्मण्यस्मिन्क्षेत्रेऽस्यामाशिष्यस्यां पुरोधायामस्यां देवहूत्यां स्वाहा ॥

अभ्यातानानां देवानामार्षम् । अभ्याताना देवा इन्द्रादय आभिमुख्येन यज्ञतननात् । हे देवा बृहस्पतिपुरोहिताः बृहस्पतिः पुरोहितो येषां ते बृहस्पतिपुरोहिताः यूयं देवानामपि

द्योतमानानां सांप्रतयज्ञिकानां भविष्यद्देवभा-
वानामन्येषां च यज्ञप्राप्त्या देवरूपाणां देवा
उद्देश्याः कर्मसु, अतो देवेषु साम्प्रतयजमा-
नेषु पराक्रमध्वं प्रक्रान्तयज्ञसिद्धौ समुद्योगं
कुरुध्वम् । प्रथमा भूयिष्ठा द्वितीयेषु अन्तरि-
क्षस्थेषु पराक्रमध्वं, ये प्रथमास्ते द्वितीयान्
सहायान् कुरुध्वमित्यर्थः । एवं द्वितीया अन्त-
रिक्षस्थास्तृतीयेषु सत्सु पराक्रमध्वम् । किं
बहुना । त्रिरेकादशा यूयं, अत एव त्रयस्त्रिंशाः,
सर्वेषामेव युष्माकमिदं कर्माहमन्वारभे आ-
रभे । तद्भवत्प्रसादाच्छकेयम् यत्करोमि । ते
यूयं मामवत जिन्वत च मां त्रयस्त्रिंशद्देवाः
'जिन्वतिः प्रीणनार्थः' अस्मिन् ब्रह्मणि वेदे
विषयभूते मामवत । अस्मिन् क्षेत्रे वैदिके बले,
अस्यां च वैदिक्यामाशिषि स्थितमस्यां च पु-
रोधायाम्, आशीर्विशेषणमेतत्, पुरोऽग्रे धी-
यमानायामाशिषि स्थितं मामवत युष्मत्प्र-
त्यक्षं विधीयमानायामित्यर्थः । देवहूत्यां देवा-
ह्वाने च स्थितं मामवत ॥

---

१ 'देवता' क. ।

राष्ट्रभृतश्च ॥ ९ ॥

अत्रापि जुहोतीत्यपेक्षते । राष्ट्रभृत्संज्ञया प्रसिद्धास्त्रयोदशाहुतयः । ता हि हुता राष्ट्रं त्रिलोकीलक्षणमपि बिभ्रति धारयन्ति पुष्णन्ति च, कैवासम्भावना परिमिताभिमतपुरुषार्थसिद्धौ ॥

'गन्धर्वाः षड्विधा ज्ञेया गन्धर्वाण्यस्तथैव च ।
गन्धर्वा ब्रह्मपुत्राख्या ऋषिपुत्र्यश्च कन्यकाः ॥'

ऋताषाडृतधामाग्निर्गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वट् ॥ १ ॥

सर्वत्र राष्ट्रभृतां देवानामार्षम् । राष्ट्रभृतश्च आदित्याग्निचन्द्रवायुदिवसरात्रियज्ञदक्षिणात्मकाः, ये बोधप्रतिबोधेत्यनुवाके व्याख्याताः । अग्निरत्र देवता । ऋतं जलं सहते प्रसहतेऽभिभवति काष्ठसागरादिगतं दहति भौमवाडवादिको यतः, अत ऋताषाट् 'नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ' ( ६।३।११६ ) इति दीर्घः । 'सहेः पृतनर्ताभ्यां च' (८।३।११९) इति षत्वम् । ऋतधामा धामशब्दस्य त्रयोऽर्थाः— नाम स्थानं तेजश्चेति, ऋतशब्दस्यापि—सत्यं

जलं यज्ञस्तेजश्चेति चत्वारः। सत्यतेजाः उत्कटबलः, यज्ञस्थानः, जलस्थानश्च वडवाग्नौ दर्शनात् आर्द्रेन्धने च, स्थिरस्थितित्वात् सत्यनामा च। अङ्गति गच्छति सर्वानर्थानित्यग्निः, नहि अग्निशून्यं किंचिदस्ति सर्वत्र चोष्मदर्शनात्। अग्निरिति नामधेयमितरविशेषणनिवेशनिर्देशाय। गां स्वर्गं धारयति यज्ञसंपत्तिद्वारेणेति गन्धर्वः। सोऽग्निर्नोऽस्माकं सम्बन्धि इदं प्रत्यक्षप्राप्तं ब्रह्म वर्धनं पश्वादिवेदसंपदां चयनं क्षत्रं क्षरत्पातु रक्षतु। स्वाहेति निपातस्य सम्प्रदानार्थीयस्य सुहुतमस्तु इति सर्वत्र अर्थः। वडिति 'वी गति……'इत्यस्य वर्णागमे वर्णविपर्यये च रूपम्, वहतेः क्विबन्तस्य वा, तेन वेतु वहतु वेत्यर्थः। सुहुतमस्तु, तच्चाग्निरश्नातु प्राप्नोतु वेत्यर्थः ॥ १ ॥

तस्यौषधयोऽप्सरसो मुदा नाम ताभ्यः स्वाहा वट् ॥२॥

तस्याग्नेरोषधयः पत्न्य इत्यर्थः। अप्सरसोऽप्सु सरन्तीत्यप्सरसः रूपविशेषयुक्ता वा कान्तिमत्य इति वा। मुदा इति नाम्ना प्रसिद्धाः, मोदयन्ति व्याधिनिवृत्तिद्वारेण जनान्, स्वयं च

मोदन्त इति मुदाः । ताभ्यः सुहुतमस्त्विति पूर्ववत् ॥ २ ॥

सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वट् ॥ ३ ॥

सुम्नमिति सुखनामसु पठ्यते, सुसुखाः सूर्याद्रश्मयो यस्य स सूर्यरश्मिः । यथोक्तम्

'अम्मयत्वेऽपि चन्द्रादेः सावित्रा एव रश्मयः ।
प्राप्य प्रतिहतास्तत्र नेत्रसंसर्गभागिनः ॥'

इति । चन्द्रमा इति नाम आह्लादननिमित्तम् । तुल्यमन्यत् ॥ ३ ॥

तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा वट् ॥४॥

तस्य चन्द्रमसः पत्न्यो भेकुरयो नाम नक्षत्ररूपाः । स्पष्टमन्यत् ॥ ४ ॥

संहितो विश्वसामा सूर्यो गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वा० ॥ ५ ॥

सूर्य इति नाम । विश्वसामा सर्वतेजाः । संहितः सम्यग्घितः, प्रजाभ्यः संहितः ॥ ५ ॥

तस्य मरीचयोऽप्सरस आयुवो नाम ताभ्यः स्वाहा वट् ॥६॥

तस्य सूर्यस्य मरीचयः पत्न्यः । आ समन्तात् यौति मिश्रीभवतीति आयुवः । मूलविभुजादित्वात् कः ॥ ६ ॥

भुज्युः सुपर्णो यज्ञो गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वट् ॥ ७ ॥

यज्ञो यागः । सुपर्णः सुपतनः शोभनगमनः स्वर्गादावतिव्यवहितेऽपि फलारम्भात् । भोगो भुक् भुजमिच्छति भुज्युः 'क्याच्छन्दसि' (३।२।१७०) इत्युप्रत्ययः, स्वर्गादिफलद्वारेण ॥७

तस्य दक्षिणा अप्सरसस्तवा नाम ताभ्यः स्वाहा वट् ॥८॥

यज्ञस्य दक्षिणा पत्नी ॥ ८ ॥

प्रजापतिर्विश्वकर्मा मनो गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वट् ॥ ९ ॥

विश्वं सर्वं यस्य कर्म कार्यं स विश्वकर्मा । मन्यते इति मनः ॥ ९ ॥

तस्य ऋक्सामान्यप्सरस एष्टयो नाम ताभ्यः स्वाहा वट् १०

एष्टयो नाम पत्न्यः । आ समन्तादिष्टय एष्टयः ॥ १० ॥

इषिरो विश्वव्यचा वातो गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वट् ॥ ११ ॥

'इषु गतौ' इषिरो गमनशीलः । 'व्यच संभवे' विश्वव्यचाः सर्वसंभवहेतुर्वृष्ट्यादिद्वारेण ११

तस्यापोऽप्सरस ऊर्जो नाम ताभ्यः स्वाहा वट् ॥ १२ ॥

आपस्तस्य वायोः पत्न्य ऊर्जोऽन्नवत्यो बलवत्यश्च ॥ १२ ॥

एता द्वादशाहुतयो मिथुना उच्यन्ते पतिपत्नी युगलसंप्रत्ययात्, तथा अग्निचयन एते मन्त्राः पठ्यन्ते । तत्र च 'एते राष्ट्रभृतः' इत्युपक्रम्य 'मिथुना आहुतयः प्रजात्यै द्वादश' इति श्रूयते । ताश्चाग्नौ, त्रयोदशी तु रथमुखे ।

स नो भुवनस्य पते यस्य त उपरि गृहा विराट्पते ।
असै ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ स्वाहा ॥ १३ ॥

प्रजापतिर्देवता यः सप्तरथः श्रुतः 'य एष सप्तरथः प्रजापतिरेवैष' इति । हे भुवनस्य भूरादिसत्यान्तस्य पते रक्षक । विराट्पते विराजः पते उत्पत्त्यादिहेतो । तथाच मनुः

'द्विधा कृत्वात्मनो देहमर्धेन पुरुषोऽभवत् ।
अर्धेन नारी तस्यां स विराजमसृजत्प्रभुः ॥'

इति । स त्वं महि महत् शर्म सुखं यच्छ यजमानाय, अस्मै ब्रह्मणेऽस्मै च क्षत्राय, एतेभ्यो ब्राह्मणेभ्य एतेभ्यश्च क्षत्रियेभ्यः । यस्य ते उपरि गृहा यदाश्रिता लोका इत्यर्थः । एषा त्रयोदशी आहुती रथमुखे ॥ १३ ॥

विश्वा आशा अप्सरसः प्रियास्ता न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा ॥ १४ ॥

विश्वा सर्वा आशाः कामना अविद्यावासनाः, ताः पत्न्यः ब्रह्मण आयत्तास्तत्त्वज्ञानांशेन, अविद्यांशेन तु भार्याः। इह पत्नीनां परिज्ञानमेव केवलं, नतु होमः आहुतित्वानवगमात्। यथा 'स नो भुवनस्य' इति पूर्णां स्रुचं जुहुयात्, एकैवाहुतिरुच्यते। यथा 'मिथुना आहुतयः प्रजात्यै द्वादश' इति द्वादशानां मिथुनत्वमुक्तं नतु त्रयोदश्याः। सूत्रमपि चतुर्दशमन्त्रस्य पत्नीपरिज्ञानमात्रपर्यवसायित्वं द्योतयति, एवमपि एषोऽपि रथाख्यो गन्धर्वः सपत्नीको विदितो भवति। रथः सप्तरथः॥१४॥

## वार्त्रघ्नावाज्यभागौ ॥ १० ॥

राष्ट्रभृदनन्तरं वार्त्रघ्नावाज्यभागौ जुहोति। उभयत्र चोभौ पौर्णमास्याममावस्यायां च। अन्येषु पाकयज्ञेषु आज्यमेव भागो ययोस्तौ आज्यभागौ अग्नीषोमौ। वृत्रहणौ वृणोति आवृणोति जीवात्मानं वृत्रं पापं तमश्च, तस्य हन्तारौ वृत्रहणावेव वार्त्रघ्नौ। आज्यश-

ब्दोऽत्रापि धर्माणां ग्राहकः, तेन चतुर्गृहीतेन होमः। आग्नेयस्याग्नेय्यौ[1] याज्यानुवाक्ये द्वितीयस्य सौम्ये। अन्ये त्वाहुः—न याज्यैवानुवाक्या भवितुमर्हति, अनुवाक्यया प्रैषः, याज्यया हविष्प्रक्षेपः। तत्र गायत्र्योऽनुवाक्यास्त्रिष्टुभो याज्या इति प्रायिकः, अत एवात्र वार्त्रघ्नशब्दोऽनुवाक्यायां[2] ग्राहक इत्याहुः। तथाचोक्तं, 'यत्र वृत्रस्तत्रानुवाक्या' इति ॥ १० ॥

अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपण्यया। समिद्धः शुक्र आहुतः स्वाहा॥

ऋषिपुत्राणामार्षम्। अग्निराहुतः प्रक्षिप्तहविष्कः सन् वृत्राणि पापानि तमांसि शत्रूंश्च जङ्घनत् हन्ति अर्थाद्यजमानस्य। समिद्धः प्रज्वलितः सन्, अत एव शुक्रो देदीप्यमानो द्रविणस्युर्द्रविणं धनं इच्छति यजमानस्य द्रविणस्युः। कया विपण्यया विशिष्टस्तुत्या। यद्वा 'मन ज्ञाने' इत्यस्य मवर्णस्य व्यत्यये विपर्यासे विशिष्टप्रज्ञया इत्यर्थः, अनेकार्थत्वाद्धातूनाम्॥

१ 'ये' क.। २ 'क्यया' क. पाठः।

त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा। त्वं भद्रो असि क्रतुः स्वाहा ॥

हे सोम त्वं सत्पतिः सतां पतिः पालकोऽसि भवसि । त्वं राजा 'सोम ओषधीनां राजा' इति श्रुतेः। राजते दीप्यते इति राजा । उतेति तथार्थे । वृत्रहा च पापादेर्नाशकः, तथा त्वं भद्रो भन्दनीयः कल्याणः सुखकारी असि भवसि । क्रतुः क्रान्तदर्शनस्तथा त्वमेव। अथवा क्रतुर्यज्ञः सोमस्य प्रजापतिरूपत्वात् प्रजापत्यात्मकत्वाच्च यज्ञस्य । अग्नीषोमाविदं[1] 'सर्वं यदन्नं चान्नादश्च' इति ब्रह्मणो द्वितीयस्याग्नीषोमात्मकत्वश्रवणात्, 'प्रजापतिर्वै यज्ञ' इति चाम्नानात्। एतदाज्यभागान्तं कर्मोपसमाधानशब्देनोच्यत इत्याहुः। 'अग्निमुपसमाधायाज्यभागान्तं हुत्वा' इत्यर्थात् ॥

स्विष्टकृदाज्यभागा अन्तरेणावापः॥११॥

उक्तयोराज्यभागयोर्भविष्यतः स्विष्टकृतश्च मध्ये आवापः कर्तव्यः। आवापशब्देन स्थालीपाकयज्ञा आग्नेयादय उच्यन्ते द्रव्यदेवता-

१ 'मादिपदं' क. पाठः ।

विशेषयोगेन ये चोदिता व्यक्तचोदनिकाः। अथवा स्विष्टकृदाज्यभागा अन्तरेणावापः प्रधानकर्मणां कर्तव्य इत्यध्याहारेण पूरयितव्यम् ११

**नामधेयेन देवतां यजेत तद्देवतया वर्चा ॥ १२ ॥**

आग्नेयस्थालीपाकस्याऽग्नये स्वाहेति नामधेयेन जुहुयात्, पर्वणि स्थालीपाकस्याग्नये स्वाहा, अग्नीषोमाभ्यां स्वाहेति । तद्देवतया वा ऋचा इति पक्षान्तरम् । ऊहविधानादृक्पक्षोऽभिमततर इत्याहुः । ऋचमप्यनुवाक्यामेव क्वचिदाहुः। एवमेव हि[1] स्वाहाकारान्तत्वमुपपद्यते । याज्यायां हि वषट्कारान्तत्वं[2] भवेत् । याज्ययैव तु आर्यदेशेष्वनुष्ठानं दृश्यते । प्रायः कामचार इति तु व्याख्यातारः । तत्र 'अशनखादनदानलिङ्गकाः याज्याः, आह्वानलिङ्गकास्त्वनुवाक्याः' इति लक्षणमाहुः । यद्यपि चानुवाक्ययैव होमस्तत्र च स्वाहाकारान्तता, याज्ययैव यागस्तत्र च वषट्कारान्तता 'याज्या अपि वषट्करोति' इति श्रुतेः, तथापि याज्यया

१ 'द्वि' क. पाठः । २ 'वषट्स्वाहाकारा' क. ।

यदा पाकयज्ञास्तदा दर्शपूर्णमासदेवताभ्यो जुहुयादिति चोदनया स्वाहाकारो भवतीत्याहुः १२

**आग्नेयीं वोहेदग्नीषोमीयामैन्द्राग्नीं वा द्विदे[1]वतेषु, वैश्वदेवीं बहुदे[2]वतेषु ॥ १३ ॥**

आग्नेये स्थालीपाके तावदाग्नेयी युक्ता, यदा न नामधेयेन यागः । देशकालकुलभेदेन नागविनायकग्रामयक्षप्रभृतीनां यागाः प्रसिद्धाः । यद्देवताभिधानसमर्था वेदे मन्त्रा नाम्नाताः, तेष्वपीष्टेषु दर्शपूर्णमासयोरिति नयेनातिदेशप्राप्ता आग्नेयादिमन्त्राः स्मार्तादिष्वेवोहनीयाः, तस्मादृक्षु नोहेत् इति ऋक्षूहनिषेधाद्बहुवचनमर्थवत् । तत्रैकदेवतेष्वाग्नेयीमतिदेशप्राप्तामूहेत् । द्विदेवतेष्वग्नीषोमीयामैन्द्राग्नीं वा । प्रकृतावग्नीषोमीयमेकादशकपालं निर्वपेत्, ऐन्द्राग्नमेकादशकपालं निर्वपेत् पौर्णमास्यामिति च शाखाभेदेन पठ्यते । बहुदेवतेषु तु वैश्वदेवीं विश्वेदेवप्रकाशनसमर्थामतिदेशप्राप्तामृचमूहेत् । बहुदेवतानां वैश्वदेवप्रकृतित्वस्य न्याय्यत्वात् १३

---

१ 'दैव' क. । २ दैव' क. ।

ऋतुतिथिनक्षत्रदेवताश्च यजेत ॥१४॥

ऋतवो[1] वसन्ताद्यास्तांस्तदधिष्ठातृभूताश्च देवता नामधेयेन यजेत । एवं तिथीस्तदधिष्ठातृभूताश्च देवता यजेत । तथा नक्षत्राण्यश्विन्यादीनि, तद्देवताश्च । ताश्च शान्तिविमोकमन्त्रेषु पठिताः, व्याख्याताश्च । प्रधानदेशा वा प्राधान्यमिति विज्ञेयम् । स्विष्टकृदाज्यभागमध्यं हि प्रधानस्थानम्, प्राचीनार्वाचीनवर्गौ च साधारणौ । प्रयाजानुयाजास्तु गृहमेधत्वेन पाकयज्ञेषु निषिद्धाः । 'गृहमेधो वै पाकयज्ञो न प्रयाजानुयाजा इज्यन्ते, नानुयाजसामिधेनीरन्वाह' इति श्रुतिः ॥ १४ ॥

प्राक् स्विष्टकृत उपहोमाः ॥ १५ ॥

इह गाव इत्यादय उपहोमाः, तेषां स्विष्टकृतः पूर्वत्वं नियम्यते तद्भक्तत्वप्रदर्शनाय । कथं नु नाम स्विष्टकृन्निषेधेन निषेधः उत्कर्षाच्चोत्कर्षः स्यादिति ॥ १५ ॥

---

१ 'षड्ऋतवस्तान्' ख. पाठः ।

इह गावोऽयं यज्ञ आ नः प्रजां धूभिरुपधूर्भिश्च हुत्वेडामग्न इति स्विष्टकृतम् ॥ १६ ॥

यजेतेत्यनुषङ्गः । इह गाव इत्यादीनुपहोमान् हुत्वा मध्यात्पूर्वार्धाच्चावदाय स्विष्टकृतं यजेत इडामग्न इति मन्त्रेण ॥ १६ ॥

त्वं नो अग्न इति द्वाभ्यां जुहुयात् १७

तत एतदाहुतिद्वयं जुहुयादित्यर्थः ॥ १७ ॥

अया भूरिति च[1] ॥ १८ ॥

जुहुयादित्यनुषज्यते ॥ १८ ॥

परिस्तरणान्यनुप्रहरेन्नानुप्रहरेदित्येके ॥ १९ ॥

सूक्तवाक्येन प्रस्तरं प्रहरतीति प्रकृतावाम्नातम् । तत्पाकयज्ञेषु केचिदिच्छन्ति, केचिन्नेच्छन्तीत्यर्थः ॥ १९ ॥

एवं सर्वा देवताश्चेज्यानि च ॥२०॥

सर्वा देवताः साधारणनाम्ना यजेत। इज्यानि

---

१ चशब्दात् सर्वप्रायश्चित्तानि मनोज्योतिरिति सप्तप्रायश्चित्तानि प्राक् संस्थितयजुषो दृष्टानि । इत्यादिव्यदर्शनम् ।

च यष्टव्यानि यज्ञा इत्यर्थः । सर्वदेवताभ्यः स्वाहा, यज्ञेभ्यः स्वाहेति । इज्यानि हविष्यद्रव्याणि सर्वाणि सर्वदेवतोद्देशेन प्रक्षिपेदित्यपि केचिद्व्याचक्षते ॥ २० ॥

इदानीं यथेष्टप्रयोगानुसारेण याज्यानुवाक्यामन्त्रानुदाहरणार्थं कतिचिद्व्याख्यास्यामः, अशक्या हि आग्नेयादयो मन्त्रा विकल्पयोग्याः सर्वे ग्रन्थैकदेशेऽनुसर्तुमतिवैतत्यप्रसङ्गात् तत्र प्रधानमन्त्रोक्तावाग्नेयोदाहरणभाष्यं तावत् ।

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपां रेतांसि जिन्वति ॥

आग्नेयी । गायत्री । त्रिलोकगतोऽग्निर्वैश्वानर आदित्यवैद्युतभौमतेजोरूपेण स्थितोऽत्र स्तूयते । अयमग्निर्मूर्धा दिवो मूर्धेव मूर्धा, यथा सर्वत्र गात्रे[1] मूर्धा प्रधानं, तथैषोऽग्निर्दिवो द्युस्थानदेवतानाम् । अत्राग्निरिति सम्बध्यते, अन्तरिक्षस्य चाध्याह्रियते । अग्निरन्तरिक्षस्य ककुदिव विद्युदादिरूपेण अ[2]वस्थितः । दर्पद्योतनत्वेन ककुत्त्वम् । पतिः पृथिव्या अयं, अयं

१ 'गोत्रेषु' क. । २ 'व्यव' क. ।

भौमाग्निः पृथिव्याः पतिः पालयिता पाकाद्युपकारेण । अपां रेतांसि जिन्वति । रेतांसि प्रजननशक्तयः, ता अग्निर्जिन्वति प्रीणात्युपचिनोतीत्यर्थः । स हि यज्ञाद्वृष्टिप्रणालिकयाङ्कुरादिजनिकाः शक्तीरभिव्यनक्ति ॥

भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।
दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहम् ॥

हे अग्ने भुवः पृथिवीलोकात् यज्ञस्य यज्ञजनितस्य अपूर्वस्य त्वं नेता प्रापयिता, रजसश्च रससारस्य । कुत्र नेता । यत्र नियुद्भिर्वायुभिः सचसे 'षच समवाये' सम्बध्यसेऽन्तरिक्षादावित्यर्थः । वायुसहायो ह्यग्निः सूक्ष्मतेजोरूपेणापूर्वरसादिकं स्वर्गादिके वर्तयतीत्यर्थः । शिवाभिरिति नियुद्विशेषणम्, लोकहितकारिणीभिरित्यर्थः । त्वं हि दिवि स्वर्गे मूर्धानमादित्यरूपं दधिषे धारयसे, तथा स्वर्षां जिह्वां चकृषे हव्यवाहम्, तव हि जिह्वा ज्वालारूपा हव्यं वहति स्वर्गादिस्थान्देवादीन् प्रापयति । तादर्थ्येन च तां जिह्वां स्वर्षां स्वर्गसम्बन्धयोग्यामतिदीर्घां चकृषे करोषि । स्वर्गं

सीदति गच्छति इति स्वर्षा, स्वःशब्दे रेफस्य प्रकृतिभावः, षत्वं च सीदतिसकारस्य, स्वश्च सुपां पत्य इति (?) ॥

आग्नेयाग्नीषोमयोरन्तरालेऽजामित्वायोपांशुयाज आज्येन[1] क्रियते। तत्र 'विष्णुरुपांशु यष्टव्योऽजामित्वाय' इति वाक्यशेषाद्विष्णवाद्या देवता गम्यन्ते। तद्देवतामन्त्रा उदाहरणार्थं व्याख्यायन्ते ॥

अग्नीषोमाविमं सु मे शृणुतं वृषणा हवम् ।
प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः ॥

हे अग्नीषोमौ इमं मम सम्बन्धिनं हवमाह्वानं सुश्रृणुतं सुष्टु आकर्णयतम्। हे वृषणौ काम्यमानार्थप्राप्त्या सेक्तारौ वृष्टिदायिनौ वा, 'तावेव वर्षतः' इति श्रुतिः। 'अग्नीषोमाविदं सर्वं[2] यदन्नं चान्नादश्च सोमोऽन्नमग्निरन्नादः' इति, अग्नेरन्नकृता वृष्टिर्यज्ञद्वारेण । वृषणेति 'सुपां सुलुक्' इति द्विवचनस्याकारादेशः। तथा सूक्तानि प्रतिहर्यतमभिनन्दतम्। किंच दाशुषे दानशीलाय यजमानाय मयः सुखं भवतं सुखकरौ यजमानाय भवतमित्यर्थः ॥

---

१ 'न तत्र' क. पाठः। २ स्वर्ग' क. ख. ।

आन्यं दिवो मातरिश्वा जभारामथ्नादन्यं परि श्येनो अद्रेः।
अग्नीषोमा ब्रह्मणा वावृधानोरुं यज्ञाय चक्रथुरु लोकं स्वाहा॥

अग्नीषोमयोरेकमन्यं मातरिश्वा वायुर्दिवः स्वर्गादादित्यादाजभार आहृतवान्। 'हृग्रहोर्भश्छन्दसि' (पा० वा०) इति हस्य भत्वम्। तथाच लिङ्गदर्शनं 'आ दूतो अग्निमभवद्विवस्वतो वैश्वानरं मातरिश्वा परावतः' इति। अन्यं सोमं अद्रेर्मेघात् मंदरगिरेर्वा श्येन इन्द्रः परि समन्तादामथ्नात् मथित्वोत्पादितवान्। अम्मयत्वाद्धि सोमो मेघाज्जातः, अम्मयत्वं च सोमस्य भारते ख्यातम्। अथवा 'अमृतादुत्थितः सोमः' इति लिङ्गात्समुद्रनिर्मथनादुत्पन्नः सोमः। हे अग्नीषोमौ युवां ब्रह्मणा वेदेनाऽन्नेन च वावृधानौ वृद्धिं गतौ तेनोरुं महान्तं फलविशेषं यज्ञाय यजमानाय चक्रथुः कृतवन्तौ, उ लोकं च स्वर्गादिकं फलविशेषोपभोगाय चक्रथुः॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पांसुरे॥

इदं त्रिलोकीरूपं विष्णुर्व्यापकत्वाद्विचक्रमे

विशेषेणाक्रान्तवान् विजिग्ये, त्रेधा त्रिषु स्थानेषु दिवि अन्तरिक्षे क्षितौ पदं निहितवान्, चतुर्थं पदं पांसवो विद्यन्ते यत्र तत् पांसुरं तत्र समूढमज्ञानयोग्यं संजातं, अविद्यारजसि निमग्नमित्यर्थः । वैखरी, मध्यमा, पश्यन्ती, सूक्ष्मा चेति चत्वारश्चरणाः शब्दब्रह्मात्मनो विष्णोः । तत्राविद्याकल्पितविभागरूपेण वैखर्यादयः प्रतिभान्ति अविदुषां, न सूक्ष्मात्मकश्चतुर्थः ॥

प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥

विष्णुः प्रजापतिस्तत्सर्वं कर्म जगद्वा प्रस्तवते प्रस्तौति, विकरणस्यात्रालुक् 'बहुलं छन्दसि' इति बाहुलकत्वात्, आरभते इत्यर्थः। वीर्येण सामर्थ्येन । न-शब्द इवार्थे, मृग इव भीमः प्रसह्य करोति सिंहादिवदित्यर्थः । कौ चरति, क्व वा न चरतीति कुचरः । गिरिषु तिष्ठतीति गिरिष्ठा व्यापकत्वादेव । यस्योरुषु महत्सु विक्रमणेषु विश्वानि सर्वाणि भुवनान्यधिक्षियन्ति उपरि निवसन्ति, तं यजामहे

इति शेषः । विश्वेति 'शेश्छन्दसि बहुलम्' इति शेर्लुक् ॥

अग्नीषोमा सवेदसा सहूती वनतं गिरः । सं देवत्रा बभूवथुः ॥

हे अग्नीषोमौ सवेदसौ समानधनौ तुल्यहविष्कौ, सहूती समानाह्वानौ च सन्तौ वनतं भजतं गिरः स्तुतिरूपा वाचः । सं देवत्रा बभूवथुः । देवत्रा सम्भवतं सम्भावयतम् । देव एव देवत्रा 'पुरुदेवमनुष्येभ्यस्त्रा' यथा यजमानो देवो भवति, तथा कुरुतमित्यर्थः ॥

युवमेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तम् ।
युवं सिन्धूँरभिशस्तेरवद्यादग्नीषोमावमुञ्चतं गृभीतं स्वाहा ॥

हे सोम त्वमग्निश्च द्वौ युवां दिवि स्वर्गे रोचनानि ज्योतींषि व्यधत्तमाहितवन्तौ युष्मत्साधनकर्मणः[1] स्वर्गसंपत्तेः । कीदृशौ युवाम् । सक्रतू अनुभूयमानकर्माणौ समानयज्ञौ वा । किंच हे अग्नीषोमौ युवामेव सिन्धून् स्यन्दनानि अमुञ्चतं वृष्टिं सम्पादयतम् । कुतः । अभिशस्तेरवद्यात् । अभिशासोऽभिशस्तिः अवद्यं चोद्यं, तदाश्रयत्वान्मेघाभिशस्तिरवद्यं मेघस्थि-

---

१ 'णा' ख. ।

तानामपामनुजीवित्वादेवमुक्तम् (?) । अथवा अवदानीयः खण्डनीयो वायुर्मेघोऽवद्यः स चाभिशस्त इत्युक्तम् । अतो हविर्गृहीतं, तच्च सुहुतमस्तु ॥

इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः । तद्वां चेति प्र वीर्यम् ॥

हे इन्द्राग्नी दिवः स्वर्गस्य प्ररोचनौ दीपनौ येन वीर्येण वाजेषु संग्रामेषु परिभूषथः परिभवितुमिच्छथः शत्रून् । तद्वीर्यं वां युवयोः सम्बन्धि प्रचेति, लोडर्थे लेट्, प्रकर्षेण नो यज्ञं चिनोतु वर्धयतु रक्षत्वित्यर्थः ॥

उभा वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै ।
उभा दाताराविषां रयीणामुभा वाजस्य सातये हुवे वाम् ॥

त्रिष्टुप् । हे इन्द्राग्नी वां युवामुभौ द्वावाह्वयामीति शेषः । किमर्थम् । आहुवध्यै आहोतुम्, युवाभ्यामाहूताभ्यां होमं सम्पादयिष्यामीति बुद्ध्या । किंच उभावपि सहभूतौ राधसो मादयध्यै आह्वयामि हविर्लक्षणस्य मादयितुम् । उभावपि दातारौ इषामन्नानां रयीणां च धनानाम्, उभावपि वाजस्य सातये दा-

नाय हुवे आह्वयामि । 'षणु दाने' इत्यस्य क्तिनि 'ऊतियूतिजूतिसातिहेतिकीर्तयश्च' (३।३।९७) इत्यन्तोदात्तो निपातितः ॥

'ऋतुतिथिनक्षत्रदेवताश्च, यजेत' (१३सू०) इति व्याख्यातम् । ऋत्वादिदेवतानां ज्योतिःशास्त्रादिकान्निश्चयः कार्यः । अत्र स्थाने ऋतूनामित्यादिको ग्रन्थोऽमावस्याश्राद्धभाष्यात्परमस्ति, ऋतुतिथिनक्षत्रदेवताश्च ऋत्वादीनामेव सान्निध्यात् । सापेक्षत्वे वापि दोषः (देशः?) प्रधानस्य । तथाच मैत्रायणीयानामाम्नायः—ऋतुमिष्ट्वा ऋतुदेवतां यजेत तिथिमिष्ट्वा तिथिदेवतां यजेत नक्षत्रमिष्ट्वा नक्षत्रदेवतां यजेत । इह च सूत्रे जुहोत्यर्थो यजतिशब्दो यागस्य होमार्थत्वात् ॥

इह गावः प्रजायध्वमिहाश्वा इह पूरुषाः ।
इहो सहस्रदक्षिणो रायस्पोषः प्रजायताम् ॥

इहोत्तरस्यां च शिशुशैशवयोरार्षम् । हे गाव इह यजमाने प्रजायध्वम् । एवं हे अश्वाः हे पुरुषा इति समानम् । इह उ इति निपातस्तथाशब्दस्यार्थे । तथा इह यजमाने रायस्पोषो धनपुष्टिः प्रजायताम् । कीदृशः । सह-

स्रदक्षिणः सहस्रयज्ञसंपत्तियोग्यः, यावता सहस्रदक्षिणाः ऋतवः सम्पद्यन्ते, तत्प्रमाणः ॥

अयं यज्ञो वर्धतां गोभिरश्वैरियं वेदिः स्वपत्या सुवीरा ।
इदं बर्हिरति बर्हींष्यन्येमं यज्ञं विश्वे अवन्तु देवाः ॥

अयं प्रस्तुतो यज्ञो गोभिरश्वैश्च वर्धतां यजमानद्वारेण, तथा इयं वेदिः स्वपत्या शोभनपुत्रा यजमानद्वारेण, तथा सुवीरा विक्रमयुक्तपुत्रयुतेत्यर्थः। विस्तीर्णं बर्हिस्तदन्यानि बर्हींष्यतिक्रम्य वर्तताम् । इमं यज्ञं विश्वे सर्वे देवा अवन्तु रक्षन्तु आगच्छन्तु प्रीणयन्तु वा ॥

आ नः प्रजां जनयतु प्रजापतिर्धाता दधातु सुमनस्यमानः ।
संवत्सर ऋतुभिश्चाक्लृपानो मयि पुष्टिं पुष्टिपतिर्दधातु ॥

ऋषिपुत्राणामार्षम् । आ इत्युपसर्गस्य दधात्वित्यनेन संबन्धः । धाता प्रजामस्माकमादधातु, गर्भाधानं धाता करोतु । प्रजापतिश्च प्रजां पुत्रादिकं जनयतु । सुमनस्यमान इत्युभयत्रापि सम्बध्यते प्रसन्नमनाः सन् । संवत्सरश्च मयि अस्मासु पुष्टिं पोषं वृद्धिं दधातु करोतु वा । किं कुर्वाणः । ऋतुभिर्वसन्तादिभिश्चाक्लृपानः ऋतुरूपेण विवर्तमानः परिणतो

वा । चाक्लृपान इति लिटः कानजादेशो द्विर्वचनं च । यस्मादसौ पुष्टिपतिस्तदधीना स्थावरजङ्गमानां पुष्टिः, स ह्यार्तवैः स्वभावैः पुष्णाति जगत् ॥

धूर्भिरुपधूर्भिश्चोक्तम् । तत्र धुर इति अग्निर्मूर्धेति चतसृणामेव ब्राह्मणविदिता संख्या, तथाच ब्राह्मणं 'यासौ[1] धुरं गायति' इति । उपधुर इत्युपशब्दयोगात् उपप्रयन्त इत्याद्याश्चतस्रो याज्ञिक्याः ख्याताः । उभा वामिति त्रिष्टुबपि कृतभाष्या ॥

अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशे विशे ॥

आग्नेयी, जगती । अयमग्निरस्मिन् लोके धातृभिः प्रजापतिभिर्धायि आहितः प्रतिष्ठापितः, प्रथमः सर्गादिसमये । धायीति 'बहुलं छन्दसि' इत्यमाङ्योगेऽप्यडागमाभावः । अग्न्युपस्थाने चास्यार्थवादोऽस्ति 'अयमिह प्रथमो धायीति गर्भमेवैतं दधाति' इति । कीदृशोऽग्निः । होता 'अग्निर्वै देवानाम्' इति श्रुतेः, होता ऋत्वि-

---

१ 'यासां धुरं गायन्ति' क. ।

ग्विशेषः आह्वाता वा, अतिशयेन यष्टा यजिष्ठः। 'तुरिष्ठेमेयःसु' (६।४।१५४) इति तृचो लोपः। अध्वरेषु यागेष्वीड्यः स्तुत्यः। यमग्निमप्नवानप्रभृतय ऋषयो भृगुगोत्रसंभूता विरुरुचुर्विशेषेण रोचितवन्तः प्रदीपितवन्तः। कुत्र विरुरुचुः। वनेषु पानीयेषु समुद्रमध्य इत्यर्थः। चित्रं चायनीयं दर्शनीयं वाऽऽश्चर्यभूतं, विभ्वं व्यापकम्। यतो विशे विशे पुरुषे पुरुषे स्थितोऽसौ जाठरवह्निरूपेण। अत्रोत्तरार्धर्चार्थोपपादनार्थः इतिहास उपावर्ण्यते—हेहया नाम क्षत्रिया बभूवुः, भृगुगोत्रजाश्चाप्नवानप्रभृतयो ब्राह्मणाः। ते चोभयेऽपि कृतान्योन्यापराधाः प्रवृद्धवैराः। तत्र भृगवो यमनियमप्रधानाः कृशशरीरा अतिप्रवृद्धैर्निस्त्रिंशैर्हैहयैरस्त्रशस्त्रैर्निपातिताः, गर्भिणीनां च गर्भा व्यापादिताः, तत्र कयापि भार्गवपत्न्या योगव्याप्त्या गर्भो गोपनाय निजजठरादूरुमवदार्य रक्षितः। गते च भूयसि काले विस्मृतवैरेषु हेहयेषु ऊरुं विदार्य प्रकटितोऽतिप्रवृद्धतेजा और्वभृगुसंज्ञको भानुसमानतेजाः,

१ 'जस्त्वादयमेव प्रकटीभूतः और्वे' क.।

तेन च निजगोत्रक्षयकारिणो वैरिणो हेहयान्विनाशयितुं महान्कोपाग्निरुत्थापितः, ततः स्वर्गतैरप्नवानप्रभृतिभिः प्रत्यक्षीभूय निवारितोऽसावौर्वः 'भगवन्मा तपःक्षतिं कृथा हेहयवधेन, नचैतैर्वराकैः किंचिदस्माकं कृतं, निमित्तमात्रमेते यतः स्वकर्मफलेनैव वयं जीर्णशरीराणि वासांसीव विहाय स्वर्गं भोक्तुं परित्यक्तमानुषशरीराः संजाताः'। ततो हेहयेभ्यो निवारितोऽसौ वह्निः प्रलयाग्निनिर्विशेषस्त्रिलोकीं दग्धुं प्रवृत्तः, अनन्तरं भृगुभिः सागरे प्रक्षिप्तो वडवाग्निमुखोऽसावद्ययावज्जलधिजलं प्रलयीकुर्वन्नास्ते इति। स एव च दधिक्रावा प्रसिद्ध ऋगन्तरेषु। अन्यापि च ऋगस्ति—'और्वभृगुवच्छुचिमप्नवानवदाहुवे। अग्निं समुद्रवाससम्' इति॥

अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः।
तं जानन्नग्न आरोह ततो नो वर्धया रयिम्॥

हे अग्ने तवायं योनिः पृथिवीलक्षणोऽरणिरूपो वा अस्मत्प्रत्यक्षगम्यो योनिः कारणम्।

---

१ 'स्वगतो गतैः'।

अयमिति लिङ्गव्यत्ययः, यद्वा पुंस्यपि योनि-शब्दः क्वचिद्दृश्यते। ऋतुः प्राप्तोऽस्य ऋत्वियः, योनिर्हि ऋतौ गर्भं गृह्णाति स्त्रियाद्युदरे। यतो योनेर्जातः सन् अरोचथा विशेषेण रोचसे दीप्यसे प्रीयसे हविषा सन्तर्प्यमाणः, अतो हे अग्ने तं योनिं जानन् बुध्यमान आरोह, आ-रुह्य चारणिं पृथिवीं वा ततोऽनन्तरं नोऽस्माकं रयिं धनं वर्धय॥

उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये। आरे अस्मे च शृण्वते॥

चतसृणामप्युपधुरां देवानामार्षम्। वयम-ग्नये मन्त्रं वोचेम वदामः। किं कुर्वन्तः। अध्वरं यज्ञमुपप्रयन्त उपगच्छन्तोऽग्निद्वारेण। कीदृ-शायाग्नये। अस्माकं सम्बन्धिनं मन्त्रमारे निकटे वर्तमानानां शृण्वते॥

अस्य प्रत्नामनुद्युतं शुक्रं दुदुह्रे अह्रयः। पयः सहस्र-सामृषिम्॥

होमधेनुदोहेऽपीयं विनियुक्तेति गम्यते 'ऊध एवैतया करोति' इत्यर्थवादात्। अस्याग्नेरुप-योगार्थे शुक्रं शुक्लं पयः क्षीरं दुदुह्रे दुहन्ति।

१ 'योगात्' क.।

प्रत्नां पुराणमनुद्युतं द्योतमानं 'तेजो वै घृतम्' इत्यर्थवादात् । के दुहन्ति । अह्रयः न विद्यते ह्रीर्लज्जा येषां तेऽह्रयः, नित्यसत्कर्मप्रवृत्त्या येषां न कदाचिदपि लोके कुकर्मकृतिनिबन्धना लज्जा भवति, ते वेदार्थावगमानुष्ठानयुक्ता इत्यर्थः। कीदृशं पयः । सहस्रसां 'वन षण संभक्तौ' सहस्रशो विभज्यमानम् । 'ऋ गतौ' इयर्तीति ऋषिः, गन्तारं लिङ्गव्यत्ययेन ॥

कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते ॥

ऐन्द्री । बृहती । द्वितीया तु गायत्री वक्ष्यमाणा । अग्नेरार्षम् । हे इन्द्र त्वं कदाचिदपि स्तरीः हिंसकः सन् न दाशुषे दानशीलाय यजमानाय सश्चसि गच्छसि । उपोपेति समीपार्थो निपातसमुदायः। समीपं हिंस्रः सन् न गच्छसि यजमानस्य । शिष्टा निपाताः पादपूरणार्थाः। इत् नु इति अभ्यस्तौ। यतश्च[1] हिंस्रः सन् न यजमानमुपसर्पसि, ततस्तव[2] देवस्यान्यविलक्षणस्य भूयो बहु दानं यजमानेन दीय-

---

१ 'यच्च' क. । २ 'तदा' क. ।

मानं पृच्यते 'पृची सम्पर्के' सम्पृच्यते युज्यते त्वया सङ्गच्छते, भूयोभूयः पुनःपुनरिति वीप्सार्थो वा द्रष्टव्यः ॥

परि ते दूडभो रथोऽस्माँ अश्नोतु विश्वतः । येन रक्षसि दाशुषः ॥

हे इन्द्र ते तव यो दूडभो रथो, रंहणाद्रथः, दुष्टान् दभ्नाति हिनस्ति, दुःखेन वा दभ्यते परैरिति दूडभः। 'डश्च ऋतदामेषु' इत्युपसंख्यानाद्दस्य डत्वं पूर्वस्य च दीर्घः । सोऽस्मान् पर्यश्नोतु सर्वतो व्याप्नोतु रक्षार्थम् । विश्वतः सर्वतो येन रथेन दाशुषो यजमानान् रक्षसि ॥

इडामग्न इति स्विष्टकृतं जुहोति

इडामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूदस्मे[१] ॥

हे अग्ने इडामन्नं साध साधय । कस्मै । हवमानाय होममाह्वानं च कुर्वाणाय यजमानाय । कीदृशीमिडाम् । पुरुदंसं । पुरुशब्दो बहुपर्यायः, दंसस्शब्दः कर्मनाम, बहुकर्माणं बहुसिद्धियोग्यामित्यर्थः । सनिं गोः

१ 'भूत्वस्मे' इति चारायणीयशाखापाठः ।

'वन षण संभक्तौ' गवां संविभागस्य कर्त्रीम् । शश्वदतिशयेन भवतीति शश्वत्तममविच्छिन्नाम् । किंच स्यान्नः सूनुस्तनयो विजावा, अस्माकं सूनुः पुत्रो भवतु । विजायते इति विजावा क्वनिप् । पुनस्तनयग्रहणं बहुपुत्रार्थम्, विजावेत्यविच्छिन्नसंतानार्थम् । हे अग्ने सा ते तव शोभना मतिः भूत् भवत्वस्मेऽस्मासु, ययाऽन्नादिकं साधयसि[1] । पुरुदंसमिति छान्दसो वर्णलोपः । गोरिति व्यत्ययेनैकवचनम् । भूदिति तिङ्व्यत्ययः । 'बहुलं छन्दस्यमाङ्योगेऽपी'त्यडागमाभावः । अस्मे इति 'सुपां सुलुगि'ति शे आदेशः ॥

[2]त्वं नो अग्ने वरुणस्य विद्वान्देवस्य हेळोऽवयासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मे ॥

द्वे अप्याग्निवारुण्यौ त्रिष्टुभौ । हे अग्ने नोऽस्माकं कर्मवैगुण्यात् यो वरुणस्य हेळोऽनादरः कोपः संभाव्यते, तं त्वमवयासिसीष्ठा अपसारय । देवस्य द्योतनादिगुणकस्य । त्वं हि

---

१ 'यामि' ख. । २ 'त्वं नो अग्ने इति द्वाभ्यां जुहुयादया भूरिति च । त्वष्टो' क. ।

विद्वानभिज्ञस्तथा यजिष्ठो यष्टृतमो वह्नितमो वोढृतमो हविषाम् । शोशुचानो देदीप्यमानोऽतो विश्वा विश्वानि द्वेषांसि पापानि प्रमुमुग्धि मोचयाऽपसारयाऽस्मे अस्मत् ॥

स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।
अवयक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि ॥

छन्दोदेवते पूर्ववत् । हे अग्ने स त्वं नोऽस्माकं अवमो निकटवर्ती रक्षिता वा भव । ऊती ऊत्यै रक्षार्थम् । अवतेः क्तिनि वकारस्योठि निपातित ऊतिशब्दः, अवनमूतिः 'ऊतियूतिजूतिसातिहेतिकीर्तयश्च' (३।३।९७) इति सूत्रेण । नेदिष्ठोऽतिशयेन निकटः । अस्या उषसो रात्रेर्व्युष्टौ विनाशसमये[1] प्रभाते रक्षार्थं अवयक्ष्व अपसारय चास्माकं वरुणं पापं यदस्मानावृणोति आच्छादयति, रराणो ददत् गवादिकं, रममाणो वा । वीहि पिब आज्यं मृडीकं 'मृड सुखने' । सुहवो न एधि, अस्माकं सुखाह्वानः सुखहोमश्च भव । अस्तेर्लोटि हौ 'घ्वसोरेद्धावभ्यासलोपश्च' (६।४।११९) इत्येका-

१ 'ये अयोनामामेस्तनुः तस्य होमः प्रभाते' क. ।

रादेशे 'हुझल्भ्यो हेर्धिः' (६।४।१०१) इति धित्वे एधीति रूपम् ॥

अयाश्चाग्नेऽस्यनभिशस्तिश्च सत्यमित्त्वमया असि ।
अयासा मनसा कृतोऽयाः सन् हव्यमूहिषेऽया नो धेहि भेषजम् ॥

आग्नेयी । विष्टारत्रिष्टुप् । [1]हे अग्ने अयोनामासि अनभिशस्तिः अभिशासोऽभिशस्तिः पापं तत्प्रतिषेधोऽनभिशस्तिः अपापस्त्वमया असि भवसि इत्येतत्सत्यं, यतस्त्वमयासा गत्यतिशययुक्तेन मनसा प्रजापतिना कृतो जनितः। किंच त्वमयाः सन् हव्यमूहिषे हविर्वहसि देवानां प्रापयसि हविः। नह्यगतियुक्तस्य हविःप्रापणमुपपद्यते । तस्मादया भवसीत्यर्थः । अतोऽयाः सन् अस्मभ्यं धेहि भेषजं, कर्मवैगुण्यापसारेण यदौषधं तद्देहीत्यर्थः ॥

ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ स्वः स्वाहा ॐ भूर्भुवःस्वः स्वाहा ॥

प्रजापतेरार्षम् । भूरित्यनेन भूस्तदधिष्ठानाः सर्वा देवताः कथ्यन्ते । एवं भुव इत्यनेनान्त-

---

१ 'अयतीत्ययः, हे' ख. ।

रिक्षाश्रया वाय्वाद्याः, स्वरित्यनेन स्वर्गाधारा आदित्याद्याः । भूर्भुवःस्वरित्यनेन समुदिताः । 'अया भूरिति च' इत्यत्र भूरादीनामितिशब्देन प्रतीकः। तत्रेयम[1]पि सम्भवति–त्वं नो अग्ने वरुणस्य विद्वान् । व्याख्यातेयम् ॥

न्यूनमतिरिक्ते जुहोमि स्वाहा । अतिरिक्तं न्यूने जुहोमि स्वाहा । समं समे जुहोमि स्वाहा ॥

यन्न्यूनं मया कृतं कर्म, तस्यातिरिक्तेऽतिरिक्तत्वनिमित्तं पूर्णत्वनिमित्तं जुहोमि । यत्त्वतिरिक्तं कृतं, तस्य न्यूने न्यूनत्वनिमित्तं साम्यनिमित्तं जुहोमि । यत्समं कृतं, तस्यापि साम्यस्थितये विप्लवनिवारणाय जुहोमि ॥

अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथः ।
सर्वं तदग्ने कल्पय त्वं हि वेत्थ यथायथम् ॥

आ समन्तात् ज्ञातमाज्ञातं, तत्प्रतिषेधेनानाज्ञातं सर्वथा न बुद्धमित्यर्थः। आज्ञातं त्वीषज्ज्ञातं यन्मया क्रियते मिथः एकान्ततो, हे अग्ने तत्सर्वं त्वं कल्पय पूरय, यस्मात् त्वमेव वेत्थ जानासि यथायथं यथास्वम्। यथास्वे यथा-

---

1 'दमपि' क. ।

यथम्। त्वमेव हि प्रधानं कारकमतस्त्वदीयेनैव कृतेन कृतकृत्यत्वात् क्वास्मदादिगतं ज्ञातमुपयुज्यते इत्यर्थः । अथवा आज्ञातमनाज्ञातं वा गुरुणेति योज्यम् । अधीतवेदेन गुर्वनुज्ञातेनैव क्रियाः कर्तव्या यतः, तत्र चानाज्ञातमित्यनवक्लृप्त्योक्तं तव दोषाभावेन समाधानाय न्याय्यत्वात् ॥

स्विष्टिश्च दुरिष्टिश्च ये यज्ञमभिरक्षतः ।
प्रयाजानन्या नः पातु यज्ञमन्याभिरक्षतु ॥

शोभना इष्टिः स्विष्टिः । दुष्टा इष्टिर्दुरिष्टिः । अस्यां यज्ञादिरक्षायाम् असामर्थ्यात्समाधानार्थो प्रायश्चित्तेष्टिः दुरिष्टिरिष्टा । स्विष्टिर्यज्ञमभिरक्षतु दुरिष्टिश्च । अपरथा व्याख्या शोभना इष्टिर्यस्याः सा स्विष्टिः देवता, एवं दुरिष्टिः, सा यज्ञं रक्षतु सर्वथा यज्ञरक्षां करोतु अपराधं मा ग्रहीदित्यर्थः। एवं स्वरान्यत्वं प्रसज्यते, तस्मात् स्विष्टिदुरिष्टियोगाद्देवताप्रतिपत्तिः समर्थनीया । पूर्वव्याख्याने हीष्टिरिष्टिं रक्षत्वित्यर्थः स्यात्[1] नैतत् युज्यते । अथवा सोऽप्युपपादनीयः

---

१ 'स्यान्नातिप्रयुज्यते' क. ।

'यज्ञो वै प्रजापतिः' इति प्रजापतिरेव ज्ञेयः (यज्ञः?)। आत्मनैवात्मानं रक्षति प्रजापतिरविद्यायाः सकाशाद्विद्यारूपत्वात् । प्रयाजानन्या पातु, तयोर्मध्यादेका प्रयाजान् रक्षतु । अन्या यज्ञमवतु ॥

अत्रावसरेऽनाम्नाताः प्रायश्चित्तमन्त्राः सप्त साधु प्रसिद्धाः सन्ति 'मनो ज्योतिः' इत्यादयः॥

मनो ज्योतिर्जुषतामाज्यस्यारिष्टं यज्ञं समिमं तनोतु ।
इमं यज्ञं सप्ततन्तुं ततं न आ देवा यन्तु सुमनस्यमानाः॥
स्वाहा

मनः प्रजापतिर्ज्योतिः स्वप्रकाशरूपम् आज्यं जुषताम् । आज्यस्येति व्यत्ययेन षष्ठी, आज्यस्यांशमिति वाऽवयवावयविसम्बन्धे। इमं यज्ञं संतनोतु । कीदृशं यज्ञं संतनोतु। अरिष्टं रिशतिर्हिंसार्थोऽहिंसितम् । किं च इमं यज्ञं देवा आयान्तु ततं विस्तारितं, सप्ततन्तुं सप्त च्छन्दांसि तन्तव इव होत्रा वा । सुमनस्यमानाः प्रसन्नमनसः ॥

त्रयस्त्रिंशत्तन्तवो यान्वितन्वत इमं यज्ञं स्वधया ये ददन्ते ।
तेषां च्छिद्रं प्रति दध्मो यदत्र स्वाहायं यज्ञो अप्येतु देवान्॥
स्वाहा

स्वाहाकारः सर्वहोमेषु स्थितः स्वाहाकारप्रधानत्वाज्जुहोत्यर्थस्येति स्वाहाकारमध्यप्रवेशेन गम्यते । त्रयस्त्रिंशत्तन्तवो देवाः, ते हि देवा यज्ञं तन्वन्ति । अत एवाह–इमं यज्ञं स्वधयाऽन्नेन ये ददन्ते वितन्वते तेषां देवानां यदत्र यज्ञे च्छिद्रं यज्ञविध्वंसकारिणां प्रवेशस्थानं सम्यग्विधानवैगुण्यात् तत्प्रतिविदध्महे निवारयामो वयम् । केन । स्वाहा स्वाहाकारेण। अनया निर्दिष्टविशिष्टप्रायश्चित्तेष्ट्याऽतो निवारितविघ्नोऽयं यज्ञो देवानप्येतु आगच्छतु अपिशब्दान्मां शुभफलं प्रापयतु पूर्वः सन् ॥

यन्मे मनसश्छिद्रं यद्वाचो यच्च मे हृदः ।
अयं देवो बृहस्पतिः सं तत्सिञ्चतु राधसा ॥ स्वाहा

यन्मे मम मनसश्च च्छिद्रं वैगुण्यं, यच्च वाचो मन्त्ररूपायाः, यच्च हृदो जीवात्मनः, तत्सर्वमयं बृहस्पतिर्देवो राधसा अन्नेनाज्यलक्षणेन संसिञ्चतु निवारयतु प्रक्षालयतु ॥

विश्वकर्मा हविरिदं जुषाणः संतानैर्यज्ञं समिमं तनोतु ।
या व्युष्टा उषसो याश्च निम्रुचस्ताः संदधातु हविषा घृतेन ॥

विश्वकर्मा प्रजापतिरिमं यज्ञं संतनोतु

विस्तारयतु सम्यक्, इदं हविराज्यलक्षणं सन्तानैः प्रवाहैर्जुषाणः सेवमानः पिबन् वा। या उषसो रात्रिपश्चिमभागा व्युष्टाः 'उष दाहे' अतीताः, याश्च निम्रुचो 'म्रुच म्लुच गतौ' आगम्यः, ता घृतेन हविषा संदधातु तत्स्थानि कर्माणि विगुणान्यपि पूर्णानि करोत्वित्यर्थः। कः। प्रकृतो बृहस्पतिरेव॥

अयाश्चाग्न इति व्याख्याता। त्वं नो अग्ने इतीयमपि कृतभाष्या, स त्वं नो अग्ने इत्यपि विवृता॥

आश्रावितमत्याश्रावितं वषट्कृतमवषट्कृतमननूक्तमत्यननूक्तं च यज्ञेऽतिरिक्तं कर्मणो यच्च हीनमग्निष्टानि प्रविदन्नेतु कल्पयन्॥

इमामष्टमीं सर्वान्ते जुह्वति प्रायः, केचित्तु सप्तभ्यः प्राक्। आश्रावितमीषत्स्रावितं न्यूनं हुतमित्यर्थः। यच्चात्याश्रावितमतिरिक्तं स्रावितं पात्रातिरेकात्। वषट्कृतमित्यत्रापीषदर्थ आकारोऽपेक्षणीयः। यदीषत् वषट्कृतम्। अतिशब्द-

---

१ 'रात्रेः पश्चाद्भागाः' क.।

श्चापेक्षणीयः, यच्चातिवषट्कृतं, तथा यन्न वषट्कृतम्। अननूक्तमनुवाक्याविहीनम्, यच्चातिरिक्तं कर्मणो यच्च हीनम्, तानि सर्वाणि वैगुण्यान्यग्निः प्रकल्पयन् समादधत् एतु, आगच्छतु। प्रविदन् जानन्॥

इति पाकयज्ञवृत्तिः॥

धनं धनं देहि पुनीहि मह्यं लुनीहि पापेन्धनसंचयं च।
अकारणं वैरपराननार्यान् शत्रून्समस्ताञ्जहि जातवेदः॥

इति सप्तचत्वारिंशी काण्डिका॥ ४७॥

अथ

## अष्टचत्वारिंशी काण्डिका ।

अथ पुत्रेष्टिः

षडाहुतं प्रतिपदि पुत्रकामो ब्रह्मणाग्निः संविदान इति षड्भिराज्यस्य जुहोति उत्तराभिः षड्भिः स्थालीपाकस्य सौविष्टकृते त्रयोदशीम् ॥ १ ॥

'तस्मिन्पाकयज्ञाः' (४७।२) इत्युक्तम्, द्विविधाश्च नित्यकाम्यभेदेन पाकयज्ञाः । तत्र नित्याः पूर्वमुक्ता नियतकरणीयत्वात्, काम्यास्त्वधुनोच्यन्ते नियमकार्यत्वाभावात् । कामनानिमित्ता हि काम्याः । न च कामना नियमेन भवति सर्वस्य सर्वदा । षडाहुतयः आज्येने आदौ, षट् स्थालीपाकेनास्मिन्नित्यन्वर्थसंज्ञा षडाहुतमिति । तच्च प्रतिपद्येव कुर्यात् न जातुचित्पश्चदश्याम् । पुत्रकाम इत्यधिकारिनिर्देशः । ब्रह्मणाग्निः संविदान इति षड्भिर्ऋग्भिः । ये ते घ्नन्त्यप्सरस इत्यादिभिः स्था-

१ 'न षट्' क. ।

लीपाकेन जुहुयात् । सौविष्टकृते कर्मणि पुनस्त्रयोदशीमाहुतिं जुहुयात् । विशेषस्त्वत्र सौविष्टकृतमन्त्रस्य 'नेजमेष परापत' इति मन्त्रो नतु 'इडामग्ने' इति ॥

ब्रह्मणाग्निः संविदानो रक्षोहा बाधतामितः ।
अमीवा यस्ते गर्भं दुर्णामा योनिमाशये ॥ १ ॥

अनुष्टुप् । ब्रह्मण आर्षम् । रक्षोहा अग्निर्देवता । पुत्रकामनार्थे विनियोगः । स्त्री भण्यते—यस्ते तवाऽमीवा व्याधिः रोगो दुर्णामा दुष्टसंज्ञः कीटादिविशेषात्मको योनिं ग्रहणीम् आशये आगत्य शेते तिष्ठति गर्भविनाशाय, तमग्निर्बाधतामितो गर्भग्रहणस्थानादाकृष्य । कीदृशः । रक्षोहा रक्षसां हन्ता, संविदानो जानन् ब्रह्मणा सह वर्तमानो, हविर्वा ब्रह्म ॥

यस्ते गर्भममीवा दुर्णामा योनिमाशये ।
अग्निष्टं ब्रह्मणा सह निष्क्रव्यादमनीनशत् ॥ २ ॥

अग्निस्तं निरनीनशत् निःशेषेण नाशयतु । क्रव्यमाममांसमत्ति इति क्रव्यात् ॥

यस्त ऊरू विहरत्यन्तरा दम्पती शये ।
योनिं योऽन्तरा रेढि तमितो नाशयामसि ॥ ३ ॥

हे पुत्रकामे यस्तवोरू अन्तरा ऊर्वोर्मध्ये विहरति स्वप्नादौ रक्तकामादिसंज्ञको[1] ग्रहविशेषस्तथा दम्पती अन्तरा शये जायायाः पत्युश्च मध्ये शेते, यश्चान्तरा मध्ये योनिं रेढि गर्भबीजं पिबति, तमितः पुत्रकामायाः सकाशादपकृष्य नाशयामः ॥

यस्त्वा स्वप्नेन तमसा मोहयित्वा निपद्यते ।
आशां यस्ते जिघांसति तमितो नाशयामसि ॥ ४ ॥

स्वप्नरूपेण तमसाऽज्ञानेन वा यस्त्वां मोहयित्वा तन्निराकृतौ निरुत्साहां सम्पाद्य नितान्तं पतति उपभुंक्ते, यश्च तव पुत्राशां जिघांसति, तमस्मात् स्थानादपकृष्य दूरं नीत्वा नाशयामो होमैः ॥

यस्त्वा भ्राता पतिर्भूत्वा जारो भूत्वा निपद्यते ।
प्रजां यस्ते जिघांसति तमितो नाशयामसि ॥ ५ ॥

पतिरूपतां भ्रातृरूपतां जाररूपतामपरो मायया कृत्वा यो निपद्यते, तमितो नाशयामः ॥

यस्ते हन्ति पतयन्तं निषत्स्नुं यः सरीसृपम् ।
जातं यस्ते जिघांसति तमितो नाशयामसि ॥ ६ ॥

---

1 'रक्तकादि' क. ।

पतयन्तं पतन्तं गर्भग्रहण्यभिमुखमागच्छन्तं गर्भं यो हन्ति, यश्च निषण्णं तत्र हन्ति, तथा सरीसृपं सर्पन्तं हन्ति, तं नाशयामः ॥

एवमाद्येन षट्केन गर्भग्रहान् नानारूपान्विनाश्य उत्तरेण सुतलाभमभ्यर्थयन्ते

ये ते ग्रत्यप्सरसो गन्धर्वा गोष्ठ्या गेह्याश्च ये।
क्रव्यादमुत देविनं तमितो नाशयामसि ॥ १ ॥

अप्सु सरन्तीत्यप्सरसो जलचारिणः, गां धारयन्ते ये ते गन्धर्वाः, गोष्ठे भवा गोष्ठ्याः, गेहे भवा गेह्याः गर्भघ्नास्तान् सर्वान्नाशयामि। अन्यमपि कंचन क्रव्यादं, देविनं विजिगीषणशीलं नाशयामि। उतेति अप्यर्थे ॥

अभिन्नाण्डा वृद्धगर्भा अरिष्टजीवसूवरी।
विजायतां प्रजायतामियं भवतु तोकिनी ॥ २ ॥

अभिन्नाण्डा अविनाशिततोका सती प्रवृद्धगर्भा च विजायतामियं विविधान् पुत्रान् च प्रसूताम्। प्रसूता च सती तोकिनी पुत्रिणी भवतु। अरिष्टजीवसूवरी, 'रुषरिष हिंसार्थः' रिष्टं हिंसितं, न विद्यते रिष्टं येषां तेऽरिष्टाः, जीवन्तीति जीवाः, अरिष्टान् जीवान् च सूते

तच्छीला अरिष्टजीवसूवरी । 'अन्येभ्योऽपि दृश्यते' (३।२।७५) इति क्वनिप् ॥

विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ।
आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥ ३ ॥

विष्णुः प्रजापतिर्यज्ञस्तव योनिं कल्पयतु गर्भग्रहणयोग्यां सम्पादयतु । त्वष्टा आदित्यो रूपाणि लावण्यानि कान्तीः पिंशतु पिनष्टु, संचूर्ण्य लावण्यानि त्वयि प्रयच्छतु, लावण्यरसनिर्भरां त्वां सम्पादयतु । तथा प्रजापतिर्विश्वकर्मा आसिञ्चतु रेतः । धाता च गर्भं दधातु संपादयतु ते तव ॥

गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके ।
गर्भं ते अश्विनौ देवा आधत्तां पुष्करस्रजम् ॥ ४ ॥

हे सिनीवालि देवपत्नि गर्भं धेहि, पृथ्वी स्तुतिर्यस्या सा पृथुष्टुका सरस्वती, पृथुष्टुके सरस्वति गर्भं विधेहि, हे पुत्रकामे तवाश्विनौ देवभिषजौ चन्द्रादित्यौ गर्भं विधत्तम् । कीदृशम् । पुष्करस्रजं पद्ममालिनम् ॥

हिरण्ययी अरणी यं निर्मन्थतो अश्विनौ ।
तं ते गर्भं हवामहे दशमे मासि सूतवे ॥ ५ ॥

वयं तं गर्भं हवामहे आह्वयामः । किमर्थम् । दशमे मासि सूतवे सोतुम् । तुमर्थे तवेङ् । यमश्विनौ चन्द्रादित्यौ त्वरितरथाश्वयोगिनौ हिरण्ययमय्याविवारण्यौ द्यावापृथिव्यौ निर्मथीतः निर्मथ्योत्पादयतः, ताभ्यां हि सूर्याचन्द्रमसौ रसं तेजश्चाकृष्य जगज्जनयतः ॥

परं मृत्यो अनुपरेहि पन्थां यस्ते स्व इतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमि मास्याः प्रजां रीरिषो मोत वीरान् ॥ ६ ॥

त्रिष्टुप् । हे मृत्यो अस्याः स्त्रियः[1] प्रजां मा रीरिषः, मा च वीरान् हिंसीरिति अहं ब्रवीमि । चक्षुष्मते शृण्वते, यतस्त्वं चक्षुष्मान् कर्णयुक्तश्चाऽतो ब्रवीमि इत्यर्थः । अतश्चाहिंसार्थं परं दूरं पन्थानं अनुपरेहि परागच्छ । यस्ते स्वः पन्थाः । कश्चासौ । इतरो देवयानात्, पितृमार्गः । तत्रैव हि मृत्युः प्रभवति, न देवपथे तस्य मोक्षपात्रत्वात् । प्रजा दुहित्रादिकाऽत्र, वीराः पुत्राः । उतेति तथार्थे ॥

सौविष्टकृते त्रयोदशीमाहुतिं जुहोति

१ 'इति वा' क. ।

नेजमेष परापत सपुत्रः पुनरापत।
अस्यै मे पुत्रकामायै गर्भमाधेहि यः पुमान् ॥

सावित्रस्यार्षम्। हे नेजमेष अग्ने परापत परागच्छ दूरं व्रज, गत्वा च पुनरापत आयाहि सपुत्रः पुत्रेण सह, दूरमपि गत्वा काम्यमानं पुत्रमादायागच्छेत्यर्थः। ततोऽस्यै पुत्रकामायै गर्भमाधेहि आनीय गर्भरूपतां पुत्रं ग्राहयेत्यर्थः। यस्तु पुमान् गर्भो भविष्यति, नतु स्त्री ॥

इति पुत्रेष्टौ षडाहुतम् ॥

इत्यष्टचत्वारिंशी काण्डिका ॥ ४८ ॥

अथ

## एकोनपञ्चाशी काण्डिका ।

नक्षत्रयज्ञेषु नक्षत्रदेवतानामृचस्ताभिर्यजेताग्निर्मूर्धा हिरण्यगर्भो मरुतो यन्मृडानो रुद्र सुत्रामाणं तव श्रिये नमोस्तु सर्पेभ्य आहं पितॄन्सदा सुगो ये तेऽर्यमंस्तत्सवितुर्य इमे द्यावापृथिवी वायुरग्रेगा इन्द्राग्नी रोचना मित्रो जनानिन्द्रः सुत्रामा यं ते देवी शं नो देवीर्विश्वे देवा ब्रह्म जज्ञानं वषट् ते विष्णु आ मे ग्रहा इमं मे वरुणोपप्रागादहिरिव भोगैः पूषा गा अन्वेतु नः प्र वां दंसांसि यमो दाधारेति प्रत्यृचम् ॥१॥

इहाधिकफलविशेषान्तराश्रयणाद्विधिप्रत्ययमात्रश्रुतेश्च नित्यत्वं केचिन्नक्षत्रदेवतायज्ञानां वदन्ति, प्रतिपदि चानुष्ठानम् । अन्ये तु फलवत्सान्निधौ यदफलं तदङ्गमिति फलवतो विवाहस्यानतिदूरे सूत्रकृता कर्तव्यतया प्रतिपा-

दितत्वादगृहीतगर्भाया वध्वा उपकारकत्वेनाङ्गत्वमाहुः। अन्येऽन्यथा कथयन्ति—सन्ति नक्षत्रेष्टयः आहवनीयसाध्या वेदे काम्याः, कार्त्तिकामावस्यायां कृत्तिकास्वग्नये कृत्तिकाभ्योऽष्टाकपालमित्याद्याः। तत्र च युगपत्सर्वकामानवाप्नुयात् इति सर्वकामसिद्धिफलत्वेनाम्नाता एव गृह्याग्नावपि काम्यकर्मप्रस्तावेनोक्ताः। पुरोडाशानां स्थानेऽत्र चरवो व्रीहिमया यवमया वा अनिर्दिष्टद्रव्यविशेषे व्रीहियवशास्त्रस्य सर्वत्रोपस्थानात्। तथा गृह्यान्तरं 'तस्यै तस्यै चरवः' इति। अत एव काम्या अपीष्टयो गृह्याग्नौ कार्या ज्ञायन्ते तुल्यन्यायतया। अयं सूत्रार्थः—अष्टाविंशतिर्नक्षत्रदेवताः, वक्ष्यमाणाष्टाविंशल्लिङ्गिका ऋचः, ताभिर्नक्षत्रयज्ञेषु यजेत। कथम्। प्रत्यृचं ऋचं ऋचमिति, तेन यागभेदो द्रव्यदेवतासम्बन्धभेदानां भिन्नत्वात्। उक्तः पाकयज्ञ इहापि भवति। या ऋचोऽन्यत्र व्याख्यातास्ता इह न व्याख्यायिष्यन्ते॥

अग्निर्मूर्धा दिवः ककुत्पतिः०॥ कृ०॥ हिरण्यगर्भः समवर्तत०॥ रो०॥

व्याख्याते ॥

मरुतो यद्ध वो दिवः सुम्नायन्तो हवामहे । आ तू न उपगन्तन ॥ मृ० ॥

हे मरुतो यत् यदर्थं यस्मै कामाय । हशब्दोऽवधारणे भिन्नक्रमः । वो युष्मान् हवामहे आह्वयामो यदर्थं, तदर्थमेव तूर्णमागन्तन आगच्छत, कुतः स्थानात् युष्मान् आह्वयामः । दिवः स्वर्गात् । किं कुर्वन्तः सुम्नायन्तः सुखायन्तः सुम्नं सुखमिच्छन्तः । आगत्य च कामानस्माकं कामं साधयतेति शेषः । आ इति निपातः, तूर्णमिति च्छान्दसो वर्णलोपः । नोऽस्मान् ॥

मृडानो रुद्र० ॥ आ० ॥

सुत्रामाणं पृथिवीं द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिम् । दैवीं नावं स्वरित्रामनागसमस्रवन्तीमारुहेमा स्वस्तये ॥ पु० ॥

सोमयागवेद्यां कृष्णाजिनमनया आरोहयन्ति इहापि अग्निर्भूमिः स्तूयते । अहं पृथिवीमारुहेम आरोहामि । सुत्रामाणं, सुष्ठु त्रायते पालयति सुत्रामा ताम् । द्यां द्योतमानां विजिगीषुं क्रीडन्तीं वा । अनेहसमकोपनाम्, अह इति कोपनाम । सुशर्माणं शर्मेति सुखनाम सुसुखाम् ।

१ 'अग्निर्भूमिं' इति क. ख. ग. ।

अदितिं दैन्यशून्याम्[1]। सुप्रणीतिं शोभनं प्रणयनं व्रीह्यादिफलप्रापणं यस्यां ताम्। दैवीं दिव्याम्। नावं दुःखसागरतरणोपायम्। स्वरित्रामरिभ्यो रागादिदोषेभ्यः सुष्ठु त्रायते स्वरित्रा ताम्। अनागसमनपराधामदोषां वा। अस्त्रवन्तीमच्छिद्राम्। स्वस्तयेऽविनाशाय ॥

तव श्रिये व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदङ्गिरः। इन्द्रेण युजा तमसा परीवृतं बृहस्पते निरपामौब्जो अर्णवम् ॥ ति० ॥

बृहस्पतिर्वैद्युतोऽग्निरादित्यो वा। हे बृहस्पते तव श्रिये शोभायै पर्वतो मेघो व्यजिहीत ऊर्ध्वं व्यगच्छत्, वृष्ट्यर्थं मेघ उद्धावतीत्यर्थः। 'अर्व मर्व पर्व पूरणे' पूरयति वृष्ट्यादिना जगन्ति पर्वतः। कस्मान्मेघ उद्धावति वैद्युतस्याग्नेः श्रीः शोभा भवतीति चेत् तत्राह—यस्मात् हे अङ्गिरः बृहस्पते तस्मिन् सति गवामपां गोत्रं समूहमुदसृजः उत्कर्षेण सृष्टवानसि सृजसि वा। अङ्गानि रसयतीत्यङ्गिरा अग्निः, स चेह वैद्युत एव। किंच हे बृहस्पते त्वमपामर्णवं स्थानं निरौब्जः 'उब्ज आर्जवे' आदित्यो यदोर्ध्वकि-

1 'दैत्य' क.।

रणो गगनसमुद्राभिमुख्येन तिष्ठति, तदा मेघो वर्षति । श्रूयते हि 'असावादित्योऽवाग्रश्मिः पर्यावर्ततेऽथ वर्षति' इति । इन्द्रेण युजा इन्द्रेण सह, तमसा परीवृतमावृतमिति समुद्रविशेषणम् ॥

नमो अस्तु सर्पेभ्यो० ॥ अश्ले० ॥

आहं पितॄन्सुविदत्राँ अवित्सि नपातं च विक्रमणं च विष्णोः । बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः ॥ म० ॥

अहं पितॄन् आ अवित्सि समन्ताद्वेद्मि । कीदृशान् । सुविदत्रान् सुष्ठु विन्दन्तीति सुविदत्राः । तथा विष्णोर्यज्ञस्य विक्रमणं पराक्रमं वेद्मि, नपातं च नप्तारं पौत्रम् । यज्ञस्य हि पुत्रस्थानीयमपूर्वं, पौत्रस्थानं स्वर्गादिफलम् । अतो बर्हिषदः बर्हिषि वेद्यां सीदन्ति, त इहागमिष्ठा आगच्छन्तु । कीदृशाः । ये सुतस्य अभिषुतस्य सोमस्य पित्वः पितुनोऽन्नस्य, अथवा सुतस्य पुत्रस्य संबन्धिनः पितुनोऽन्नस्य भागं ये स्वधां भजन्ते त इहागच्छन्तु ॥

सदा सुगः पितुमाँ अस्तु पन्था मध्वा देवा ओषधीः

संपिपृक्त । भगो मे अग्ने सख्ये न मृध्या उद्रायो अश्यां सदनं पुरुक्षोः ॥ पूर्वाफा० ॥

ये ते अर्यमन्बहवो देवयानाः पन्थानो राजन्दिव आचरन्ति । तेभिर्नो अद्य पथिभिः सुगेभिः रक्षा च नो अधि च ब्रूहि देव ॥ उत्तराफा० ॥

ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ ह० ॥

य इमे द्यावापृथिवी जनित्री रूपैरपिंशद्भुवनानि विश्वा ।
तमद्य होतरिषितो यजीयान्देवं त्वष्टारमिह यक्षि विद्वान् ॥ चि० ॥

प्रजापतेरार्षम् । त्वाष्ट्री । त्रिष्टुप् । यस्त्वष्टा प्रजापतिर्विश्वकर्मा द्यावापृथिव्यौ जनित्री जनित्र्यौ कार्यविशेषाणां, रूपैर्विकारभेदैर्घटादिभिरपिंशत् संस्कृतवान् । अथवाऽत्यल्पमिदमुच्यते द्यावापृथिवीति । भुवनानि विश्वा योऽपिंशत्, समस्तानि भुवनानि त्रीणि सप्त चतुर्दश वा यः संस्करोति रूपैः नानाभूतैः । हे होतः अग्ने तं त्वष्टारमद्यास्मिन्नहनि त्वमिषितः प्रेषितः सन् यजसि । जानन् विद्वान् । यजीयानतिशयेन यष्टा । 'तुरिष्ठेमेयस्सु' इति तृचो लोपः ॥

वायुरग्रेगा यज्ञप्रीः साकंगन्मनसा यज्ञम् ।
शिवो नियुद्भिः शिवाभिः ॥ स्वा० ॥

वायुरग्रेगाः सर्वस्मात्सातिशयवेग इत्यर्थः । यज्ञं प्रीणाति यज्ञेन वा प्रीयते यज्ञप्रीः । साकं गच्छति साकंगत् मनसा यज्ञं, मनसा ग्रहयज्ञं गच्छतीत्यर्थः, संकल्पितमात्रं यज्ञं प्रापयतीत्यर्थः । शिवः श्रेयस्करः सर्वेषाम् । कैरग्रेगाः । नियुद्भिरश्वाभिः । कीदृशीभिः । शिवाभिः सुशिक्षिताभिः सुखकारिणीभिः ॥

इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः । तद्वां चेति प्र वीर्यम् ॥ वि० ॥

मित्रो जनान्यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्याम् । मित्रः कृष्टीरनिमिषाभिचष्टे मित्राय हव्यं घृतवद्विधेम ॥ अनू० ॥

मित्र आदित्यो जनान् यातयति यतमानान् प्रयुङ्क्ते, चेष्टाः कारयति ब्रुवाण इव गुर्वादिवत् । तथा मित्रः पृथिवीं धारयते, तथा द्यां दिवम् । किंच मित्रः कृष्टीर्मनुष्यान् अनिमिषितदृष्टिरभिचष्टे अभिमुखेन पश्यति, कः सुकृतं दुष्कृतं वा करोति फलेन योजयामीति । अतो मित्राय हव्यं हविर्विधेम दध्मः । कीदृक् । घृतवत्, अभिघारोपस्तरणाभ्यां हि चरोर्घृतवत्त्वम् ॥

इन्द्रः सुत्रामा स्ववाँ अवोभिः सुमृडीको भवतु विश्ववेदाः।
बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥ज्ये०॥

इन्द्रः परमेश्वरः प्रजापतिः, सुत्रामा सुष्ठु त्राता पालयिता, स्ववान् धनवान्, अवनमवोऽवोभिः रक्षणैर्नानाप्रकारैः सुमृडीकः सुसुखो भवतु संपद्यताम्। विश्ववेदाः सर्वधनः सर्वस्य वेदिता वा। बाधतां द्वेषः द्विष्टिः 'द्विषोऽसुन्' शत्रुकर्म बाधताम्। बाधयित्वा चास्माकमभयं कृणोतु। त्वत्प्रसादाच्च वयं सुवीर्यस्य शोभनस्य बलस्य पतयः स्वामिनः स्याम भूयास्म। भूयोऽर्थावबोधानुष्ठानादिशक्तिर्वीर्यम्॥

यं ते देवी निर्ऋतिराबबन्ध पाशं ग्रीवास्वविचर्त्यम्।
तं ते विष्याम्यायुषो नु मध्येथा विषितः पितुमद्धि प्रमुक्तः॥ मू०॥

निर्ऋतेरार्षं, नैर्ऋती, त्रिष्टुप्। यजमान उच्यते—हे यजमान ते तव निर्ऋतिर्दानवमाता ग्रीवासु गलेषु यं पाशं जरामरणप्रबन्धरूपसंसारात्मकम् आबबन्ध बद्धवती। कीदृशम्। अविचर्त्यं 'चृती च्छेदने' अच्छेद्यं, तं ते तव विष्यामि 'षिञ् बन्धने' विगतबन्धनं करोमि अनयाहुत्या। आयुषो नु मध्ये। नुरवधारणे। आयुषो

मध्ये जीवित एवेत्यर्थः । क्षिप्रार्थो वा नुशब्दः निश्चयार्थो वा । अथ पाशविमुक्त्यनन्तरं विषितः विगतपाशबन्धनः सन् पितुमद्धि अन्नं नित्यानन्दात्मकं भुङ्क्ष्व, विशेषेण मुक्तः सन् ॥

शं नो देवीरभीष्टय आपो भवन्तु पीतये ।
शंय्योरभिस्रवन्तु नः ॥ पूर्वाषा० ॥

विश्वेदेवा ऋतावृध ऋतुभिर्हवनश्रुतः ।
जुषन्तां युज्यं पयः ॥ उत्तराषा० ॥

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः ।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः
॥ अभि० ॥

गविष्ठिरस्यात्रेयस्यार्षं, ब्राह्मी, त्रिष्टुप् । हिरण्योपधाने विनियुक्ता । ब्रह्म जज्ञानं प्रथमं पुरस्तादिति ह रुक्ममुपदधातीति, इह तु नक्षत्रदेवतेष्टौ विनियोगः । ब्रह्मा आदित्यो वा तद्विवर्तो ब्रह्मात्रोच्यते । ब्रह्म आदित्यरूपं जज्ञानं जायमानं पुरस्तात् पूर्वदिनादौ विसीमतो निर्मर्यादं सुरुचः शोभनदीप्तीन् चन्द्रादीन् आवः 'वृञ् आवरणे' आवृतवान् अभिभूतवान् । वेनः कान्तः । ब्रह्मण्यपि विवर्तपरिणामोपक्रमापेक्षया योज्यम् । अत्र सुरुचो जीवात्मानः, तान् आवृतवान् । स

ब्रह्मा आदित्यो वा सत उत्कृष्टस्य, असतश्च हीनस्य योनिं धर्माधर्मरूपं विवः विवृतवान्, उत्तममध्यमहीनं कार्यकारणजातं प्रकाशितवानित्यर्थः। तथा बुध्न्या उपमा विवः, बुध्ने अन्तरिक्षे भवा बुध्न्या आपो विवृतवान् आदित्य उपमा उत्कृष्टाः, तथास्य लोकस्य विष्ठा विविधमवस्थिता दिशो विवृतवान्। ब्रह्मण्यप्येवं योज्यम्॥

वषट् ते विष्ण आस आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम्।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः॥
आ मे ग्रहो भवत्वा मे भवतु पुरोरुक्।
आ मे विशतां स्तोत्रशस्त्रे समीची॥ ४० ॥

आभवतु मम यज्ञे ग्रह ऐन्द्रवायवादिः, आभवतु मम च पुरोरुक् ग्रहग्रहणार्थो मन्त्र 'आ वायो'इत्यादिकः। आविशतां च स्तोत्रशस्त्रे। कीदृशी। समीची संमुखे सहाञ्चने वा[1]॥

आ मे गृहा भवन्त्वा प्रजा म आ मा यज्ञो विशतु वीर्यवान्। आपो देवीर्यज्ञिया माविशन्तु सहस्रस्य मा भूमा मा प्रहासीत्॥ ४१ ॥

मे मम गृहा आ भवन्तु, तथा प्रजाः पुत्राद्याः

---

१ 'आविशतु' क. ख.। 'वा। प्रगीतेन मन्त्रेण गुणिगुण्यविधानं स्तोत्रम्, अप्रगीतेन शस्त्रम्' क.।

आ भवन्तु, मम यज्ञश्च मामाविशतु वीर्यवान् शक्तिमान्, तथा आपो देव्यो यज्ञं मदीयमाविशन्तु स्वकार्यव्रीह्यादिद्वारेण स्वरूपेण च प्रणीतादिद्वारेण। किंच सहस्रस्य भूमा मां मा प्रहासीत् सहस्रसंख्यस्य गोसुवर्णादेर्यो भूमा सहस्रादपि यदधिकं लक्षादिसंख्यं सुवर्णादिकं, तन्मां मा त्याक्षीत् ॥

इमं मे वरुण श्रुधी हवमद्या च मृडय ।
त्वामवस्युराचके ॥ श० ॥

हे वरुण इमं हवमाह्वानं मम श्रुधि शृणु, अद्य चास्मिन्नेवाहनि मृडय च सुखय च मां, यस्त्वामवस्युराचके, अवनमवः अवमिच्छन्नवस्युः त्वत्तो रक्षणमिच्छन्नहं त्वामाचके पश्यामि ॥

उपप्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः।
अजः पुरो नीयते नाभिरस्यानु पश्चात्कवयो यन्ति रेभाः ॥ पूर्वभा० ॥

अश्वमेधेऽधिगम्यमानस्याश्वस्य स्तुतिरियम्, इहापि भक्त्या चरोरुदिता । अश्वो ह्यश्नोतेर्व्याप्तिकर्मणः, अशनं व्यापनं वीर्यविशेषस्य तत्प्रभवत्वात्[1]। वाजी अश्वः शसनं विशसन-

1 'तत्प्रभावत्वात्' ख. ।

मुपप्रागात्, विशसितोऽश्व इत्यर्थः। कीदृशो वाजी। इयर्तीत्यर्वा वेगवान्। अन्यच्च कीदृशः देवद्रीचा देवप्रापकेण देवानां[1]मायत्तेन मनसा दीध्यानो दीप्यमानः प्रकाशमानः शोभमान इति यावत्। यज्ञविशेषोपयोगेन ह्यश्वस्य देवत्वप्राप्तिर्भवति। स्मर्यते हि

'यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयम्भुवा।
यज्ञाय निधनं प्राप्ताः संप्रयान्त्युच्छ्रितीः पराः॥'
(मनुस्मृ० ५।३९)

इति। अजः पुरो नीयते नाभिरस्य, अस्याश्वस्य पुरोऽग्रे अजो नीयते विशस्यते नाभिरिव, यथा नाभिरस्य जीवादुत्खिन्नवपारूपेण पूर्वं नीयते तथाज इत्यर्थः। अनु पश्चात् कवयो यन्ति रेभाः, अस्याश्वस्य विनाशात्पश्चाद्रेभा ऋत्विजोऽनुयन्ति गच्छन्ति प्रचरन्ति। कीदृशा रेभाः। कवयः क्रान्तदर्शनाः पाठकाश्च याज्यादेः॥

अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः। हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान् पुमांसं परिपातु विश्वतः॥ उत्तराभा०॥

अश्वमेधे बद्धगोधाङ्गुलित्राणो गृहीताधि-

---

[1] 'नां वा' क.

ज्यधनुरनेनोच्यते, इहाप्यनेन होमे अदृष्टापूर्वविशेषद्वारेण यथाभिमतकामसिद्धिर्भवति । गोधासंज्ञकं बाहुत्राणं बाहुं पर्यैति वेष्टयति अहिरिव भोगैः शिरोभिः । किं कुर्वाणो बाहुत्रः बाहुं पर्यैति ज्याया गुणस्य हेतिमभिघातं परिबाधमानो निवारयन् । अयं च हस्तघ्नो गुणः पुमांसं यजमानं परिपातु विश्वतः सर्वस्मात् । कीदृशः । विश्वा वयुनानि विद्वान्, सर्वाणि वयुनानि प्रज्ञानानि तन्निमित्तानि कर्माणि वा जानन् ॥

पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः ।
पूषा वाजं सनोतु नः ॥ २० ॥

प्र वां दंसांस्यश्विनाववोचमस्य पतिः स्यां सुगवः सुवीरः ।
उत पश्यन्नश्नुवं दीर्घमायुरस्तमिवेज्जरिमाणं जगम्याम् ॥अ०

हे अश्विनौ वां युवयोः संबन्धीनि दंसांसि कर्माणि अहं प्रावोचं भणामि । किम् । अस्य जगतः पतिः स्वामी अहं स्यां भूयासं युष्मत्प्रसादात्, तथा सुगवः शोभना गावो यस्य स सुगुरिति प्राप्ते सुगवश्छान्दसः, सुवीरः शोभनपुत्रयुक्तः, उत अपि च पश्यन् अविकलेन्द्रियः सन् दीर्घमायुरश्नुवं प्राप्नुयाम् । जरि-

माणं जगम्यां जराजर्जरितत्वं च प्राप्नुयाम् । इच्छब्दः पादपूरणार्थः । यथादित्यः परिपूरितावधिरेवास्तं गच्छति, नासमये, तथा ममायुर्भूयादित्यर्थः ॥

यमो दाधार पृथिवीं यमो द्यामुत सूर्यम् ।
यमाय सर्वमित्तस्थे यत्प्राणद्वायुरक्षितम् ॥ भ० ॥

यमो वैवस्वतः पृथिवीं दाधार दध्रे उत अपिच द्यां स्वर्गं सूर्यं चान्तरिक्षं लोकं दध्रे । यमाय सर्वमित्तस्थे यमस्य वशे सर्वमेव स्थितम् । किं तत् । यत्प्राणद्वायुरक्षितं, प्राणादिरूपेण वायुना यद्रक्षितं जीवरूपमित्यर्थः ॥

इति ग्रहयज्ञः ॥

सर्वैः स्वजन्मदिवसे स्नातैर्मङ्गल्यपाणिभिः ।
गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः ॥
स्वनक्षत्रं च पितरस्तथा देवः प्रजापतिः ।
प्रतिसंवत्सरं यत्नात्कर्तव्यः स महोत्सवः ॥

इति नक्षत्रयज्ञो व्याख्यातः ॥

इत्येकोनपञ्चाशी काण्डिका ॥ ४९ ॥

अथ

पञ्चाशी काण्डिका।

अथोपहाराः ॥ १ ॥ यथाचरितमन्नं साधयित्वा सावित्रेण देवतायै बलिं हरेत् ॥ २ ॥ यथाचारं जपाः ॥ ३ ॥ उक्तः शेषः ॥ ४ ॥

अथशब्द आनन्तर्ये । हुतपाकयज्ञविधिरुक्तः, अनन्तरमहुतपाकयज्ञेषु वक्तव्येषु सर्वाहुतपाकयज्ञप्रकृतिभूता उपहारा उच्यन्ते इत्यर्थः । वैश्रवणीये ह्युपहारा दृष्टास्ते अन्येषां प्रकृतयः । तथा चाचारतोऽपि देशविशेषादिषु यथायथं प्रसिद्धाः । अतो यथाचारं यथादेवतं चान्नं पायसक्तुसरापूपादिकं साधयित्वा दीपपुष्पधूपादिपूर्वकं सवितृदेवताकेनोहितचतुर्थ्यन्ताभिमतदेवतानामान्तेन 'विनायकायोपहारम्' इत्याद्यूहकल्पनया बलिमुपहरेत् । आचारानतिक्रमेण जपाः, यस्यै देवतायै बलिरुपह्रियते, तद्दैवतैर्मन्त्रैर्जपाः कर्तव्या इत्यर्थः । अ-

भिमतदेवतालिङ्गकमन्त्रालाभे तु लौकिकेन श्लोकादिनोपहारः कर्तव्यः। उक्तः शेष इति उपहृतशेषेण ब्राह्मणान् भोजयेत्, अद्याश्वे-त्यादिः शेषः ॥ १-४ ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ता-भ्याममुकदेवतायै बलिमुपहरामि ॥

व्याख्यातम् ॥

इति पञ्चाशी काण्डिका ॥ ५० ॥

अथ

एकपञ्चाशी काण्डिका।

**अथ पशुकल्प उक्तः ॥ १ ॥**

कल्पनं कल्पो विधिः, पशोः कल्पः पशु-कल्पः। स उक्तः। क उक्तः। आधाने 'आग्नेयेन स्थालीपाकेन पशुना वा यजेत'(४६।१०) इति। सोऽयं नित्यः पशूपहारः उक्तः। यथैव हि नवान्नेनाग्रायणमकृत्वा तद्भोजनमनुपपन्नं, तथा मांसेनानिष्ट्वा मांसभक्षणमप्ययुक्तमित्याहुः। अ-थशब्द आनन्तर्ये। तस्येतिकर्तव्यतां वक्ष्याम

इत्यध्याहारः । तेनायं समूहार्थः—हविष्यकल्पश्चोक्त एवाग्न्याधाने, तत्रेष्टिविकाराणां हविष्कल्पानां प्रकार उक्तः, अनन्तरं पशुविकारस्य पशुकल्पस्य प्रकारं वक्ष्यामः ॥ १ ॥

पूर्वेण शाखां निहत्य ॥ २ ॥

पूर्वेण मूलमन्त्राणामुक्तः स उक्त एवेह यथोक्तः पूर्वेणाधिकारवाक्येन तत्र तत्र यथा नवेनानर्चिता ह्यस्य पशुना वाग्नय इति अतोऽसौ मत्स्यपशुना यजेतेति । तथेत्याद्युक्तम् अग्नये पशुना यजेत पुनः पूर्वेण शाखां निहत्येति सूत्रभेदो यथान्यैः कृतः यथा पूर्वस्मिन्पक्षे कस्य पूर्वेणेति संशयः स्यात्, पूर्वेणाग्निमिति च नाधीतम् । नचोपयुज्यते उक्तः पूर्वेणेति सर्वस्य सिद्धत्वात् । पशुग्रहणाच्छाग एव । शाखावचनात्तक्षणादयो यूपधर्मा न भवन्ति तत्स्थाने प्रयुक्तायाः शब्दान्यत्वात् ॥२॥

तस्मिंस्तूष्णीं सर्वम् ॥ ३ ॥

तस्मिन् पशौ तद्वद्विक्रियमाणेऽपि यदुच्यते तत्तूष्णीं सर्वं भवति । सर्वं यत्कर्तव्यं तत्तूष्णीममन्त्रकं कुर्यात् ॥ ३ ॥

यन्न लुप्तार्थम् ॥ ४ ॥

लुप्तार्थं तत्तूष्णीमपि न भवति। यथा शाखायां तक्षणम् ॥ ४ ॥

विकारेषु चोदितमिति वचनात्सर्वं तूष्णीं प्राप्तमित्यपवादमाह

देवताहोमवर्जमिति ॥ ५ ॥

यद्देवतासंबद्धं तत्समन्त्रकं देवतानाम्ना वा कर्तव्यं, होमश्चेत्यर्थः ॥ ५ ॥

प्रागाज्यभागाभ्यां दर्भेषु पशुमुपाकरोति प्रोक्षति पाययति पर्यग्निं करोति ६

परिसमूहनादिराष्ट्रभृदन्तं कृत्वा प्रागाज्यभागाभ्यां दर्भेण पशुमुपाकरोति तूष्णीं प्रोक्षति च तथा पाययति पयः। पर्यग्निं च करोति पशुम्। दर्भग्रहणं शाखानिवृत्त्यर्थम्। प्रागाज्यभागाभ्यामुपाकरणीयहोमौ प्रजापतेर्जायमान इति द्वाभ्यां कर्तव्यौ। ततो दर्भेण पशूपाकरणम्। शाखान्ते प्रत्यङ्मुखं पशुमुपस्थाप्य रशनादानं तूष्णीम्। 'ऋतस्य त्वा' इत्यादिना 'अग्नये जुष्टं बध्नामि' इति पूरितेन

दक्षिणेऽर्धशिरसि पशुं बध्नाति, शाखायां तूष्णीं पशुं बध्नाति छागम् ॥ ६ ॥

घृतमवघ्राप्यापाव्या जुहोति ॥ ७ ॥

पशुं घृतमाघ्राप्य अपाव्यसमाख्याता आहुतीर्जुहोति । तेनैव घृतेन 'प्रजानन्त' इति पञ्चभिः ॥ ७ ॥

उल्मुकं हरति ॥ ८ ॥

येन पर्यग्निकरणं कृतं तदेवोल्मुकं हरति पानार्थम् ॥ ८ ॥

दर्भमास्तृणाति ॥ ९ ॥

दर्भास्तरणं तूष्णीं करोति ॥ ९ ॥

तस्मिन्यथोक्तं संज्ञपयन्ति ॥ १० ॥

तस्मिन्दर्भे संज्ञपयन्ति मारयन्ति । बहुवचनेन नासिकादिग्रहणादिना प्रत्यक्शिरसमुदक्पादमित्यादि ज्ञायते ॥ १० ॥

संज्ञप्ते यथोक्तमद्भिः प्राणायतनानि स्नापयति ॥ ११ ॥

प्रमापिते सति प्राणस्य शरीरस्य वायोर्या-

न्यायतनानि मुखादीनि, तानि स्नापयति। यथोक्तग्रहणात् पत्न्या स्नापनं ज्ञायते ॥ ११ ॥

उत्खिद्य वपां शाखां विशाखां च प्रच्छाद्य चरमेऽङ्गारे वपां निगृह्यान्तरा शाखाग्नी हृत्वाभिघार्य श्रपयति ॥ १२ ॥

ततो नाभिक्रोडयोर्मध्याद्वपामुत्खिन्दति खड्गेन देवताभिधानत्वात् 'अग्नये त्वा जुष्टमवकृन्ता' इति मन्त्रेण। उत्खिद्य च वपाश्रपण्यौ शाखया प्रच्छादयति, ततश्चरमेऽङ्गारे वपां निगृह्णाति, उत्तरभागे सर्वान्ते योऽवस्थितोऽङ्गारस्तत्र निदधातीत्यर्थः। ततस्तां शाखाया अग्नेश्च मध्येनाहरति दक्षिणं भागमानयतीत्यर्थः। ततो दक्षिणभागमानीयोदङ्मुखोऽभिघार्य श्रपयति ॥ १२ ॥

श्रृतां दर्भेषूदगग्रेषु निधायाज्यभागपरिवप्यौ हुत्वा वपां देवताया उपनामयेत् ॥ १३ ॥

ततः श्रृतां वपामुदगग्रेषु दर्भेषु निदधाति तदनन्तरमाज्यभागौ जुहोति ततः परिवप्य-

संज्ञकावन्वर्थकौ होमौ जुहोति । तत्र जातवेदो वपया गच्छेत्येकः, देवेभ्यः स्वाहा इति द्वितीयः स्रुवेणाज्येन । तदनन्तरं वपां देवताया उपनामयेत् । अयमर्थः—जुह्वा वपामुपस्तीर्य दक्षिणतोऽसिना सकृदवदाय देवतायै दद्यात् तन्नामधेयेन, तद्देवतया वर्चा ॥ १३ ॥

उप्यपरिवप्यौ हुत्वा सदर्भे वपाश्रपण्यावग्नौ अनुप्रहृत्यापोहिष्ठीयाभिर्मार्जयित्वोक्तान्यवदानानि प्राक्स्विष्टकृतो देवतायै बलिमुपहरेत् ॥ १४ ॥

उप्यो नाम होमः, परिवप्यश्च दर्शितो 'जातवेदो वपया गच्छ' इति 'देवेभ्यः स्वाहा' इति। तौ हुत्वा प्रतिपत्त्यर्थं वपाश्रपणार्थदर्भसहिते वपाश्रपण्यावग्नौ क्षिपति तूष्णीम् । तत आपोहिष्ठीयाभिर्मार्जनं तत्रैव करोति चत्वालस्य लुप्तार्थत्वे पात्राभावात् । तदनन्तरं प्रकृतौ यथाचोदितानि हृदयादीन्यवदानानि स्विष्टकृतः पूर्वं बलिमुपहरेत् । तत्र हृदयस्य शूले पाकः, शिष्टानां स्थाल्याम् । द्विर्द्विरवदाय होमो

हृदयादिभ्यः । तानि तु हृदयजिह्वाक्रोडमध्यदक्षिणबाहुपार्श्वद्वयगुदश्रोणिमेदोमध्यानि । ततः पशुपुरोडाशस्थाने यथादैवतमुपहारेषु चरुमोदकादीनामन्यतमः कार्यः ॥ १४ ॥

**यथाचारं जप उक्तः शेषः ॥ १५ ॥**

गतार्थम् ॥ १५ ॥

अथ मन्त्रविवृतिः । तत्रोपाकरणीयहोममन्त्रौ

प्रजापतेर्जायमानाः प्रजा जाताश्च या इमाः ।
ता अस्मै प्रतिवेदय चिकित्वाँ अनुमन्यताम् ॥

उपाकर्त्रोच्यते—प्रजापतेः सकाशात् जायमानाः इमा वर्तमानाः प्रजाः, याश्च जाता अतीतोत्पत्तिक्रियाः, ताः सर्वा अस्मै पशवे प्रतिवेदय बोधय, यस्य यादर्थ्येनोत्पत्तिस्तं तथा प्रतिपादय 'यज्ञार्थं पशवः सृष्टाः' इत्यादिरूपेण। त्वं हि चिकित्वान् जानानोऽभिज्ञः । त्वया च बोधितं पशुं मन्यमानमनुमन्यतां प्रजापतिः सत्यमनुजानात्वित्यर्थः ॥

पशुपतेः पशवो विरूपा सरूपा उत ।
तेषां यं वव्रिरे देवास्तं स्वराडनुमन्यताम् ॥

पशुपते रुद्रस्य सरूपा विरूपाश्च पशवः यागे

योग्याश्चायोग्याश्चेत्यर्थः, उतशब्दश्चार्थे, तेषां मध्ये यं छागादिकं पशुं देवा वव्रिरे वृण्वन्ति प्रार्थयन्ते तमेव स्वराट्, स्वयं राजते इति स्वराट्, प्रजापती रुद्रोऽनुमन्यतामभ्युपागच्छतु ॥

अपाव्या जुहोति

प्रजानन्तः प्रतिगृह्णन्ति पूर्वे प्राणमङ्गेभ्यो अधिनिश्चरन्तम् ।
हुतो याहि पथिभिर्देवयानैरोषधीषु प्रतितिष्ठा शरीरैः ॥

अपाव्यानां देवानामार्षम् । पशूनां यज्ञेषूपयुक्तानां स्वर्गतिरिह प्रशस्यते । पूर्वे देवाः प्रकृतस्य आलब्धस्य पशोः प्राणमङ्गेभ्योऽवयवेभ्यो निश्चरन्तमेव निर्गच्छन्तमेव प्रतिगृह्णन्ति स्वीकुर्वन्ति । कीदृशाः पूर्वे । प्रजानन्तः अस्मदर्थं प्रजानन्तः अस्मदर्थमालब्धोऽयमिति मन्यमानाः । अतः पशुरुच्यते—इदानीं हुतोऽग्नौ प्रक्षिप्तावदानः सन् स्वर्गं याहि पथिभिर्मार्गैः । कीदृशैः । देवयानैर्यैर्देवा यजमानानायान्ति, त्यक्तप्राणैश्च शरीरैः शरीरावयवैः प्रतितिष्ठ ॥

ये बध्यमानमनुबध्यमाना अन्वैक्षन्त मनसा चक्षुषा च ।
अग्निष्टाँ अग्रे प्रमुमोक्तु देवः प्रजापतिः प्रजया संविदानः ॥

ये पशवो बध्यमानमनुबध्यमाना लक्षणी-

कृत्य पश्चाद्बध्यमानाः सन्तः अन्वैक्षन्त पश्यन्ति चक्षुषा मनसा च, तानप्यग्रे प्रथममग्निः प्रमुमोक्तु दुःखान्मोचयतु देवत्वमापादयतु मुक्तिं वा। एतदुक्तं भवति—यज्ञपरम्परया मम यजमानस्य स्वर्गतिर्भवतीत्येतावद्वेदाद्व्याहृतसिद्धम्। इदं त्वभ्यर्थयामहे अस्मदर्थेन क्लेशमनुभवन्ती पशुपरम्परा स्वर्गतिमनुभवतु संपन्नदिव्यदर्शना सती अग्निप्रसादात्। कीदृशोऽग्निः प्रजापतिः प्रजानां पाता, दुःखविमोचनं च प्रजानां पालनम्। अन्यच्च कीदृशः। प्रजया संविदानः, 'विद्लृ लाभे' प्रजया जनितरक्षया प्रजापतित्वं लभमानः॥

य आरण्याः पशवो विश्वरूपा विरूपाःसन्तो बहुधैकरूपाः।
वायुष्टाँ अग्रे प्रमुमोक्तु देवो विश्वकर्मा प्रजया संरराणः॥

ये आरण्याः पशवः सिंहादयो विश्वरूपाः सर्वरूपाः, विरूपा विविधरूपाः सन्तो बहुधैकरूपा बहुधा नानाप्रकारेण हरिणत्वाद्यवान्तरजातिभेदेनैकरूपा अनुगताकाराः, अथवा बहुधा सिंहहरिणादिरूपेण विरूपा अपि सन्तः पशुत्वेनैकरूपाः, तान्सर्वानपि अग्रे प्रथमं

प्रमुमोक्तु तज्जातेरुपकारकत्वात् । विश्वं कर्तव्यं यस्य स विश्वकर्मा प्रजापतिरूप इत्यर्थः । प्रजया संरराणः सम्यग्रममाणः क्रीडन् प्रजासर्गस्थितिप्रलयैः, तेन प्रजापतेः सृष्ट्यादिना किं प्रयोजनमित्यपर्यनुयोगः ॥

येषामीशे पशुपतिः पशूनां चतुष्पद उत ये द्विपदः ।
निष्क्रीतास्ते यज्ञियं भागयन्तु रायस्पोषा यजमानं विशन्तु ॥

ये चतुष्पदः पशवोऽजादयः, उत तथा द्विपदः कपिञ्जलादयः निष्क्रीताः क्रीतनिश्चयं संप्राप्ताः ते, यज्ञमर्हति यज्ञियस्तं भागयन्तु यज्ञार्हावदानानि भागरूपतां प्रापयन्तु, रायस्पोषाः धनपुष्टियुक्ताः सन्तः यजमानं विशन्तु । के ते पशवः । येषां पशूनां पशुपती रुद्र ईशे प्रभवति ॥

प्रमुञ्चमाना भुवनस्य रेतो गातुं धत्त यजमानाय देवाः ।
उपाकृतं शंसमानं यदस्थात्प्रियं देवानामप्येतु पाथः ॥

हे देवा ऋत्विजः प्रमुञ्चमानाः पशूनां दुःखविमोकं कुर्वन्तः यजमानाय गातुं यज्ञं धत्त विधत्त । ददत वा । कीदृशं यज्ञं धत्त । भुव-

नस्य लोकत्रयस्य रेतो बीजं कर्मजन्यत्वात् जगताम् । यज्ञे च क्रियमाणे देवानामपि प्रियं पाथोऽन्नं पशुलक्षणं देवानामेतु देवान्प्राप्नोतु । कीदृशं पाथः । उपाकृतं यद्स्थात्, यूपसमीपमानीय यत्तिष्ठति, शंसमानं देवतासंबन्धमभिशंसत् प्रार्थयमानम् ॥

वपां जुहोति

त्वामु त्ये दधिरे प्रथमं विचक्ष्यं शृतकर्तारमुत यज्ञियं च ।
अग्ने सदक्षः सतनूर्हि भूत्वाथ वह हव्यं देवेभ्यो जातवेदः ॥

हे जातवेदः जातप्रज्ञान जातधन वा, वेदो ज्ञानं धनं वा, देवेभ्यो हव्यं वह । किं कृत्वा । सदक्षः सतनूश्च भूत्वा, सह दक्षेण दाक्षिण्येन वर्तते इति सदक्षः, सह तन्वा वर्तते इति सतनूर्देवहविःप्रापणसमर्थशरीरविशेषयुक्तः सन्नित्यर्थः । अथानन्तरं यतस्त्वामु त्वामेव त्ये ते यजमाना दधिरे धारयन्ते प्रथमं विचक्ष्यं दर्शनीयं, तथा शृतस्य पाकस्य कर्तारं, यज्ञियं च यज्ञार्हं च ॥

जातवेदो वपया गच्छ देवांस्त्वं हि होता प्रथमो बभूव ।
घृतस्याग्ने तन्वा संभवस्व सत्याः सन्तु यजमानस्य कामाः ॥

हे जातवेदः अग्ने देवान् गच्छ वपया सह वपां गृहीत्वा । त्वं हि होता आह्वाता देवानां दाता वा बभूव भवसि । हे अग्ने घृतस्य तन्वा ज्वालया संभवस्व संबध्यस्व । एतया च वपया देवप्रापितया यजमानस्य कामाः सत्याः सन्तु ॥

इति पशुकल्पः ॥

इत्येकपञ्चाशी काण्डिका ॥ ५१ ॥

---

अथ

द्विपञ्चाशी काण्डिका ।

**अथ शूलगवः ॥ १ ॥**

अथशब्दो नित्यात्पशुकल्पाद्विवक्षितस्य काम्यस्यानन्तर्यमाह, नित्यं पशुतन्त्रमुक्तम्, अनन्तरं काम्यं वक्ष्याम इत्यर्थः । शूलगव इति कर्मनाम । शूले सर्वाण्यवदानानि पच्यन्ते । अत्र गौरपिच पशोरन्वर्थकं नाम । अवदानहोमान्तं च च्छागपक्ष एव, गोः पुनरुत्सर्ग एव लोकविरोधात् ॥ १ ॥

**सर्वेभ्यः कामेभ्यः ॥ २ ॥**

काम्यन्ते इति कामाः स्वर्गादिफलवि-

शेषाः, तादर्थ्ये चतुर्थी । पर्यायेण सर्वकामसिद्धिर्न समुच्चयेनेति योगसिद्ध्यधिकरणे व्यवस्थितम् ॥ २ ॥

शरदि वसन्ते वा ॥ ३ ॥

कालविकल्पार्थमेतत् ॥ ३ ॥

नियमः स्यादित्येके । अनियमः स्यादित्येके ॥ ४ ॥

एके पुनः कालनियमं नानुमन्यन्ते । तेन यदाकदाचित्कर्तव्यः शूलगवः ॥ ४ ॥

गवां मध्य उत्तरतो ग्रामस्य वेद्याकृतिं कृत्वा शाखाभिः परिवार्यातष्टं यूपं तूष्णीमुच्छ्रयन्ति ॥ ५ ॥

ग्रामस्योत्तरे देशे गवां मध्ये वेद्याकृतिं कृत्वा, पाशुकीमेव वेदिं चतुरस्रां कृत्वेत्यर्थः, तां वेदिं वृक्षशाखाभिः परिवृत्य अतष्टं तक्षणरहितं यूपमुच्छ्रयन्ति । यूपशब्दस्य संस्कारशब्दत्वान्मन्त्रे प्राप्ते तदपवादस्तूष्णीमिति । उच्छ्रयन्तीति बहुवचनेनोच्छ्रयणस्यानियतकर्तृत्वमाह ॥ ५ ॥

तमपरेण यथोक्तमुपसमाधाय जयप्रभृतिभिर्हुत्वा भवाय शर्वायेशानायेश्वराय पशुपतयेऽधिपतय इति गामुपाकरोति पशुं वा ॥ ६ ॥

तं यूपमाश्रित्यापरेण पश्चिमे भागे यथोक्तमुपसमाधानादिकमाज्यभागान्तं कृत्वा, जयप्रभृतिभिर्हुत्वेति स्थालीपाकतन्त्रमत्र राष्ट्रभृत्पर्यन्तमुपलक्षयति । भवाय त्वामुपाकरोमि, शर्वाय त्वामुपाकरोमीत्यादिना मन्त्रषट्केनोपकल्पयामीत्यन्तेन गामुपाकरोति पशुं वा च्छागम् ॥ ६ ॥

प्रतिनाम प्रतिद्रव्यं प्रत्यनुवाकमिति ॥७॥

नामानि भवाय शर्वायेत्यादीनि । नाम नाम प्रतिनाम, द्रव्यं वपावदानादि, द्रव्यं द्रव्यं प्रतिद्रव्यम् । अनुवाकाः षट् रुद्राभिधानाः पूर्वव्याख्याताः 'नमस्ते रुद्र मन्यवे' इत्याद्याः । अनुवाकं अनुवाकं प्रत्यनुवाकम् । इतिशब्दोऽधिकरणप्रधानः । इह यद्वपावदानादिकं कर्म प्रधानं,

तत्प्रतिद्रव्यं क्रियमाणं प्रतिनाम प्रत्यनुवाकं च कर्तव्यम्। तथा षड्भिरनुवाकैर्यथासंख्यमेकैकेन भवादिनामशब्देन युक्तैर्विपर्यया: षट् होमाः। हृदयादिभ्य एकैकस्माद्विर्द्विरवदाय समुदायं कृत्वैव देयाः षडुपहाराः ॥ ७ ॥

**षट् पुरोडाशानेककपालांस्तूष्णीमुपचरिताञ्श्रपयित्वा प्राक्स्विष्टकृतः षड्लोहितबलीन्पात्रेषु दर्भेषु वा कल्पयित्वा नमस्ते रुद्र मन्यव इति षड्भिरनुवाकैरुपतिष्ठते ॥ ८ ॥**

एकैकस्मिन्कपाले निर्वृत्तान् षट् पशुपुरोडाशांस्तूष्णीं मन्त्रव्यतिरेकेण निर्मितान् श्रपयित्वा स्विष्टकृतः पूर्वं बलिषट्कमेकैकेन पुरोडाशेन भिन्नभिन्नपात्रस्थेन भिन्नभिन्नदर्भस्थेन वा पशुलोहितलिप्तेन कल्पयेत्। 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां भवाय जुष्टं कल्पयामि' इत्यादयः कल्पने षट् मन्त्राः। कल्पयित्वा च 'नमस्ते रुद्र मन्यवे' इति षड्भिरनुवाकैरुपस्थानं कृत्वा बलिमुपहरति ॥ ८ ॥

ईशानं त्वा शुश्रुमेति च सर्वत्रानुषजति ॥ ९ ॥

ईशानं त्वेति वाक्यशेषमनुवाकषट्केन संबन्धयतीत्यर्थः। ततस्त्रिभ्योऽङ्गेभ्यो मध्यसव्यश्रोणिदक्षिणबाहुभ्यः सकृदवदाय अग्नये स्वाहेति स्विष्टकृतं यजति। पूर्वोक्तमन्त्रेणेत्येके। अनेनैव च समाप्तिः। ततो वपाश्रपण्यौ सदर्भां पूर्ववदग्नौ प्रहरति प्रोक्षति चापोहिष्ठीयाभिः ॥९॥

प्रभूतान्ब्राह्मणान्भोजयन्ति ॥ १० ॥

यथाशक्ति ब्राह्मणान् मांसेन भोजयन्ति ॥१०॥

नापक्वं ग्रामं प्रवेशयन्ति ॥ ११ ॥

अपक्वमपि ग्रामं न प्रवेशयन्ति, का वार्ता पक्वस्येति केचित् । अपरे तु पक्वस्य ग्रामप्रवेशनमिच्छन्ति कदाचित् ॥ ११ ॥

शिष्टं भूमावर्पयन्ति सचर्म ॥ १२ ॥

मुच्यमानं पक्वमपक्वं भूमौ प्रक्षिपन्तीत्यर्थः। सचर्म चर्मणा सह ॥ १२ ॥

अनवेक्षमाणा आयान्ति ॥ १३ ॥

यज्ञभूमिमपश्यन्तो ग्राममागच्छन्तीत्यर्थः १३

व्याख्यातं सूत्रजातम् । मन्त्रान्व्याख्यास्यामः । तत्र रुद्रा व्याख्याताः ॥

ईशानं त्वा शुश्रुमा वयं धनानां धनपते ।
गोमदग्ने अश्ववद्भूरि पुष्टं हिरण्यवदन्नवद्धेहि मह्यम् ॥

आस्तारपङ्क्तिः[1] । भूतानाम् । ईशस्यार्षम् । अग्निरेव रुद्रः । हे अग्ने त्वां वयं धनानामीशानं प्रभुं शुश्रुम श्रुतवन्तः । अतो हे धनपते भूरि बहु पुष्टं परिपूर्णं मह्यं धेहि । कीदृशम् । गोमत् गोयुक्तम् । एवमश्ववद्धिरण्यवदन्नवदिति योज्यम् ॥

दुह्रां ते द्यौः पृथिवी पयोऽजगरस्त्वा सोदको विसर्पतु ।
प्रजापतिनात्मानमाप्रीणेऽरिक्तो म आत्मा ॥

नष्टरूपा पङ्क्तिः । हे प्रजापते रुद्राग्ने तव संबन्धिनी द्यौः पयो दुग्धां जलं मुञ्चतु । कीदृशी द्यौः । पृथिवी पृथ्वी महती । अजं जलं, तद्गिरति मुञ्चति अजगरो मेघः त्वां सोदकः उदकसहितो विसर्पतु । प्रजापतिना साध्यपाकादिना अहमात्मानमाप्रीणे तर्पयामि पूरयामि, अतः स ममात्मा अरिक्तः परिपूर्णो भवतु ॥

---

1 पाङ्क्तिः क. ।

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो वनस्पतिषु ।
यो रुद्रो विश्वा भुवनाविवेश तस्मै रुद्राय नमो अस्तु देवाः ॥

हे देवा ऋत्विजः, तस्मै रुद्राय नमोऽस्तु यो अग्नौ अप्सु ओषधीषु वनस्पतिषु च स्थितः । अथवात्यल्पमिदमुच्यते यो विश्वा विश्वानि भुवनानि आविवेश येन सर्वाणि भुवनानि व्याप्तानि ॥

इति शूलगवः ॥

इति द्विपञ्चाशी कण्डिका ॥ ५२ ॥

अथ

## त्रिपञ्चाशी काण्डिका ।

**औपसदेऽग्नौ सायंप्रातरग्निहोत्रदेवताभ्यो जुहुयात् ॥ १ ॥**

औपसदोऽग्निरुक्तः 'एष औपसदोऽग्निर्वैवाहनो वा, तस्मिन्पाकयज्ञाः' (४७।१-२) इति । स च गार्हपत्यधर्मेत्यग्निहोत्रादिसदृशैस्तत्र कर्मभिर्युक्तं भवितुम् । अतस्तस्य जागरणायाग्निहोत्रादिसदृशानि कर्माणि तत्रोच्यन्ते, नतु तान्येवैतानीति भ्रमणीयं देवताग्रहणात्कालाभिधानाच्च । अग्निहोत्रादिके सति तद्रूपाकृष्टत्वादेव देवताकालयोः व्यर्थं तदुपादानं तस्मिन्नग्निहोत्रं जुहुयादित्येतावता सिद्धेः । देवताग्रहणादेव च नामधेयेन होतव्यं, न मन्त्रेण । अग्निहोत्रदेवतास्त्वग्निसूर्यप्रजापतयः । अग्नये स्वाहेति सायं, सूर्याय स्वाहेति प्रातः, प्रजापतये स्वाहेत्युभयत्र मनसा । अर्थाक्षिप्तं तु द्रव्यं सादृश्याद्दधिघृतपयोयवादीनामन्यतमं, तदभावे तण्डुलाः ॥ १ ॥

---

१ रुक्त क_पा.

पर्वणि भार्यामुपवास्य दर्शपूर्णमासदेवताभ्यो जुहुयात् ॥ २ ॥

दर्शपूर्णमासदेवताभ्योऽग्निविष्णुप्रजापत्यग्नीषोमेन्द्रेभ्यो जुहुयादेकस्मात्स्थालीपाकात्प्रतिदेवतं चतुरावर्तेन । उपांशुयाज्यं त्वाज्येनैव जुहुयात् । सान्नाय्यं त्वपीतसोमस्य दर्शपूर्णमासयोरेव नास्ति, का वार्तासदृशेषु पाकयज्ञेषु । पर्वणीति कालविशेषविधिः । भार्यामुपवास्येत्युक्ते दण्डापूपिकया यजमानस्याप्युपवासः प्रतीयते । अपरेऽपरथा व्याचक्षते भार्यामुप समीपे वासयित्वा संनिधाप्य जुहुयादिति । दर्विहोमवदपूर्वत्वादत्र पूर्वत्र च परतन्त्राभावः ॥ २ ॥

नवस्याग्रायणदेवताभ्योऽग्न्यानीभिरभिजुहुयात् ॥ ३ ॥

पर्वणीत्यनुवर्तते । नवस्यान्नस्यांशं जुहुयात् । काभ्यः । आग्रायणदेवताभ्यः । या आग्रायणे वैदिके देवताः, ताभ्य एव गृह्याग्नावपि जुहुयात् । ताः पुनरग्नीन्द्रौ विश्वे देवा द्यावापृथि-

ठ्याविति । यवास्तु हविः । अज्यानीभिरिति मन्त्रनिर्देशः । तास्तु षट् । प्रत्यृचं होमश्चतुराव-त्तेन स्रुवेणाभिघृतेन । पूर्वत्रापि तुल्यमेतत् ॥३॥

स्विष्टकृदनुमन्त्रणमुक्तम् ॥ ४ ॥

अग्निः प्राश्नात्विति हुतस्यानुमन्त्रणम् ॥ ४ ॥

प्राशनं च ॥ ५ ॥

उक्तमित्यनुषङ्गः । आग्रायणोक्तमेव प्राशनं ग्राह्यं स्विष्टकृत्कालकम् । भद्रान्न इति व्रीहि-श्यामाकानां भक्षणे मन्त्रः, एतमु त्यमिति य-वानाम् ॥ ५ ॥

अथ मन्त्रविवृतिः । याज्यया अनुवाक्यया वा होमः । तत्र आम्नाये अग्निमित्याद्या यथालिङ्गं याज्यानुवाक्याः । त्वमिमा इति द्वे सोमदैवत्ये त्रिष्टुभौ सौम्य[1]श्यामाकस्य याज्यानुवाक्ये ॥

त्वमिमा ओषधीस्सोम विश्वास्त्वमपो अजयस्त्वं गाः ।
त्वमाततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥

देवपुत्राणां ब्रह्मणो वार्षम् । अनुवाक्येयं, उत्तरा तु याज्या । उत्तरत्राप्येवम् । हे सोम इमा विश्वाः सर्वा ओषधीः त्वमेवाजयः, न-

---

1 सोमस्य प.

कारलोपश्छान्दसः, अजनयः जनितवानसि । बह्वृचे त्वजनय इति नकारः पठ्यते । एवमपो विश्वास्त्वमजयः, तथा गाः औस्त्रेयास्त्वमेव जनितवान् । किंच उरु विततमन्तरिक्षं त्वमेव आततन्थ आततवान् विस्तारितवान् । त्वमेव च ज्योतिषा तमो विववर्थ विशेषेणान्धकारं वृतवान् ॥

या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु ।
तेभिर्नो विश्वैस्सुमना अहेडन्राजन्सोम प्रति हव्या गृभाय ॥

राजा सोमः 'सोमो वा ओषधीनां राजा' इति श्रुतेः । हे राजन् सोम हव्या हव्यानि प्रतिगृभाय प्रतिगृहाण । 'हलः श्नः शानज्झौ,' 'छन्दसि शायजपि' 'हृग्रहोर्भश्छन्दसि' इति हस्य भत्वम् । 'व्यवहिताश्च' इति व्यवहितस्य प्रतेरुपसर्गस्य प्रयोगः । 'शेश्छन्दसि बहुलम्' इति हव्येत्यत्र शेर्लुक् । किं कुर्वन् हव्यानि गृहाण । अहेडन् 'हेडृ अनादरे' अनादरमकुर्वन् । सुमनाः शोभनचित्तः सन् । कैर्गृहाण । तेभिस्तैर्विश्वैः सर्वैर्नामभिः । कैः । यानि ते तव दिवि धामानि तेजांसि, यानि च पृथिव्यां,

यानि च पर्वतेषु, ओषधीषु व्रीह्यादिषु, तथाप्सु, तैः सर्वैः ॥

सदा सुगः पितुमाँ अस्तु पन्था मध्वा देवा ओषधीस्संपिपृक्त ।

भगो मे अग्ने सख्ये न मृध्या उद्रायो अश्याँ सदनं पुरुक्षोः ॥

स्वदस्व हव्या समिषो दिदीह्यस्मद्र्यक्संमिमीहि श्रवाँसि ।
विश्वाँ अग्ने पृत्सु ताञ्जेषि शत्रूँरहा विश्वा सुमना दीदिही नः ॥

राजसूये सौम्यः श्यामाकश्चरुः बभ्रुः पिङ्गलो दक्षिणेति श्यामाकेष्टिराम्नाता । तस्याः क्रमे एते याज्यानुवाक्ये पठ्येते । अत्र स्विष्टकृदग्निर्देवता सापीहेष्टिर्युक्तेति व्याख्यायते मन्त्रद्वयम् । अग्निः सोमः, हे अग्ने सर्वकालं सुगः सुखगमनः पन्थाः मार्गः दृष्टादृष्टपुरुषार्थप्राप्त्युपायोऽस्माकमस्तु । कीदृशः । पितुमान्, अन्नवान् । हे देवा द्योतमानाः रविरश्मयः ओषधीर्व्रीह्याद्याः मध्वा मधुरसेन जलेन संपिपृक्त 'पृची संपर्के' संपृक्ताः सिक्ताः संपादयत । तथा भगो बन्ध्वादिभ्यो विभज्यमानमन्नं मे ममास्तु । किंच हे अग्ने मम तथा

भव यथा न मृध्याः 'मृधु हिंसायाम्' अहिंसको भवेत्यर्थः, सख्ये वर्तमानः । उद्रायो अश्यां सदनं पुरुक्षोः, रायो धनानि उदश्या-मुत्कर्षेणाश्नुयां व्याप्नुयां प्राप्नुयामहम् । सदनं पुरुक्षोः यानि धनानि भवन्ति, सीदन्त्यस्मिन्निति सदनं स्थानमास्पदं, पुरु इति बहुनाम, 'रु क्षु शब्दे' बह्वयाः प्रसिद्धेः स्थानमित्यर्थः ॥

स्वदस्व हव्या इति । हे अग्ने हव्या हव्यानि हवींषि स्वदस्व स्वादय । समिषो दिदीहि इषोऽन्नानि सम्यग्देहि दानार्थं संमानपरिच्छेदहानायेति । किंच विश्वान् सर्वान् शत्रून् जेषि जय । कुत्र । पृत्सु संग्रामेषु । तथा अहा अहानि विश्वा विश्वानि सुमनाः सुचित्तः सन् दीदिहि देदीप्यमानान्यनवरतयज्ञार्थं हविःप्रज्वालनेन कुरु नोऽस्माकम् ॥

आग्रायणदेवताभ्यो जुहुयादित्युक्तम् । तत्राग्रायणदेवतालिङ्गा मन्त्रा व्याख्यायन्ते ।

आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् ।
येषामिन्द्रो युवा सखा ॥

गायत्री । घा इति पादपूरणो वर्णागम

इति । उपसर्गः स्तृणातिना संबध्यते । येषामिति तेषामित्यस्य प्रसङ्गे व्यत्ययेन । ये अग्निमिन्धते तथा बर्हिरास्तृणन्ति । कीदृशम् । आनुषक्, आ समन्तादनुषजत इत्यानुषक् कर्मानुषक्तं,तेषामिन्द्रो युवा, विश्वस्तरुणो वा, सखा समानख्यानो भवति ॥

सुकर्माणस्सुरुचो देवयन्तोऽयो न देवा जनिमा धमन्तः ।
शुचन्तो अग्निं वव‍ृधन्त इन्द्रमूर्वं गव्यं परिषदन्तो अग्मन् ॥

त्रिष्टुप् । युगलानां पूर्वा गायत्री, परा त्रिष्टुप् । देवा द्योतमानाः सूर्यरश्मयः । राजन्त इत्यध्याहारः । कीदृशाः । सुकर्माणः शोभनं प्रकाशनादिकं कर्म येषां, सुरुचः सुदीप्तयः, देवयन्तः देवान् यजमानप्रभृतीनिच्छन्तः कामयमानाः । अयो न जनिमा धमन्तः, नकार उपमार्थीयः, जनिमा जनिमानं जननं व्रीहिप्रभृतीनां धमन्तः प्रकाशयन्तः उत्पादयन्तः। किंवत् । अयो न, यथा लोहकारः शस्त्रं धमति । शुचन्तो अग्निम्, अग्निमिन्धनशोषणद्वारेण दीपयन्तः । वव‍ृधन्त इन्द्रम्, इन्द्रं स्तुतिभिर्वर्धयन्तः । ऊर्वं गव्यं, गोः स्वर्गस्याव-

यवं परिषदन्तः परिषीदन्तो गच्छन्ति । कीदृशाः । सुकर्माणः । देवत्वं चात्मन इच्छन्तः । जन्म च धमन्तः, कुत्सितं जगद्धमन्तो नित्यनैमित्तिककर्मानुष्ठानेन ज्ञानेन च अयोवत् ॥

इयं वामस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः ।
अभ्राद्वृष्टिरिवाजनि ॥

हे इन्द्राग्नी इयं स्तुतिर्वां युवयोरजनि जाता अस्य मन्मनोऽन्नस्य सकाशात् । कीदृशी । पूर्व्या पूर्वभवा चासौ स्तुतिः पूर्व्यस्तुतिः । कस्मादिव का । अभ्राद्वृष्टिरिव, अन्नाद्धि वाक्प्रवर्तते मेघादिव वृष्टिः ॥

शुचिं नु स्तोमं नवजातमद्येन्द्राग्नी वृत्रहणा जुषेथाम् ।
उभा हि वाँ सुहवा जोहवीमि ता वाजँ सद्य उशते धेष्ठा ॥

हे इन्द्राग्नी नवजातं नवान्नं जुषेथां सेवेथां भक्षयतम् । हे वृत्रहणौ तमसः पापस्य हन्तारौ । कीदृशं नवजातम् । शुचिं मन्त्रपूतं, स्तोमं स्तोमैः स्तुतिभिर्युक्तम् । अद्यास्मिन्नहनि । यतः उभौ वां युवां सुहवौ सुखाह्वानौ सुहोतव्यौ वा, ता तौ तस्माद्वा जोहवीमि आह्वयामि जुहोमि वा । आह्वानमपि हि होमार्थम् । वाजमन्नं सद्योऽचिरात् उशते कामयमानाय धेष्ठा पिवतम् ॥

विश्वे देवा ऋतावृध ऋतुभिर्हवनश्रुतः ।
जुषन्तां युज्यं पयः ॥

विश्वे सर्वे देवा जुषन्ताम् । किम् । पयः पायसम् । कीदृशम् । युज्यं युक्तं देवतायोग्यमित्यर्थः । कीदृशा विश्वे देवाः । ऋतावृधः ऋतस्य सत्यस्य यज्ञस्य च वर्धयितारः । कैः । ऋतुभिः । वसन्तादौ हि यज्ञक्रियाः क्रियन्ते, ज्ञानं च । हवनमाह्वानं शृण्वन्तीति हवनश्रुतः । प्राय आह्वानलिङ्गा अनुवाक्या, प्रधानलिङ्गा तु याज्या ॥

ये के च ज्मा महिनो अहिमाया दिवो जज्ञिरे अपां सधस्थे ।
ते अस्मभ्यमिषये विश्वमायुः क्षप उस्रा वरिवस्यन्तु देवाः ॥

हे देवाः विश्वे देवाः, रश्मयः अस्मभ्यं विश्वं सर्वमायुर्वरिवस्यन्तु ददतु इषये इषया स्वरसप्रवृत्तादरेणेत्यर्थः । कीदृशाः । क्षपः क्षपमाणाः, आपदां विनाशका इत्यर्थः । उस्रा उस्राविणो वृष्टिकारिण इत्यर्थः । ये के च ज्मा महिनः, ज्मा पृथिवी, तस्या महिनः पूजकाः उपकारकाः, पृथिव्या अपि वा महान्तः ये केचित्साकल्येनेत्यर्थः । अहिमायाः, रश्मिरूपा हि मेघाः, रश्मय एव यतो मेघरूपा भूत्वा वर्षन्ति, तेन मेघानां स्वरूपेण परिच्छेदकत्वादहिमाया र-

श्मयः। ये च दिवो जज्ञिरे, स्वर्गादादित्याद्वा तत्स्थत्वात् जाताः। अपां सधस्थे समानस्थाने गगनसमुद्र इत्यर्थः। गगने ह्यवश्यायपातेन सूक्ष्मः समुद्रोऽनुमीयते॥

मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्।
पिपृतां नो भरीमभिः॥
घृतवती[1] भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा।
द्यावापृथिवी[2] वरुणस्य धर्मणा विष्कम्भिते अजरे भूरिरेतसा॥

द्यावापृथिवीये याज्यानुवाक्ये। आद्या गायत्री, द्वितीया त्रिष्टुप्। द्यौश्च पृथिवी च नोऽस्माकमिमं यज्ञं मिमिक्षतां सिञ्चतां कामैः पूरयतामित्यर्थः। कीदृश्यौ। मही महत्यौ। पिपृतां च पालयतां च भरीमभिः भरणीयैराभरणीयैः[3]॥

द्यावापृथिव्यौ इदं हविर्जुषेतामित्यध्याहारः। कीदृश्यौ। घृतवत्यौ। तथा भुवनानां त्रयाणां लोकानामभिश्रिया आश्रयभूते। उर्वी वितते। पृथ्वी विपुले। मधु पानीयं दुहाते इति

---

१ मही द्यौर्घृत० इति कठशाखापाठः। २ सुपेशसा द्यावा० क. शा. पाठः ३ भरणैः ख. ग. पाठः।

मधुदुघे। सुपेशसौ, पेशो रूपं, सुरूपे। तथा वरुणस्य देवस्य संबन्धिना धर्मणा धारणेन विष्कम्भिते अवष्टब्धे धारिते 'वरुणस्त्वोत्तभ्नातु' इति मन्त्रः। अजरे अविनाशिन्यौ। भूरिरेतसौ बहुबीजे सर्वस्य तज्जन्यत्वात् उदकं वा रेतो बहूदके॥

षड्भिरज्यानीभिर्जुहुयादित्युक्तम्। ता व्याख्यायन्ते षट्

शतायुधाय शतवीर्याय शतोतयेऽभिमातिषाहे।
शतं यो नश्शरदोऽनयदिन्द्रो विश्वस्य दुरितस्य पारम्॥१॥

ऐन्द्रः, प्राजापत्यो वा। त्रैष्टुभः। संवत्सरश्चात्र प्रजापतिः। शतशब्द उपलक्षणार्थः, बहून्यपरिच्छिन्नेयत्तान्यायुधानि यस्य स शतायुधः। तस्मै शतायुधायेन्द्राय प्रजापतये जुहोमीति शेषः। शतवीर्याय अपरिमितशक्तये। अवनमूतिः, बहुरक्षणाय। अभिमातयः शत्रवः, तान् सहतेऽभिभवतीति अभिमातिषाट्, तस्मै जुहोमि। यश्चेन्द्रः नोऽस्माकं शतं शरदः शतं वर्षाणि नयति दुरितस्य दुष्टस्य इतस्य चेष्टितस्य दुष्कृ-

तस्य कर्मणः पारं समाप्तिं विनाशम् ॥१॥ इत्या-
ज्येनैकर्चम् ॥

इमे चत्वारो रजसो विमाना अन्तरा द्यावापृथिवी वियन्ति पन्थानः । तेषामज्यानिं यतमो न आवहात्तस्मै नो देवाः परिधत्त सर्वे ॥ २ ॥

वैश्वदेवीयम् । हे सर्वे देवाः विश्वे देवाः, नोऽस्मभ्यं तस्मै मार्गाय परिधत्त तं मार्गं मह्यं ददत, तत्र प्रवर्तयत । कस्मै मार्गाय। तेषां प्रकृतानां मध्ये यतमः नोऽस्माकमज्यानिमविनाशमावहति प्रापयति मोक्षमित्यर्थः । कश्चासौ । देवमार्ग इत्यर्थात् । यतो बहवः पन्थान इत्याह—यत इमे चत्वारः पन्थानो वियन्ति विविधं गच्छन्ति, अन्तरा द्यावापृथिवी द्यावापृथिव्योर्मध्ये । रजसो विमानाः, रजसो लोकत्रयस्य संबन्धिनः विविधपरिमाणाः, अथवा रजसो गतिमन्तो वेगवाहिनो विमाना वाहनानि तत्र सन्ति । अत्र मन्त्रे अज्यानिशब्दयोगात् छत्रिवैश्वदेववदाहुतिषट्के अज्यानिशब्दोऽज्यानीर्जुहुयादिति ॥ २ ॥

वसन्तो ग्रीष्मो मधुमन्ति वर्षाश्शरद्धेमन्तस्सुविते दधात । तेषां वयं सुमतौ यज्ञियानां ज्योगजीता अहतास्स्याम ॥३॥

वसन्तादयः पञ्च ऋतवः, तेषां विशेषणं मधुमन्तीति स्वादुरसवन्त इत्यर्थः । यद्वा मधुमन्तीत्यनेन शिशिरमुक्तम्, मधुर्वसन्तोऽनन्तरो यस्य स मधुमान्, छान्दसो लिङ्गवचनव्यत्ययः । एते कीर्तिता ऋतवः पञ्च षड्वा अस्मान् सुविते दधात शोभने मार्गे दधतु स्थापयन्तु 'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु' शोभनं वीतं गमनं यत्र स सुवितः, छान्दसो ह्रस्वः । तेषामृतूनां सुमतौ शोभनबुद्धौ वर्तमाना वयं ज्योक् चिरकालमजीताः शत्रुभिरपराजिताः अहताश्च स्याम । तेषां कीदृशानाम् । यज्ञियानां, यज्ञमर्हन्तीति यज्ञियाः, 'यज्ञर्त्विग्भ्यां घखञौ' ( ५।१।७१ ) ॥ ३ ॥

संवत्सराय परिवत्सरायेदावत्सरायानुवत्सरायोद्वत्सराय कृणुता बृहन्नमः । तेषां वयं सुमतौ यज्ञियानां निवात एषामभये स्याम ॥ ४ ॥

संवत्सरादिशब्दैः प्रजापतिरादित्यरूप उच्यते । तस्मै कृणुता बृहन्नमः, तस्मै प्रजापतये बृहन्महन्नमः कृणुता करोमि नमस्कारम् । तेषामेषां संवत्सरादीनां संबन्धिनि निवाते अभये

मार्गे स्याम । निवातोऽत्यन्तसुखयुक्तो मातृनिवाते वसतीति लोके प्रयोगात् । अभयो दुःखरहितः, मोक्षमार्ग इत्यर्थः ॥ ४ ॥

इयँ स्वस्तिस्संवत्सरीया परिवत्सरीयेदावत्सरीयानुवत्सरीयोद्वत्सरीया । सा नः पिपर्त्वहृणीयमानैनाह्नेदमहरशीय स्वाहा ॥ ५ ॥

इयं नवान्नप्राप्तिरूपा स्वस्तिः सुखाविनाशात्मिका, संवत्सरे भवा संवत्सरीया, वर्तमानसंवत्सरजा प्राप्ता । सा परिवत्सरीयादिरूपास्माकमस्तु । परि समन्ताद्वत्सरेषु सर्ववत्सरेषु भवा परिवत्सरीया । इदिति निपातश्चार्थे । आवत्सरः शतपूरण आयुषोऽवधिभूतः । अनुवत्सरोऽनन्तरभावी द्वितीयः । उद्वत्सर उत्कर्षयुक्त उत्सवाद्युपलक्षितः । सा नः पिपर्तु, सा स्वस्तिः नोऽस्मान् पिपर्तु प्रीणातु पूरयतु । अहृणीयमाना अलज्जमाना, श्लाघमानेत्यर्थः । एना अह्ना इदमहरशीय, अनेन वर्तमानेनाग्रायणोत्सवोपलक्षितेनेदं द्वितीयादिकं वर्षशतान्तमहः अशीय व्याप्नुयां, वर्तमानदिवससदृशाः

सर्वे दिवसाः सुन्दराः सन्त्वित्यर्थः । स्वाहा सुहुतमस्तु ॥ ५ ॥

आ नः प्रजां जनयतु प्रजापतिर्धाता दधातु सुमनस्यमानः ।
संवत्सर ऋतुभिश्चाक्लृपानो मयि पुष्टिं पुष्टिपतिर्दधातु ॥६॥

नोऽस्माकं प्रजापतिः प्रजामाजनयतु, धाता च प्रजामाजनयतु । संवत्सरश्च मयि पुष्टिं दधातु करोतु । स हि पुष्टिपतिः । किं कुर्वन् । ऋतुभिश्चाक्लृपानः, ऋतुभिः प्रयोज्यकर्तृभिः ऋतुफलानि कल्पयन् संपादयन् ॥ ६ ॥

एवमज्यानीः षट् हुत्वा हुतं स्विष्टकृतमग्निमनुमन्त्रयते

अग्निः प्राश्नातु प्रथमस्स हि वेद यथा हविः ।
शिवा अस्मभ्यमोषधीः करोतु विश्वचर्षणिः ॥

इदं नवान्नं प्रथममग्निः स्विष्टकृत्प्राश्नातु । स हि वेद जानाति यथा हविः हविषो यथास्वरूपं, प्राश्य चास्मभ्यमस्मदर्थं शिवाः सुखकारिणीः व्रीह्यादिका ओषधीः करोतु । कीदृशः । विश्वचर्षणिः विश्वस्य सर्वस्य द्रष्टा ॥

अथ यजमानः प्राश्नाति नवव्रीहिम् । अस्य

चेराभागस्य यजमानभागसंज्ञा । अत्र चेरावसरे 'वत्सः प्रथमजो दक्षिणा' इति श्रुतिः ॥

भद्राच्छ्रेयस्समनैष्ट देवास्त्वयावसेन समशीमहि त्वा ।
स नः पितो मधुमाँ आविशेह शिवस्तोकाय तन्वे न एधि ॥

त्रिष्टुप् । हे देवाः, नोऽस्माकं भद्राच्छ्रेयः समनैष्ट, भद्रादप्युत्कृष्टादपि श्रेयो भद्रतरं समनैष्ट सम्यक् प्रापयत । नवव्रीहे, त्वयावसेन भुक्तेन सम्यगशीमहि प्राप्नुयाम त्वां, निरन्तरमविच्छिन्नं त्वमस्माकं भवेत्यर्थः । हे पितो अन्न, मधुमन्मधुरस, स त्वं नोऽस्मान् आविश शरीराभ्यन्तरं प्रविश, इह च शरीरे आविष्टः सन् शिवः सुखकरः तोकाय पुत्राय एधि भव तन्वे तन्वर्थं शरीरहितायेत्यर्थः ॥

नवयवानश्नाति

एतमुत्यं मधुना संयुतं यवँ सरस्वत्या अधि माना अचकृषुः । इन्द्र आसीत्सीरपतिश्शतक्रतुः कीनाशा आसन्मरुतस्सुदानवः ॥

एतं यवं यमश्नाति तं देवा अचकृषुः कृतवन्तः उत्पादितवन्तः सर्गादौ । उत्यमुत्तमुत्तमं

वा। मधुना मधुरसेन युक्तम्। कदा। सरस्वत्या उत्तमाया[1] वाचः आधिराज्ये सति । पृथिवी सरस्वती सरो जलमस्या अस्तीति कृत्वा । तत्रेन्द्रः सीरपतिर्हलपतिरासीत्, शतक्रतुर्बहुकर्मा प्रजापतिः, मरुतस्तु कीनाशा बलीवर्दा आसन् संजाताः । सुदानवः शोभनदातारः ॥५॥

इत्याग्रायणम् ॥ १ ॥

इति त्रिपञ्चाशी काण्डिका ॥ ५३ ॥

१ मध्यमाया वाचः क पाठः ।

अथ

## चतुष्पञ्चाशी कण्डिका ।

अथ वैश्वदेवं

वैश्वदेवस्य ॥ १ ॥

वैश्वदेवस्य कर्तव्यतां वक्ष्याम इत्यध्याहारः। विश्वेभ्यो देवेभ्यः स्वाहेति वैश्वदेवसंभवाच्छत्रिन्यायेन कर्मसमूहे वैश्वदेवशब्दप्रवृत्तिः। अथवा विश्वे च ते देवा अग्न्यादयो विश्वे देवाः विश्वे देवा देवता अत्रेति वैश्वदेवः। अत्राप्यौपसदेऽग्नावित्यनुवर्तते । देवादावौपसदाभावे लौकिकेऽपि भवति सर्वत्रार्यदेशे सदाचारादवैश्वदेवभोजननिषेधाच्च स्मृतिषु । प्रतिदिनं हि पञ्चयज्ञानुष्ठानं गृहस्थस्य विहितम् । पञ्च यज्ञाः पुनर्वक्ष्यन्ते–प्रथमं देवयज्ञः, द्वितीयं पितृयज्ञः, तृतीयं भूतयज्ञः, चतुर्थं मनुष्ययज्ञः, पञ्चमं ब्रह्मयज्ञः,–इति । यदग्नौ जुहोत्यपि समिधस्तद्देवयज्ञः संतिष्ठते । यत्पितृभ्यः स्वधाकरोत्यद्भिस्तत्पितृयज्ञः संतिष्ठते । यद्भूतेभ्यो बलिं ददाति, तद्भूतयज्ञः संतिष्ठते ।

यद्ब्राह्मणेभ्योऽन्नं ददाति, तन्मनुष्ययज्ञः संतिष्ठते। यत्स्वाध्यायमधीते, तद्ब्रह्मयज्ञः संतिष्ठते। औपसदेऽग्नौ सायंप्रातरपि वैश्वदेवं कुर्यादित्यपि व्याचक्षते ॥ १ ॥

सिद्धस्य सर्वतोऽग्र्यस्य जुहोति ॥ २ ॥

भोजनाद्यर्थत्वेन सिद्धस्य, नतु साध्यस्यान्नस्य सतः, सर्वतः सर्वस्मात् अंशमुद्धृत्य, नतु हविष्यादेव व्रीह्यादेः, अग्र्यस्याग्रे प्रथमं जुहुयात्, ततो ब्राह्मणादिकं भोजयेत् वेदवद्वेदविदां वचांसि संभवन्तीति स्मरणात्। अग्र्यस्येति सप्तम्यर्थे व्यत्ययेन षष्ठी। अन्ये व्याचक्षते—अग्र्यस्य प्रधानस्य व्रीह्यादेर्भूयांसमंशं गृह्णीयादिति अग्र्यग्रहणेन दर्शितं सर्वग्रहणेनोपात्तस्य पुनरग्र्यग्रहणेन भूयस्त्वार्थमुपादानात्। अन्यस्मात्तु सर्वतस्तावन्मात्रमुद्धर्तव्यम्। ये त्वौपसदे सायंप्रातर्जागरणार्थं वैश्वदेवं वदन्ति, त एवं व्याचक्षते—सर्वस्माद्गृहस्थिताद्यदग्र्यमुत्कृष्टं सिद्धमप्रयासेन यवव्रीहितण्डुलादीनामन्यतमं, तस्यांशेन जुहुयात्, नत्वभिनिवेशं कुर्यादमुनैवेति ॥ २ ॥

तान्होमान्दर्शयति

अग्नये सोमाय मित्राय वरुणायेन्द्राय इन्द्राग्निभ्यां विश्वेभ्यो देवेभ्यः प्रजापतयेऽनुमत्यै धन्वन्तरये वास्तोष्पतयेऽग्नये स्विष्टकृते चेति ॥ ३ ॥

अग्निं परिसमूह्य पर्युक्ष्य परिषिच्य परिस्तीर्य हविरभिघार्य नानभिघृतं हविरस्तीति श्रुतेरेता द्वादशाहुतीर्जुहुयात् । केचिदाहुः अग्नये सोमायेति स्विष्टकृतः प्रागाज्यभागान्तं लक्षयतीति । तच्च सायंप्रातिकं प्रायेणात्रार्यैष्टदर्शनात् । चतुर्थीनिर्देशात्स्वाहाकारान्तान्दर्शयति । स्वाहाशब्दो निपातः संप्रदानत्वं द्योतयति ॥ ३ ॥

तक्षोपतक्षाभ्यामित्यभितः पूर्वेणाग्निम् ४

जुहोतीत्यनुषज्यते । चतुर्थीनिर्देशात्संप्रदानार्थीयो नमःशब्दोऽत्र सदाचाराद्गम्यते । तक्षाय नमः, उपतक्षाय नम इत्युभयस्यां दिशि अभितः अग्नेः पूर्वेण प्रदक्षिणं कृत्वा, प्रथमं पूर्वोत्तरकोणे, ततः पूर्वदक्षिणकोणे ॥ ४ ॥

**अम्बा नामासीति सप्त ॥ ५ ॥**

पूर्वेणाग्निमित्यनुषज्यते । अम्बा नामासि, तस्यै ते नमः । दुला नामासि, तस्यै ते नमः । नित्यन्ती नामासि, तस्यै ते नमः । चुपणीका नामासि, तस्यै ते नमः । अभ्रयन्ती नामासि, तस्यै ते नमः । मेघयन्ती नामासि, तस्यै ते नमः । वर्षयन्ती नामासि, तस्यै ते नमः ॥५॥

**गृह्याभ्यो नन्दिनि सुभगे सुमङ्गलि भद्रङ्करीति स्रक्तिष्वभिदक्षिणम् ॥ ६ ॥**

गृहेभ्यो हिता गृह्याः देवता गृहेषु भवा वा । अग्नेरित्यनुवर्तते । स्रक्तिषु कोणेषु अग्नेरेताश्चतस्र आहुतीर्जुहुयात् । अभिदक्षिणं प्रदक्षिणं यथा भवति पूर्वदक्षिणकोणादारभ्य । अपरे गृह्यस्रक्तिष्विति व्याचक्षते । तत्र च प्रचुरप्रयोगदर्शनं शरणम् । नन्दिनि तुभ्यं नम इत्यादिप्रयोगोऽनुमन्तव्यः प्रदानार्थत्वादाह्वानस्य ॥ ६ ॥

**स्थूणायां ध्रुवायां श्रियै हिरण्यकेश्यै वनस्पतिभ्यश्चेति ॥ ७ ॥**

गृह्याभ्य इत्यादि यथायोग्यतं सर्वत्रानुवर्तनीयम् । ध्रुवासीति मन्त्रेण वास्तोष्पतीयकर्मणि दर्शितेन या स्थूणा संस्कृता प्रधानभूता गृहमध्ये, तस्यां हिरण्यकेश्यै नमो वनस्पतिभ्यो नम इति बलिद्वयमुपहरेदिति केचित् । अन्ये तु यथा[1]संख्यं व्यभिचारं मन्यमानाः स्थूणायामधिकरणभूतायां वनस्पतिभ्यो जुहुयात्, ध्रुवायां स्थाल्यां च हिरण्यकेश्यै नम इति व्याचक्षते । गृहदेवतानां चामी होमाः ॥ ७ ॥

धर्माधर्मयोर्द्वारे ॥ ८ ॥

धर्माय नमः, अधर्माय नम इति गृहद्वारमध्ये आहुती जुहुयात् ॥ ८ ॥

मृत्यवे चोदधाने ॥ ९ ॥

मृत्यवे नम इति जलपात्रे घटादिके जुहुयात् 'उदकस्योदः संज्ञायाम्' ( ६।३।५७ ) इत्युदधानशब्द उदधिवत् ॥ ९ ॥

वरुणाय विष्णव इत्युलूखले ॥१०॥

---

1 संख्येऽव्यभिचारं ख. पाठः ।

वरुणाय नमो विष्णवे नम इति हन्त्यधिकरणे बलिद्वयमुपहरेत् । आहुतिभणितिरप्यस्ति वैश्वदेवहोमवत् ॥ १० ॥

मरुद्भ्य इति दृषदि ॥ ११ ॥

मरुद्भ्यो नम इति पिष्ट्यधिकरणे बलिमुपहरेत् ॥ ११ ॥

उपरि शरणे वैश्रवणाय राज्ञे भूतेभ्यश्चेति ॥ १२ ॥

वैश्रवणाय राज्ञे नमः, भूतेभ्यो नम इति गृहस्योपरि बलिमुपहरेत् ॥ १२ ॥

इन्द्राय नम इन्द्रपुरुषेभ्यो नम इति पूर्वार्धे ॥ १३ ॥

यमाय नमो यमपुरुषेभ्यो नम इति दक्षिणार्धे ॥ १४ ॥

वरुणाय नमो वरुणपुरुषेभ्यो नम इति पश्चार्धे ॥ १५ ॥

सोमाय नमः सोमपुरुषेभ्यो नम इत्युत्तरार्धे ॥ १६ ॥

ब्रह्मणे नमः ब्रह्मपुरुषेभ्यो नम इति मध्ये ॥ १७ ॥

गृहस्याग्नेर्वा ॥ १७ ॥

ऊर्ध्वमाकाशाय ॥ १८ ॥

आकाशाय नम इत्यूर्ध्वं बलिमुपहरेत् ॥१८

स्थण्डिले दिवाचरेभ्यो भूतेभ्य इति दिवा ॥ १९ ॥

दिवाचरेभ्यो भूतेभ्य इति स्थण्डिले शुचिभूभागे दिवा बलिमुपहरेत् ॥ १९ ॥

नक्तञ्चरेभ्यो भूतेभ्य इति नक्तम् २०

स्थण्डिल इत्यनुषज्यते। अत्र दिवा वैश्वदेवे क्रियमाणे दिवाचरेभ्यो भूतेभ्यो बलिमुपहरेत्, रात्रौ तु नक्तञ्चरेभ्यो भूतेभ्य इति केचिद्व्याचक्षते । प्रयोगस्तु ईदृशः—दिवापि वैश्वदेवं कुर्वाणाः कल्पयित्वा नक्तञ्चरेभ्यो भूतेभ्योऽपि स्थापयन्ति रात्रौ त्याजयन्ति। रात्रौ तु वैश्वदेवो नोचितः। तत्रावश्यकर्तव्यक्रियमाणस्य किंचिद्वैकल्यमभ्युपनतमेव एकान्तपराजयाद्वरं संदेह इति नयेन ॥ २० ॥

**शेषं पितृभ्यः पिण्डान्निदधाति ॥२१॥**

शिष्यत इति शेषः प्रदर्शिताहुतिबलिभ्यो मुच्यमानः। तं पिण्डीकृत्य पितृपितामहप्रपितामहेभ्यो मातृपितामहीप्रपितामहीभ्यश्च ददाति ॥ २१ ॥

**उदकलशमुपनिधाय स्वस्त्ययनं वाचयति ॥ २२ ॥**

अग्नेरात्मनश्च समीपे जलकलशं स्थापयित्वा स्वस्त्ययनं वक्ति बोधश्च मेत्याद्यनुवाकम्। वाचयतीति स्वार्थे णिच् रामो राज्यमकारयदित्यादिवत्। अनुवाको व्याख्यातः। चौरादिको वात्र वचिः। स्वस्ति अविनाश ईयते प्राप्यते येन, तत्स्वस्त्ययनम्। अत एवान्यदपि पुरुषसूक्तकनिक्रदत्प्रभृति वक्तव्यम् ॥ २२ ॥

इति वैश्वदेवम् ॥

इति चतुष्पञ्चाशी काण्डिका ॥ ५४ ॥

अथ

पञ्चपञ्चाशी काण्डिका ।

**अथार्तवस्वस्त्ययनानि ॥ १ ॥**

अथेत्यानन्तर्यं । ऋतौ ऋतौ भवान्यार्तवानि कर्माणि वक्ष्यामः । स्वस्ति अविनाश ईयते प्राप्यते यैस्तानि स्वस्त्ययनानि । तानि कतिचिन्नित्यान्यपि श्रावण्यादीनि, तेषामकरणे कालचोदितानामिति प्रतिकृतिर्भवति । कपोतनिलयशान्त्यादीनि स्वस्त्ययनान्येव ॥ १ ॥

**श्रावण्यां चत्वारि हवींष्यासादयेदपूपं स्थालीपाकं धानाः सक्तूनुभयमक्षतानाम् ॥ २ ॥**

चतस्रः पौर्णमास्यः—श्रावणी, आश्वयुजी, आग्रहायणी, फाल्गुनी । श्रवणेन युक्ता पौर्णमासी श्रावणी । तस्यां चत्वारि हवींष्यावापस्थाने निरुप्यासादयेदपूपादीनि । तत्र अपूपो व्रीहिमयो घृतपक्कः, यवमयस्तु तैलपक्कः फाल्गुन्यां तैलपक्कस्य जुहोतीति लिङ्गात् । चतुर्ष्वपि मान्त्र-

वर्णिक्यः, अपूपे विष्णुः, चरौ रात्र्यः, धानासु सक्तुषु च सर्पाः । उभयं धानाः सक्तवश्च अक्षतानामनवहतानां यवानाम् । इष्टिविकारत्वादाज्यभागान्तं पूर्वार्धान्मध्याच्चावदाय प्रधानानुष्ठानं सर्वम् । जुहोतिना चोदितः स्वाहाकारः ॥२॥

वषट् ते विष्ण इत्यपूपस्य जुहोति रात्री व्यख्यदिति स्थालीपाकस्य नमो अस्तु सर्पेभ्य इति धानानां ये वाद इति सक्तूनाम् ॥ ३ ॥

मन्त्रचतुष्टयस्य प्रतीकेनापूपादिहोमेषु विनियोगोऽनेन भणितः ॥ ३ ॥

येषु वा यातुधाना इति दर्व्यावटेषु सक्तूनाम् ॥ ४ ॥

अवटेषु गर्तेषु । दर्व्या, नतु स्रुचा । येषु वेति मन्त्रेण होमः । अभिघारः सर्वत्र ज्ञेयः, नानभिघृतं हविरस्तीति सक्तूनाम् ॥ ४ ॥

उभयत्राखुराजाय बलिं हरेदाद्यन्तयोर्वा ॥ ५ ॥

उभयत्रेति औपसदहोमे अवटहोमे च । अन्ये त्वाहुः—उभयत्रेत्यत्र सायंप्रातर्होमकालो लक्ष्यते । यदुक्तं दिवाचरेभ्यो भूतेभ्यो दिवा, नक्तञ्चरेभ्यो नक्तमिति वैश्वदेवबलिहरणम्, तत्र स्थाने सक्तुबलिरनेनोच्यते चातुर्मासिको गृह्यान्तरे तथादर्शनात् । सावित्रेण च देवस्य त्वेत्यादिना आखुराजाय बलिमुपहरामीत्यन्ते नैष बल्युपहारः । आद्यन्तयोर्वेति श्रावणीफाल्गुन्योरिति केचित् । आद्यन्तयोर्हविषोरपूपसक्तुलक्षणयोराखुराजाय बलिं हरेदिति त्वन्ये ॥

वषट् ते विष्ण आस आकृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।

वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥

वैष्णवी । त्रिष्टुप् । देवपुत्राणामार्षम् । हे विष्णो व्यापक, हे शिपिविष्ट शिपयो रश्मयः शक्तयो वा जगतां निर्मात्र्यस्ताभिराविष्टो व्याप्तः शिपिविष्टस्तस्य संबोधनं हे शिपिविष्ट विष्णो अहं ते तव वषट् आकृणोमि वषडन्तेन मन्त्रेण हविर्ददामीत्यर्थः । क्व । आसे छान्दसो वर्णलोपः

आस्ये अग्नौ। अग्निरेव हि सर्वदेवानां मुखं, तेनैव हि देवाः सुहवींषि भुञ्जते। तद्धव्यं हविः मे मम संबन्धि जुषस्व भुङ्क्ष्व। किंच मम संबन्धिन्यो गिरो वाचो मन्त्रात्मिकाः सुष्टुतयः शोभनस्तुतिरूपास्त्वां वर्धयन्तु। यूयमिति पूजायां बहुवचनं, व्यत्ययेन वा। त्वं च स्तुतिभिर्वार्धितो हविषा च प्रमोदितो नोऽस्मान्पाहि रक्ष सदा सर्वकालम्॥

रात्री व्यख्यदायती पुरुत्रा देव्यक्षिभिः।
विश्वा अधिश्रियोऽधित॥

गायत्री। रात्रिर्देवता। देवपुत्राणामार्षम्। रात्री रजनी आगच्छन्ती व्यख्यत् 'ख्या प्रथने' विविधं प्रकाशं करोति। कैः। अक्षिभिश्चन्द्रादिभिः। देवी द्योतमाना। पुरूणि बहूनि त्रायते इति पुरुत्रा। किंच विश्वाः सर्वा अधिश्रियः अधिकशोभा अधित आधत्ते॥

नमो अस्तु सर्पेभ्यो ये के च पृथिव्यामधि।
ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः॥

काण्डपतितस्य सर्पराजस्यार्षम्। सर्पेभ्यो नमो अस्तु कायवाङ्मनोभिः प्रणतिर्भवतु।

केभ्यः। ये के च पृथिव्यामधि, क्षितेरुपरि, तथा येऽन्तरिक्षे दिवि च स्थितास्तेभ्यः सर्पेभ्यो नमः ॥

ये वादो रोचने दिवो ये वा सूर्यस्य रश्मिषु ।
येऽप्सु सदांसि चक्रिरे तेभ्यः सर्पेभ्यो नमः ॥

ये दिवो द्युलोकस्य रोचने द्योतने प्रकाशने स्थिताः वादो वादयितारः स्तनयित्नुकारिणः, ये च सूर्यस्य रश्मिषु स्थित्वा वर्षन्ति नागाः, ये चाप्सु सदांसि गृहाणि कृतवन्तः, तेभ्यः सर्पेभ्यो नमः ॥

येषु वा यातुधाना ये वा वनस्पतीरनु ।
येऽवटेषु शेरते तेभ्यः सर्पेभ्यो नमः ॥

वाशब्दश्चार्थे । येषु वा यातुधाना राक्षसाः स्थिताः तेन दृष्टस्योन्मत्तस्य दर्शनात्, ये च वनस्पतींल्लक्षणीकृत्य अवस्थिताः, ये चावटेषु बिलेषु शेरते तिष्ठन्ति, तेभ्यः सर्पेभ्यो नमः ॥ सावित्रो व्याख्यातः ॥

इति पञ्चपञ्चाशी काण्डिका ॥ ५५ ॥

अथ

## षट्पञ्चाशी कण्डिका।

श्रावणी

आयूतिके कपोते भयार्ते सक्तुषु भस्मनि वा पदं दृष्ट्वा देवाः कपोत इत्यष्टर्चेन स्थालीपाकस्य जुहोति ॥ १ ॥

प्रायेण वर्षासु कपोताः प्रोद्भवन्तीति श्रावणीप्रसङ्गेन कपोतनिलयशान्तिरुदिता। यूतिः संघस्तत्प्रतिषेधेनायूतिः संघवियोगोऽभिप्रेतः। अयूतौ भव आयूतिकः। सदा यः संघचारी कपोतः, स दैवाच्छ्येनादिना वा आगूर्य वियोजितो भीतो यदा गृहं प्रविशति, तदेयं शान्तिरुच्यते, नतु केवलचारिणि दृष्टे निर्भये गृहदेवकुलादिनिवासिनि ग्रामकपोते तादृशे। आयूतिकं कपोतं गृहसंबद्धं भयार्तं दृष्ट्वा गृहपतिः स्थालीपाकस्य जुहुयात् 'देवाः कपोत' इत्यादिभिरष्टाभिर्ऋग्भिः। यदापि स्वरूपेण कपोतं न पश्यति, किं तर्हि, गृहाभ्यन्तरे भस्मनि

सक्तुषु वा कपोतचरणप्रतिबिम्बमवलोकयति, तदापि जुहुयात् । यमदूतो हि कपोतः तं प्रत्यक्षेणानुमानेन वा कृतसन्निधानं गृहे बुद्ध्वा महतोऽरिष्टस्य शान्तये स्वस्त्ययनं कुर्यात् । क्वचिदायूथिकः सुस्पष्टः ॥ १ ॥

**परीमे गामनेषतेति गां परिणयन्ति सा दक्षिणा ॥ २ ॥**

परीमे गामित्यादिमन्त्रजातेन गां परिणयन्ति, सैव दक्षिणा । परिणयन्तीति बहुवचनेन गृहपतिव्यतिरिक्तस्यान्यस्यापि अत्र कर्तृत्वं दर्शयति । परिणयो विवाहः । अत्रापीष्टिविकारत्वादाज्यभागान्तं कृत्वा स्थालीपाकहोमः ॥ २ ॥

देवाः कपोत इषितो यदिच्छन्दूतो निर्ऋत्या इदमाजगाम ।
तस्मा अर्चामकृणुवाम निष्कृतिं शं नो भव द्विपदे चतुष्पदे ॥

ऋषिः प्रचेता आङ्गिरसः वैश्वदेवः, नैर्ऋतः कपोतो देवता, चतस्रस्त्रिष्टुभः, पञ्चमी गायत्री षष्ठी च, ततोऽनुष्टुभौ । हे देवा अयं कपोतो निर्ऋत्या दानवमातुर्दूत इषितः प्रेषितः सन् इ-

दमस्मद्भवनं यत्किंचिदशुभमिच्छन्नागतः, तस्मै अशुभाय तस्य निवृत्तयेऽर्चां पूजां शान्तिमकृणुवाम कुर्मः । कीदृशीमर्चाम् । निष्कृतिं निष्कर्तनं निःशेषेण च्छेदनं निष्कृतिस्ताम् । अतो हे कपोत शं सुखं द्विपदे मानुषरूपे चतुष्पदे गवाश्वादिके भव, शुभं सर्वत्र द्योतयेत्यर्थः, अथवा शुभं 'भवतु' इति पुरुषव्यत्ययः ॥ १ ॥

शिवः कपोत इषितो नो अस्त्वनागा देवाः शकुनो गृहेषु ।
अग्निर्हि विप्रो जुषतां हविर्नः परि हेतिः पक्षिणी नो वृणक्तु ॥

हे देवाः कपोतोऽस्माकं शिवः श्रेयस्करो भवतु इषितः प्रेषितः यमेन । अनागाः आगोऽपराधः निरपराधः अपराधमस्माकं मा कार्षीदित्यर्थः । शकुनः शकुनिः पक्षी, शकुनं वा विद्यते यस्य स शकुनः अमङ्गलभूतोऽपि मङ्गलभूतोऽस्मद्गृहेषु स्वस्त्ययनबलाद्भवत्वित्यर्थः । अग्निश्चास्मदीयं हविर्जुषतां सेवताम् । कीदृशः । विप्रः 'प्रा पूरणे' विविधैः कामैः पूरयति यजमानमिति विप्रः । किंच हेतिरायुधं यमस्य संबन्धि नोऽस्मान् परिवृणक्तु परिवर्जयतु दूरेण । कीदृशी हेतिः । पक्षिणी पक्षयुक्ता कपोतात्मिका ॥ २ ॥

हेतिः पक्षिणी न दभात्यस्मानाष्ट्रयां पदं कृणुतामग्निधाने ।
शं नो गोभ्यश्च पुरुषेभ्यो अस्तु मा नो हिंसीदिति देवाः
कपोतः ॥ ३ ॥

अस्मान्स्वस्त्ययनं कुर्वतो हेतिः पक्षवती न दभाति हिनस्ति, अतश्चाष्ट्यां पदं कुरुताम्, अश्नोति व्याप्नोति समन्तादस्मान् स अष्टा शत्रुस्तस्येयं वसतिराष्ट्री, तस्यां पदं कृणुतां करोतु । क्व । अग्निधाने । अस्मच्छत्रोः स्वस्त्ययनेन निराकृतस्याधर्मादेरग्न्याधानं गृहे वर्तते तत्र दह्यत इत्यर्थः । अतश्चास्माकं गवार्थं पुरुषार्थं च श्रेयोऽस्तु । हे देवाः कपोतोऽस्मान् मा हिंसीन्मा वधीत् ॥ ३ ॥

यदुलूको वदति मोघमेतद्यत्कपोतः पादमग्नौ कृणोति ।
यस्य दूतः प्रहित एष एति तस्मै यमाय नमो अस्तु मृत्यवे ॥

उलूको यद्वदत्यशुभं पूरयति तन्मोघं निष्फलमस्तु, यदपिच कपोतः पदमग्न्याधाने चुल्ह्यादौ करोति प्रत्यधिष्ठापयति सक्त्वादिषु वा, तदपि मोघं निष्फलमस्तु । यस्य च संबन्ध्येव दूतः प्रहितः सन्नेत्यागच्छति, तस्मै मृत्यवे नमोऽस्तु ॥ ४ ॥

नुदे त्वा प्रणुदे त्वा कपोतोलूक रक्षसा सह ।
यतो न इहागहि तत्र त्वा पुनर्गमयामसि ॥ ५ ॥

हे उलूक कपोतापरपर्याय, तव नैर्ऋतत्वात् रक्षांसि सहायाः, अतो रक्षसा सह त्वामहं नुदे अपसारयामि, प्रणुदे च त्वां नुन्नमपि प्रकर्षेण नुदामि दूरं प्रक्षिप्य दूरतरं प्रक्षिपामि इत्यर्थः । यतो यमगृहादस्मद्गृहं त्वमागहि आगच्छसि, तत्रैव पुनस्त्वामहं प्रापयामि ॥ ५ ॥

ऋचा कपोतं नुदत प्रणोदमिषं नयन्तः परि गां नयध्वम् ।
संयोपयन्तो दुरितानि विश्वा हित्वा न ऊर्जं प्रपतत्पतिष्ठाः ॥

हे अस्मत्सहाया ऋत्विजः, कपोतं नुदत अपसारयत प्रणोदं प्रणुद्य प्रणुद्य प्रणोदं 'आभीक्ष्ण्ये णमुल्' । किं कुर्वन्तः । ऋचा इषं नयन्तः, इषमन्नं हविर्नयन्तः देवेभ्यः प्रापयन्तः प्रयच्छन्तः ऋचा मन्त्रेण । किंच, परि गां नयध्वं, गां च परिणयत । संयोपयन्तो दुरितानि विश्वा, संयोपयतिः संमोहने वर्तने च 'ते दिशोऽयोपयन्यद्दिशोऽयोपयत्तद्यूपस्य यूपत्वम्' इति श्रुतेः, विश्वा विश्वानि सर्वाणि दुरितान्युपद्रवकारीणि संयोपयन्तः संमोहय-

न्तो विनाशयन्तः । हित्वा न ऊर्जं प्रपतत्प- तिष्ठाः, नोऽस्माकं संबन्धि ऊर्जं बलमन्नं च हित्वा त्यक्त्वा प्रपतत् प्रपततु पलायतां प्रकृतः कपोतः । स हि पतिष्ठः, अतिशयेन पतिता गन्ता पतिष्ठः 'तुरिष्ठेमेयस्सु' इति तृशब्दस्य लोपः । अस्मादेव मन्त्रलिङ्गात्स्थालीपाकहवि- र्गोपरिणयश्च ज्ञायते ॥ ६ ॥

पराङेव परावत पराचीरनुसंपतन् ।
अथो यमस्य त्वा गृहे आभूतं परिचाकशत् ॥ ७ ॥

हे कपोत पराङेव पराङ्मुख एवास्मानवे- क्षमाणः परावत गच्छ । पराचीरनुसंपतन्, पराङ्मुखीर्दिशो हेतीश्चानुसंपतन् सम्यगनुवर्त- मानः । अथोऽनन्तरं यमस्य गृहे आभूतमाभव- न्तमाविर्भवन्तं त्वां परिचाकशत् आभिमुख्येन पश्यतु यमपरिवारः ॥

अग्निर्ऋषिः पवमानः पञ्चजन्यः पुरोहितः ।
तमीमहे महागयम् ॥ ८ ॥

अग्निर्ऋषिः सर्वस्य ज्ञाता । पवमानः सर्वस्य प- वत्रीकारेण । पञ्चजन्यः पञ्चभ्यो जनेभ्यो हितः, पञ्च जनाः प्राणादयो वायवः, अथवा चत्वारो

वर्णाः, अनुलोमप्रतिलोमजवर्णश्च पञ्चमः । पुरोहितः पुरोऽग्रे परलोके हितः । तमग्निं वयमीमहे याचयामहे कपोतभयापनुत्तिमत् महागयं बृहद्गृहम् । लोकत्रयं हि वह्नेर्गृहम् ॥ ८ ॥

परीमे गामनेषत पर्यग्निमहृषत ।
देवेष्वक्रत श्रवः क इमाँ आदधर्षति ॥

अग्निं परिहृतवन्तः वह्निं परि समन्ताद्विहृतवन्तः, अथवा बुभुक्षितमग्निं पूजया परिहृतवन्तः तृप्तं सन्तं पराङ्मुखीकृतवन्तः । सुष्ठु तृप्तो हि भोजनपराङ्मुखो भवति । यतो देवेष्वक्रत श्रवः, श्रवोऽन्नं हविः देवेष्वक्रत आभिमुख्येन दत्तवन्तः ॥

इति कपोतनिलयशान्तिः ॥

इति षट्पञ्चाशी काण्डिका ॥ ५६ ॥

अथ

सप्तपञ्चाशी काण्डिका ।

आश्वयुज्यामश्वान्महयन्ति सर्वाणि च वाहनानि ॥ १ ॥

अश्वयुजा नक्षत्रेण युक्ता पौर्णमासी आश्वयुजी, तस्यां नृपतिप्रभृतीनामश्वाद्यधिपतीनामश्वादिस्वस्त्ययनमिदं कर्तव्यमुच्यते । अश्वान्महयन्ति पूजयन्ति स्नानानुलेपनालङ्कारप्रभृतिभिः शृङ्गारयन्ति, सर्वाणि च करिकरभखरप्रभृतीनि वाहनानि यथासंभवं महयन्ति ॥१॥

उत्तरतो ग्रामस्य वेद्याकृतिं कृत्वा शाखाभिः परिवार्याहतैश्च वासोभिः सर्वरसैर्घटान्पूरयित्वा दिक्षु निदध्यात्सर्वबीजैश्च पात्राण्यवान्तरादिक्षु ॥ २ ॥

ग्रामस्य या उत्तरा दिक्, तत्रेष्टिविकारत्वादिष्टिवेदिसदृशीं चतुरस्रां वेदिं कृत्वा, तां च शाखाभिरहतैश्च वासोभिः परिवार्य, सर्वरसैर्मधुरादिभिरिक्षुरसप्रभृतिभिर्घटान् पूरयित्वा पू-

र्वादिषु चतसृषु दिक्षु निदध्यात् स्थापयेत्, सर्वैश्च व्रीह्यादिबीजैः पात्राणि पूरयित्वा विदिक्षु पूर्वोत्तरादिषु निदध्यात् ॥ २ ॥

तमपरेण यथोक्तमुपसमाधाय जयप्रभृतिभिर्हुत्वा तिस्रो देवता यजेत वरुणमग्निमश्विनावाश्वयुजीं च ॥ ३ ॥

तस्य रचितोपचारस्यापरभागे यथोक्तमाज्यभागान्तं हुत्वा जयप्रभृतिभिश्च राष्ट्रभृदन्तैर्हुत्वा तिस्रो देवता यजेत नामधेयेन तद्देवतया वा ऋचा। कास्तास्तिस्रः अग्निं वरुणमश्विनाविति। आश्वयुजीं च चतुर्थीं, तां तु नामधेयेनैव आश्वयुज्यै स्वाहेति तल्लिङ्गमन्त्राभावात्। आज्यमत्र हविः ॥ ३ ॥

इज्यमानेऽश्वान्योजयन्ति सर्वाणि च वाहनानि ॥ ४ ॥

यागे क्रियमाणेऽश्वादीन्योजयन्ति पर्याणालङ्कारादिना ॥ ४ ॥

प्रदक्षिणं देवयजनं कवचिनस्त्रिः परियन्ति ॥ ५ ॥

देवयजनं यागस्थानं वेदिस्तस्याः परिहितकवचाः करितुरगप्रभृतयः प्रदक्षिणं भ्रमणत्रयं कुर्वन्ति ॥ ५ ॥

प्रहर्षाः कुर्वन्ति ॥ ६ ॥

प्रहृष्टाः सन्तो घातादिकं कुर्वन्ति ॥ ६ ॥

इष्टे यथार्थं संप्रयान्ति ॥ ७ ॥

इष्टे यागे निवर्तिते सति यथार्थं यथाप्रयोजनं सम्यक् प्रहृष्टाः यान्ति । यो यत्राधिकृतः, स तं स्थानविशेषमनुसरतीत्यर्थः ॥ ७ ॥

गौर्वासः कंसो हिरण्यं च दक्षिणा ८

समस्तं च गवादि दक्षिणा ॥ ८ ॥

रसा बीजानि वासांसि ॥ ९ ॥

दक्षिणेत्यनुषज्यते । रसा ये घटेषु कल्पिताः, बीजानि च पात्रेषु, वासांसि वेदिवरणानि, तानि सर्वाण्येव दक्षिणा । उपयुक्तानां दक्षिणया प्रतिपत्तिः कर्तव्येत्यर्थः ॥ ९ ॥

इति सप्तपञ्चाशी काण्डिका ॥ ५७ ॥

अथ

## अष्टपञ्चाशी कण्डिका ।

अस्यामेवाश्वयुज्यां गोमतां स्वस्त्ययनमाह

**अथ गोमतां विधिः ॥ १ ॥**

'उपसृष्टा गावो वसन्ति'(७) इति लिङ्गात् सर्वमेतत्कर्म गोस्वामिनामुपदिश्यते ॥ १ ॥

**इह प्रजा यासामूधः पृषदश्वा घृतप्रतीक इति पृषातकस्य जुहोति ॥ २ ॥**

पृषातकं पृषदाज्यं तत्पुनर्दधिमिश्रमाज्यमतश्च सान्नाय्यधर्मकम् । आज्यभागान्तं चोपसमाधानं कृत्वा विष्णोर्मनसेति पवित्रं कृत्वा अग्निजिह्वेति पृषातकमुत्पूय प्रधानयागोऽयं कर्तव्यः । मान्त्रवर्णिक्यश्च देवताः । मन्त्रास्तु 'इह प्रजा' इत्यादिभिः प्रतीकैश्चत्वारो विनियुक्ताः । तैश्चतुर्भिश्चतस्र आहुतयः ॥ २ ॥

**अम्भःस्थेति लवणमभिमन्त्र्याहुतिचतुष्टयादनन्तरं गोभ्यो दद्यात् ॥ ३ ॥**

**रौद्रीभिरभिजुहुयात् ॥ ४ ॥**

मृडा नो रुद्र इति तिसृभी रौद्रीभिर्जुहुयात् ॥ ४ ॥

**नित्याभिश्च ॥ ५ ॥**

जुहुयादित्यनुषङ्गः । नित्याः पुनः ऋच इह गावः, अयं यज्ञः, आ नः प्रजामिति तिस्र एव स्मर्यन्ते बहुप्रधानसंबन्धात् ॥ ५ ॥

**दधिक्राव्ण इति पृषातकस्य प्राश्नाति ॥६**

दधिक्राव्ण इति मन्त्रेण पृषातकस्य शेषं प्राश्नाति ॥ ६ ॥

**उपसृष्टा गावो वसन्ति ॥ ७ ॥**

वत्सैर्युक्ता गावस्तां रात्रिं वसन्ति ॥ ७ ॥

इह प्रजा विश्वरूपा रमन्तामस्मिन्गोष्ठे विश्वभृतो जनित्रीः ।
अग्निं कुलायमभिसंवसाना अस्मानवन्तु पयसा घृतेन ॥

त्रिष्टुप्, गावो देवता, ब्रह्मण आर्षम् । इह अस्मद्गृहे प्रजा गवामपत्यानि रमन्तां क्रीडन्तु विश्वरूपाः सर्वा अस्मिन् गोष्ठे गवां स्थाने । विश्वभृतः सर्वस्य पोषिका यज्ञवृष्ट्यादिद्वारेण, जनित्रीः जनित्र्यः अवन्त्यः, अग्निं कुलायं पश्वास्पदं सम्यग्वसाना आच्छादयन्त्यः 'अग्निः प-

शूनां कुलायः' इत्यनुश्रवः। अस्मानवन्तु रक्षन्तु आगच्छन्तु प्रीणयन्तु तर्पयन्तु प्रविशन्तु। केन। घृतेन, पयसा च॥

यासामूधश्चतुर्बिलं मधोः पूर्णं घृतस्य च।
ता नोऽवन्तु पयस्वतीरस्मिन्गोष्ठे वयोवृधः॥

अनुष्टुप्, ऋषिदेवते पूर्ववत्। अस्मिन्गोष्ठे वर्तमानास्ताः पयस्वतीः क्षीरान्विताः अस्मानवन्तु। वयोवृधः, वयो धनं वर्धयन्तीति वयोवृधः। कास्ताः। यासामूधो दुग्धाधारश्चतुर्बिलं स्तनचतुष्टययुक्तं मधोर्मधुना मधुरसेन क्षीरेण, घृतेन च पूर्णम्॥

पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे मा देवा अवसागमन्निह॥

वैश्वदेवी, जगती, शिशुशैशवयोरार्षम्। मरुतः सूर्यरश्मयश्चात्र विश्वेदेवाः। इह यज्ञे विश्वे सर्वे देवा आगच्छन्तु अवसा अन्नेन धनेन च सह। पृषदश्वा मरुतः मितराविणः। पृश्निः पृथिवी द्यौर्वाग्वा माता येषां ते पृश्निमातरः। शुभंयावानो शुभस्योत्कृष्टस्य फलस्य प्रापयितारः। विदथेषु यज्ञेषु जग्मयो गन्तारः।

अग्निनैव हविः स्वादयन्तीत्यग्निजिह्वाः । मनवो मन्तारः। सूर्य इव दृश्यन्ते सूरचक्षसः ॥

घृतप्रतीको घृतपृष्ठो अग्निर्घृताहवनो घृतमस्य धाम ।
घृतप्रुषो हरितस्त्वावहन्तु घृतं पिबन्यजताद्देव देवान् ॥

आग्नेयी, त्रिष्टुप् । हे देव अग्ने घृतं पिबन् त्वं यज पूजय देवान् । हरितोऽश्वास्त्वामावहन्तु, रश्मयो वा हरितः । त्रिस्थानो ह्यत्राग्निः । कीदृशा रश्मयः । घृतप्रुषः घृतमाज्यमुदकं वा दहन्तीति घृतप्रुषः । अग्निः कीदृशः । घृतप्रतीकः, घृतमभिमुखीकृत्य कायति प्रकाशयतीति घृतप्रतीकः, घृतेन हि प्रज्वलितो भौमोऽग्निः प्रकाशते । घृतपृष्ठः, वाडवोऽग्निर्वैद्युतो वा । घृतमाहूयतेऽस्मिन्निति घृताहवनः। घृतमुदकमस्य वाडवाद्यग्नेर्धाम स्थानम् ॥

अम्भः स्थाम्भो वो भक्षीय महः स्थ महो वो भक्षीयोर्जः स्थोर्जं वो भक्षीय रायस्पोषः स्थ रायस्पोषं वो भक्षीय रेवती रमध्वमस्मिन्योनावस्मिन्गोष्ठेऽयं वो बन्धुरितो मापगात मा मा हासिष्ट बह्वीर्मे भवत ॥

गाव उच्यन्ते—यूयमम्भः पानीयं स्थ भवथ यज्ञद्वारेण वृष्टिसंभवहेतुत्वात् । अतो

युष्माकं संबन्धि अम्भोऽहं भक्षीय क्षीरमप्यत्राम्भः । महः स्थ ओजोरूपा यूयं भवथ, ततो महो भक्षीय प्राप्नुयाम् । ऊर्जमन्नानि पयोद्वारेण भवथ, ततः ऊर्जं भक्षीय । रायो धनस्य पोषः पुष्टिर्भवथ यूयमतोऽहं यौष्माकं धनपोषमश्नुयाम् । रेवती रमध्वं 'पशवो वै रेवती' इति श्रुतेः रेवत्यो यूयं रमध्वमिह गृहे क्रीडत । अस्मिन्योनौ यजमाने अर्जनहेतौ, अत्र गोष्ठे गवां स्थाने अयं यजमानो गोपतिर्बन्धुः पोषकत्वात् । अत इतो यजमानात् मापगात अन्यत्र मा गुः, मां मा हासिष्ट मा त्याक्षुः, बह्व्यश्च मे भवथ ॥

संहितासि विश्वरूपा गौरा मोर्जा विशा गौपत्येना प्रजया रायस्पोषेण मयि वो रायः श्रयन्तां सहस्रपोषं वः पुषेयम् ॥

संहिता विश्वरूपा गौरिति त्रीणि गोनामानि, व्यत्ययेनैकवचनम् । सम्यग्घिताः, विश्वरूपाश्च सर्वस्योत्पादकत्वेन, गावो गम्य आगम्य इह मर्त्यलोके यज्ञाद्यर्थम् । अत आ मोर्जा विश, ऊर्जा अन्नेन बलेन च सह मा-

माविशत व्याप्नुत । गौपत्येन च गोपतित्वेन सह आविशत। वो युष्माकं रायो धनानि मयि श्रयन्तां समाश्रयन्तु । सहस्रपोषं वः पुषेयं, युष्मत्संबन्धिन्या सहस्रसंख्यया पुष्टः स्यां गोसहस्राणामधिपतिः स्यामित्यर्थः । अमुमपि प्रयुञ्जते इति अविनियुक्तोऽपि व्याख्यातः । वयोऽपि च पोषयन्त्यनेन मन्त्रद्वयेन ॥

रौद्रीभिरभिजुहुयादित्याज्येन होम इति रौद्र्यो यथाप्रयोगं व्याख्यायन्ते

मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते । यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु ॥ १ ॥

अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः । सुम्नायन्निद्विशो अस्माकमाचरा रिष्टवीरा जुहवाम ते हविः ।२।
त्वेषं वयं रुद्रं यज्ञसाधनं वङ्कुं कविमवसे निह्वयामहे । आरे अस्मद्मतिं हेडो अस्यतु सुमतिमिद्वयमस्यावृणीमहे ।३।

रौद्र्यः, जगत्यः, असितस्य देवलस्यार्षम् । गवां रोगशमनमाध्यया । हे रुद्र, नोऽस्मान् मृड सुखय, उत अपिच नोऽस्माकं मयः सुखं कृधि कुरु । ते तुभ्यं नमस्कारेणान्नेन वा विधेम

परिचरामः, तुभ्यमन्नं दद्म इति वा व्यत्ययेन योजना। कीदृशाय ते । क्षयद्वीराय क्षीयमाणा वीरा विक्रान्ताः शत्रवो यस्य संनिधौ, स क्षयद्वीरस्तस्मै । किंच, हे रुद्र तदश्याम व्याप्नुयामो वयं तव प्रणीतिभिः प्रणयैः प्रणयनैर्वा अर्चनैः। किं तत्। यत् शं च सुखं च, योश्च सुब्व्यत्ययेन युं च, 'यु पृथग्भावे' रोगस्य पृथग्भावं मनुः प्रजापतिरायेजे, दानार्थोऽत्र यजिः, ददौ प्रजाभ्यो यत्सुखं नीरोगत्वं च, तदश्याम । पिता प्रजानां जनकः ॥ १ ॥

हे रुद्र मीढ्वः सेक्तः माध्यमिकरूपेण अनया देवयज्यया देवयागेन तव सुमतिं शोभनबुद्धिमश्याम । किंच अस्माकमस्मान् अद्विषः शत्रुरहितान् कुरु सुम्नायन् सुखयन्। रिष्टवीरा जुहवाम ते हविः, एवं सति तव हविः जुहुमो रिष्टवीराः हतशत्रवः सन्त इति तवाप्युपचयो भवति ॥ २ ॥

वयं रुद्रं निह्वयामहे आह्वयामः, सुमतिं च वृणीमहे याचामहे अस्मात् । इदिति पाद-

पूरणे । किंच आहूतोऽभ्यर्थितश्च रुद्रः अस्मत् अस्मत्तः हेडः क्रोधममतिं कुमतिमारे दूरे अस्यतु । कीदृशं रुद्रम् । त्वेषं दीप्तम् । यज्ञस्य साधनभूतं तस्योद्देश्यत्वात् तत्र, वङ्कुं, गत्यर्थो वङ्किः, गन्तारम् । गतिरहितो ह्याहूतः किं कुर्यात् । कविं क्रान्तदर्शनम् । किमर्थमाह्वयामः । अवसे रक्षणाय अन्नाय च ॥ ३ ॥

इह गावः, अयं यज्ञः, आ नः प्रजामिति नित्या व्याख्याता दधिक्राव्ण इति च ॥

इत्याश्वयुजी ॥

इति अष्टपञ्चाशी काण्डिका ॥ ५८ ॥

अथ

## एकोनषष्टितमी काण्डिका ।

अथ वृषोत्सर्गः ॥ १ ॥

अथशब्दोऽधिकारार्थः । अथार्तवस्वस्त्ययनमध्येऽपि वृषोत्सर्गोऽधिकृतोऽनन्तरं बोद्धव्यः । इह वृषोत्सर्गः पितृणां परोपकारार्थत्वेन स्मृतः

'एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥' (ग० पु०)

इति ॥ १ ॥

कार्तिक्यां पौर्णमास्यां रेवत्यामाश्वयुजस्य गवां मध्ये सुसमिद्धमग्निं कृत्वा पौष्णं चरुं पयसि श्रपयित्वा पूषा गा अन्वेतु न इति पौष्णस्य जुहोति ॥ २ ॥

कृत्तिकायुक्तश्चन्द्रो यस्यां भवति, सा कार्तिकी पौर्णमासी । तस्यामाश्वयुजस्य वा संबन्धिनि रेवतीनक्षत्रे कर्मेदं कर्तव्यमिति कालविकल्पः । कथं कर्तव्यमित्याह—गवां मध्ये स्वगोष्ठे समिद्धं दीप्तमग्निं कृत्वा, पूषदेवताकं चरुं पयसि श्रपयित्वा, आदित्यप्रायणीयचरुविकारं

'पूषा गा अन्वेतु नः' इति पौष्णस्यावदानद्वयमुद्धृत्य जुहुयात् ॥ २ ॥

इह रडिरिति हुत्वा ॥ ३ ॥

इह रडिरित्याद्या दशाहुतीर्जुहुयात् प्रधानानन्तरम् ॥ ३ ॥

रुद्राञ्जपेत् ॥ ४ ॥

ततो रुद्राभिधानान् षडनुवाकान् जपेत् ४

जीववत्सायाः पयस्विन्याः पुत्रमेकरूपं द्विरूपं वा यो वा यूथं छादयेद्यूथे च तेजस्वितमः स्यात्तमलंकृत्य चतस्रोऽष्टौ वा वत्सतर्यस्ताश्चालंकृत्यैतं युवानं पतिं वो ददाम्यनेन क्रीडन्तीश्चरथ प्रियेण। मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन्निति ॥ ५ ॥

अतिशयप्रत्ययार्थ आरम्भः। उत्सृजेदित्येतदपेक्षया द्वितीया। ततोऽपि एकरूपं द्विरूपं वा। एकरूपत्वेऽपि रोहितरूपं 'रोहितरूपाः पशवो भूयिष्ठाः' इति श्रुतत्वात् रोहितवर्णम्। बह्वृचे चोक्तं

'द्विहायनमेकहायनं वा नीलं बभ्रुं कपिलं च।'

इति। द्विरूपत्वेऽपि बभ्रुं सप्तशुक्लैश्चन्द्रकैश्चित्रितम्। पुराणे च

'सप्त यस्य तु शुक्लानि लाङ्गूलं ककुदं मुखम्।
खुरांश्च चतुरः शुक्लं तादृशं वृषमुत्सृजेत्॥'

इति रूपेणोक्तम्। मुख्यकल्पेनापि कृष्णादीनामन्यतमे तिलकितम्। यो वा यूथं गोगणं छादयेत् सर्वोन्नत इत्यर्थः। यो वा यूथे तेजस्वितमः शौर्यकान्त्यादियुक्तः, तमलंकृत्य वस्त्रमालाघण्टादिना। चतस्रोऽष्टौ वा वत्सतर्य इति विकल्पः। वत्सतर्योऽक्षतयुवत्यो दुहितरश्चतुर्वर्षाः। ता अपि पूर्ववदलंकृत्य एतमित्यादिमन्त्रेण। पौर्वकाल्यं वक्ष्यमाणजपापेक्षम्॥ ५॥

तस्य दक्षिणे कर्णे पिता वत्सानामिति जपेत्॥ ६॥

तस्य वृषस्य दक्षिणे श्रोत्रे पिता वत्सानामित्यादिमन्त्रं जपेत्। मन्त्रलिङ्गादयमेव त्यागमन्त्रः॥ ६॥

उत्सृज्य प्राचीमुदीचीं वा दिशं प्रका-

लयित्वा सह वत्सतरीभिः सर्पिष्मदन्नं ब्राह्मणान्भोजयेत् ॥ ७ ॥

उत्सर्गसंकल्पं निर्वर्त्य वत्सतरीभिः सह प्राचीमुदीचीं वा प्रकालयेत् नयेत्। ततः सर्पिषा भूयसा युक्तं हविष्यमन्नं नानाप्रकारं ब्राह्मणान् यथाशक्ति भोजयेत्। प्रकालनं कृत्वा प्रकालयित्वेति व्युत्पत्तेर्न ल्यबादेशः कृतः 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' (७।१।३७) यथा मिश्रीकृत्य ॥

पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः ।
पूषा वाजं सनोतु नः ॥

ऋषिपुत्राणामार्षम्। पूषा देवता। युष्माकं संबन्धिनीर्गाः पूषा अन्वेतु अनुगच्छतु। तथा अर्वतोऽश्वान् पूषा रक्षतु पालयतु अस्मदीयान् । एवमस्मभ्यं वाजमन्नं पूषा सनोतु विभजताम् । इयर्तीत्यर्वा, 'अन्येभ्योऽपि दृश्यन्ते' (३।२।७५) इति वनिप् । इह रडिरिति पठिता व्याख्याताः । आकूतिं च केचिदेवमाहुः, परे बह्वीः ॥

एतं युवानं पतिं वो ददाम्यनेन क्रीडन्तीश्चरथ प्रियेण।
मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन्॥

हे गावः, युष्मभ्यं एतं वृषं युवानं पतिं तरुणं भर्तारं प्रजननसमर्थं ददामि, अनेन प्रेयसा सह क्रीडन्त्यश्चरथ विचरथ । अनेन मन्त्रलिङ्गेन स्वगोवर्गान्तर्गतस्यापि रक्षणं प्रतीयते । किंच हे सोम राजन् वयं प्रजया पुत्रादिकया मा हास्महि प्रजया शून्या मा भूम स्वसंबन्धिन्या गोसंबन्धिन्या च, तथा तनूभिः शरीरैः मा हास्महि दीर्घायुषः स्यामेत्यर्थः । अपिच मा रधाम द्विषते 'रध हिंसासंराध्योः' द्विषते इति तृतीयार्थे चतुर्थी, द्विषता शत्रुणा हिंसिता मा भूमेत्यर्थः ॥

पिता वत्सानां पतिरघ्न्यानामथो पिता महतां गर्गराणाम् ।
रेतोधां त्वा यशोधां रायस्पोषायोत्सृजे ॥

हे वृष, त्वामुत्सृजे उत्सृजामि । किमर्थम् । रायो धनस्य पोषाय पुष्टये यतस्त्वं वत्सानां पिता जनकः । कथम् । अघ्न्यानामनुपहतानां गवां पतिर्यतः । किंच महतां गर्गराणां दध्यादिपरिपूर्णानां भाण्डविशेषाणां त्वं पितोत्पादको गोगर्भाधानद्वारेण, अतः पितृपरमोपकारकारित्वेऽपि तव

धनपोषे हेतुत्वमपि महदस्तीति प्रोत्साहनेयं स्वात्मनः। कीदृशं त्वाम्। रेतोधां रेतसो विधातारम्। यशोधां यशसो धातारं वृषोत्सर्गादि-यशस उदयात् ॥

इति वृषोत्सर्गः ॥

इति एकोनषष्टितमी काण्डिका ॥ ५९ ॥

---

अथ

षष्टितमी काण्डिका ।

स्वस्त्ययनान्तरमाह

**आग्रहायण्यामेतान्येव चत्वारि हवींष्यासादयेद्यानि श्रावण्याम् ॥ १ ॥**

अग्रे हायनस्य आग्रहायणी, अग्रे वा हायनो अस्या आग्रहायणी। हायनः संवत्सरः, तस्याग्रे आरम्भे वा, यस्य वा अग्रे पुरो हायनः, सा आग्रहायणी । सा तु मार्गशीर्षस्य पौर्णमासी। सैव संवत्सरस्याग्रे, तस्या वा संवत्सरोऽग्रे चैत्रा-

मावस्याया हि आरभ्य तदन्त एव ज्योतिः- शास्त्रे संवत्सरः प्रसिद्धश्चैत्रादिमासयुक्तः इति। आदिव्यवहाराद्रूढत्वे अदूरविप्रकर्षेण योगोऽप्यस्तीति निर्वचनम्। पौर्णमास्यश्चतस्रः स्वस्त्ययनस्योक्ताः—श्रावण्याश्वयुज्याग्राहायणी चैत्री चेति। तत्राग्रहायण्या चैत्रादिसंवत्सरः पुरः, सा वा तस्य पूर्वा। तत्र तान्येव चत्वारि हवींष्यासादयेत्, यानि श्रावण्यामुक्तानि ॥ १ ॥

विशेषमाह

यवमयस्त्वपूपः ॥ २ ॥

अपूपोऽत्र यवमयः। स्थालीपाकस्तु व्रीहिमय इति शेषः। एवं चात्र त्रयो यवमयाः संपन्नाः—अपूपा धानाः सक्तव इति ॥ २ ॥

एवा वन्दस्वेत्यपूपस्य जुहोति ॥ ३ ॥

एवा वन्दस्वेत्यादिना मन्त्रेण अपूपस्यावदानद्वयं जुहोति ॥ ३ ॥

उप ते गा इति स्थालीपाकस्य ॥ ४ ॥

गतार्थम् ॥ ४ ॥

उक्तं धानासक्तूनाम् ॥ ५ ॥

धानासक्तूनां यत् कर्म, तदुक्तमेव श्राव-
ण्यां तथैव कर्तव्यं, नास्ति तत्र विशेषः ॥ ५ ॥

अव ते हेड इति वारुणीभिरभिजुहुयात् ॥ ६ ॥

व्याख्यास्यमाना वारुण्यः ॥ ६ ॥

नित्याभिश्च ॥ ७ ॥

जुहुयादित्यनुषङ्गः । एता अपि इह गाव इत्याद्यास्तिस्रो व्याख्याताः । सर्वत्र मान्त्रवर्णिक्यो देवताः ॥ ७ ॥

त्वामग्ने वृषभं चेकितानं संवत्सरस्य प्रतिमामिति चोदग्दशमास्तरणमास्तीर्य शिरस्त उदकं निधाय व्रीहियवानुप्यापोहिष्ठीयाभिः शय्यामभ्युक्ष्य त्रातारमिन्द्रमिति शमीशाखया शय्यां निर्माष्टि ॥८

नित्याभिर्हुत्वा त्वामग्ने इति द्वाभ्यां जुहोति । तत उदीच्यां दिशि दशा यस्य भवन्ति तादृशमास्तरणं प्रस्तरणपटादिकमास्तीर्य भूमिशय्यायां प्रतिस्तीर्य, यत्र शिरस्तत्रोदकं

निधाय, तत्र च व्रीहियवान् प्रक्षिप्य शय्यामापोहिष्ठीयाभिस्तिसृभिरभ्युक्ष्य त्रातारमिन्द्रमिति शमीशाखया शय्यां निर्मार्ष्टि शोधयति ८

ऐन्द्राग्नं वर्मेत्यहतं वासः परिधाय स्योना पृथिवीति दक्षिणेन पार्श्वेन संविशति ज्योतिष्मतीत्यन्तेन ॥ ९ ॥

ऐन्द्राग्नं वर्मेत्यादिना मन्त्रेणानुपभुक्तं हेमन्तयोग्यं वासः परिधाय स्योना पृथिवीत्यादिना ज्योतिष्मतीत्यन्तेन संविशति शय्यां दक्षिणेन पार्श्वेन । सर्वानुवाकनिवृत्त्यर्थं ज्योतिष्मत्यन्तग्रहणम् ॥ ९ ॥

अभ्युक्षणादिसंविशत्येवं द्विरुत्तरम् १०

उत्तरं द्विः कर्म कर्तव्यम् । किं तत् । अभ्युक्षणादिसंविशत्येवं, एवंशब्दोऽन्तवचनः, संवेशनमित्यर्थः ॥ १० ॥

चैत्र्यामुद्रोहणमुपरिशय्या नात्र स्थालीपाको न शाखया निर्मार्ष्टि ॥ ११ ॥

एवंशब्दः संबन्धनीयः । एवमेव चैत्र्यां पौर्ण-

मास्यां कर्म कर्तव्यं, यथा आग्रहायण्यामुक्तम्। एतावांस्तु विशेषः—अत्रोपरिशय्या, अभूमौ खट्वायामित्यर्थः । अस्मादेव आग्रहायण्यां भूमौ शय्या गम्यते । अत एवात्रोद्रोहणं, ऊर्ध्वं रोहणमारोहणम् । अत एवोद्रोहणमित्यन्वर्थं नामास्य कर्मण इष्टम् । अयमपरो विशेषः—नात्र स्थालीपाकः, नापि शमीशाखया निर्मार्जनम्। परिशिष्टं तु सकलमाग्रहायण्या तुल्यम्।

अथ मन्त्रवृत्तिः

एवा वन्दस्व वरुणं बृहन्तं नमस्या धीरममृतस्य गोपाम् ।
स नः शर्म त्रिवरूथं वियंसत्पातं नो द्यावापृथिवी उपस्थे ॥

वारुणी। त्रिष्टुप्। अश्विनोरार्षम्। आत्मना आत्मोच्यते। वरुणमेव वन्दस्व। कीदृशम्। बृहन्तं महान्तम्। न केवलं तं स्तुहि, यावता नमस्या नमस्कुरु च। धीरं, धीर्विद्यते यस्य स धीरः, मत्वर्थीयो रः, तम्। अमृतस्य गोपाम्, अमृतमुदकं तस्य गोप्तारं रक्षकमप्पतित्वात् । स नः शर्म त्रिवरूथं वियंसत्, स स्तुतो नमस्कृतश्च सन् अस्मभ्यं शर्म सुखं शरणं वा गृहं विशेषेण यच्छतु ददातु । वियंसदिति लिङर्थे

लेट्। कीदृशं शर्म। त्रिवरूथं त्रिभिर्धर्मार्थकामैर्नियतं, ऋग्यजुःसामभिर्वा ध्रियमाणत्वात् त्रिवरूथं, त्रिभिर्लोकैर्वा। पातं नो द्यावापृथिवी उपस्थे, हे द्यावापृथिव्यौ अस्मान् पातं रक्षतं उपस्थे उत्सङ्गे कृत्वा मातेव पुत्रम्॥

उप ते गा इवाकरं वृणीष्व दुहितर्दिवः।
रात्रि स्तोमं न जिग्युषे॥

गायत्री। रात्रिर्देवता। हे रात्रि ते तुभ्यं स्तोममुपाकरं स्तोत्रमुपाकरोमि, तं वृणीष्व अभ्यर्थयस्व श्रद्धया स्वीकुरु। हे दिवो दुहितः अन्तरिक्षस्याकाशस्य ब्रह्मणः पुत्रि न जिग्युषे, नकार उपमार्थीयः, जिग्युषे इव यथा कश्चित् कस्मैचिज्जितवते स्तुतिं करोति, तथा त्वदर्थं स्तुतिमहं करोमीत्यर्थः। किमिवोपाकरोमि। गा इव। यथा कस्मैचिदुत्तमाय कश्चित् गा उस्त्रिया ददाति, तथाहं स्तुतिं करोमि। अथवा उपमानबलाद्गोदानमत्र गम्यते—यथा दक्षिणार्था गा उपाकरोमि, तथा स्तोमम्। यथा वा जितवते कश्चिद्गा उपाकरोति, तथा तुभ्यमहं स्तोममिति योजना। अथवा स्तोमं न स्तोममिव

गा इव च ते तुभ्यमुपाकरोमि । किम् । अर्थात् हविरिति योज्यम् ॥

अव ते हेडो० । उदुत्तमं वरुण पाश० । तत्त्वा यामि ब्रह्मणा० । एतास्तिस्रो वारुण्यो व्याख्याताः । इह गावः० । अयं यज्ञः० । आ नः प्रजां० । एता अपि तिस्रो नित्या व्याख्याताः । त्वामग्ने० । संवत्सरस्य० । एते द्वे । तत्र द्वितीया गायत्री रात्रिदेवताका व्याख्याता । आद्या तु व्याख्यायते

त्वामग्ने वृषभं चेकितानं पुनर्युवानं जनयन्नुपागाम् ।
अस्थूरिणो गार्हपत्यानि सन्तु तिग्मेन नो ब्रह्मणा संशिशाधि ॥

आग्नेयी । जगती । आत्रेयस्यार्षम् । चयने विनियुक्तेयम् । हे अग्ने अहं त्वामुपागतः । किं कुर्वन् । जनयन् चयनमन्थनाभ्याम् । कीदृशम् । वृषभं कामानां वर्षितारं कर्मद्वारेण । चेकितानं 'चिती संज्ञाने' 'लिटः कानज्वा' ( पा० सू० ३।२।१०६ ) ज्ञानवन्तम् । पुनर्युवानं पुनःपुनस्तरुणं नित्यनवमित्यर्थः । अतो नोऽस्मान् तिग्मेन तीक्ष्णेन ब्रह्मणा ब्रह्मवर्चसेन सम्यक् शिशाधि संपादय विद्यानुष्ठानरूपब्रह्म-

वर्चसयुक्तानस्मान् संपादयेत्यर्थः। अस्थूरिणो गार्हपत्यानि नः सन्तु, गृहपतेर्यानि कर्माणि तानि गार्हपत्यानि अस्थूरिणः अस्थूरीणि सन्तु। स्थूरिशब्दो विनाशवचनः, तत्प्रतिषेधेन अस्थूरीण्यविनाशीनि॥

आपो हि ष्ठा०। यो वः शिव०। तस्मा अरं गमाम वः०। एताभिस्तिसृभिर्भूमिशय्यायाः प्रोक्षणसंस्कारः क्रियते। व्याख्याताश्चैताः॥

त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम्।
ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः॥

ऐन्द्री। त्रिष्टुप्। अश्विनोरार्षम्। इन्द्रं ह्वयामि आह्वयामि परमेश्वरम्। कीदृशम्। त्रातारं रक्षकं, अवितारं गन्तारं सर्वगतमित्यर्थः। हवे हवे आह्वाने आह्वाने होमे होमे वा सुहवं सुखाह्वानं सुखहवनं वा। शूरं विक्रमयुक्तम्। शक्रं शक्तम्। पुरुहूतं बहुभिराहूतं हुतं वा। आहूतश्चेन्द्रो मघवा धनवान् अस्माकं स्वस्ति अविनाशं ददातु। पुनरिन्द्रशब्दोऽन्यत्र निवृत्त्यतिशयद्योतनार्थः॥

ऐन्द्राग्नं वर्म बहुलं यदुग्रं विश्वे देवा नातिविध्यन्ति शूराः । तन्नस्त्रायतां तन्वः सर्वतो महदायुष्मन्तो जरामुपगच्छेम जीवाः ॥

वैश्वदेवी । जगती । वायोरार्षम् । ऐन्द्राग्नं यद्वर्म कवचं, तन्नोऽस्माकं तन्वस्त्रायतां शरीराणि रक्षतु सर्वस्मात् । बहुलं विततं, उग्रं दृढं दुर्भेद्म् । तथाच विश्वे सर्वेऽपि देवा अतिशूरा अपि यत् न विध्यन्ति न भिन्दन्ति,तत्र का कथान्येषाम्। अतस्तेन वर्मणा कर्मरूपेण रक्षिताः सन्तो महता दीर्घेण आयुषा युक्ताः सन्तो जरां जर्झरितत्वमुपगच्छेम प्राप्नुयाम । जीवाः प्रशस्तेन कीर्तियुक्तेन जीवनेन युक्ताः सन्तः ॥

स्योना पृथिवि भवानृक्षरा निवेशनी । यच्छा नः शर्म सुप्रथः ॥ वाक्त्वा समुद्र उपदधातु सुप्रजावनिं रायस्पोषवनिं मह्यं वाजिनाय मही ध्रुवा सलिलासि ज्योतिष्मती ॥

उशनसः काव्यस्यार्षम् । सुप्रथ इत्यन्ता गायत्री। हे पृथिवि भूमे स्योना सुखा अस्माकं भव । अनृक्षरा कोमला, न ना क्षरत्यस्यामिति निवेश्यते अनया इति निवेशनी सुखनिवेशा । नोऽस्मभ्यं शर्म सुखं यच्छ देहि । सुप्रथः सुष्ठु

प्रथमानं दुःखेनानभिभूतम् । अथवा शोभनां प्रथां कीर्तिं च नो यच्छ ॥

इयं वाक् मन्त्रात्मिका त्वां समुद्रे उपदधातु, सम्यक् मुदं सुखं नित्यानन्दं रातीति समुद्रः, ब्रह्मणि पारमार्थिके अद्वितीये स्थापयत्वित्यर्थः। अथवा जलधिमाश्रिता पृथ्वी, सा गुरुत्वातिशययोगिनी सती मन्त्रबलेन समुद्रे तिष्ठतु प्लवमाना अमग्ना। कीदृशीं त्वाम्। सुप्रजावनिं शोभनां प्रजां वनोति विभजते सुप्रजावनिस्ताम्। एवं रायस्पोषवनिम्। किमर्थम्। मह्यं मदर्थम्। कीदृशाय। वाजिनाय वाजेन अन्नेन युक्ताय। मही महती, ध्रुवा स्थिरा सलिलयुक्ता असि भवसि हे पृथिवि। अत्र ऋतुद्वयस्थापनार्थं शय्याप्रोक्षणादिसंस्कारं कृत्वा ऋतुतिथ्यादि कर्तव्यम् ॥

इत्याग्रहायणी ॥

इति षष्टितमी काण्डिका ॥ ६० ॥

अथ

एकषष्टितमी काण्डिका ।

## तिस्रोऽष्टकाः पितृदैवत्याः ॥ १ ॥

अष्टकाः कर्तव्या इति मन्वादिभिः स्मृतम्। तच्च प्रयोगप्रकाशनार्थमन्त्रलिङ्गमूलं स्मरणम् ।

'यां जनाः प्रतिनन्दन्त्यष्टकायै सुमेधसे स्वाहा ।'

इति मन्त्रलिङ्गं

'एषाष्टका तपसा तप्यमाना स्वर्गे लोके कामधुग्भवति ।'

इति च । स्तुतिः स्तुत्ये विधेये सति युक्ता । तेन यथा कपिञ्जलादिविधिभ्योऽर्थवादकल्पना, तथात्रार्थवादाद्विधिमानम् । विध्येकवाक्यत्वेन ह्यर्थवादाः प्रमाणम् ।

'अष्टका पार्वणश्राद्धम्.......... ।'

इति चेहाप्युक्तम् । तेनेह कर्तव्यतोच्यते । तत्राष्टकाशब्दः कर्मसमुदायनाम राजसूयादिवत् । एकैकस्यां च कर्मत्रयं प्रतीयते । स्थालीपाककर्मैकं प्रधानम् । आवाहनादिसंतर्पितब्राह्मणानुव्रजनपर्यन्तं द्वितीयम् । आन्वष्टकं तृतीयम् । आज्यभागान्ता त्वितिकर्तव्यता ।

पूर्वं स्थालीपाकादि, ऋतुतिथ्यादिकं तु पश्चात् । तिस्रोऽष्टका भवन्ति पितृदेवत्याः । तेनावाहने अमुष्मै स्वधा नम इत्यादौ निर्वापणमन्त्रेषु च पित्रादिनामविशेषप्रतीतिः । वक्ष्यमाणपशुपक्षे वपाकर्तनादौ पितृभ्यस्त्वां जुष्टं निर्वपामीत्यादिप्रयोगः । अष्टकापि मन्त्रलिङ्गाद्देवता । नित्याश्चैता अवश्यकर्तव्यतास्मरणात् ॥ १ ॥

ऊर्ध्वमाग्रहायण्यास्त्रयस्तामिस्रास्तेष्वष्टमीष्वष्टकायज्ञः ॥ २ ॥

एवमाग्रहायण्या ऊर्ध्वं ये त्रयः कृष्णपक्षाः पौषमाघफाल्गुनाख्यास्तेषु या अष्टम्यस्तासु अष्टकायज्ञः कर्तव्यः । तिसृषु त्रयस्त्रिकसमुदायाः ॥ २ ॥

प्रथमां शाकेन द्वितीयां मांसेन तृतीयामपूपैः ॥ ३ ॥

कुर्यादिति शेषः । हविष्यान्ननिवृत्तिः । आज्यभागान्ते च पवित्रशाकाद्यं चतुरावर्तेन होतव्यं–अष्टकायै स्वाहेति ॥ ३ ॥

ऋतूनां पत्नीति षड्ढ द्वे स्थालीपाकस्य जुहोति ॥ ४ ॥

ऋतूनां पत्नीत्यादयः षड्टचः अनुवाकशेषभूताः । ताभ्यो निष्कृष्य द्वे द्वे ऋचौ प्रत्यष्टकं स्थालीपाकस्य जुहुयादाज्यभागान्ते ॥ ४ ॥

देवा ग्रावाण इति सर्वत्र तृतीया ५

देवा ग्रावाण इत्यादिका सर्वास्वष्टकासु भवति । तेन तृतीयेयमृग्भवति । ततश्चैकैकत्र तिस्रस्तिस्रो भवन्ति ॥ ५ ॥

इयमेव सेत्यनुवाकेन पञ्चभिः पञ्चभिरभिजुहुयात् ॥ ६ ॥

स्थालीपाकेनेष्ट्वा इयमेवेत्यादिना अनुवाकेन जुहुयात्। किं सकलेन सर्वत्रेत्याह—पञ्चभिः पञ्चभिरिति। इयमेव सेत्यादिना पञ्चभिः प्रथमायामष्टकायामभिजुहुयात्, पञ्च व्युष्टीरिति मध्यमायाम्, ऋतस्य धामेति तृतीयस्याम् । अभिशब्द उपरिवचनः, हविषामुपरि जुहुयादित्यर्थः । आज्येन चैता आहुतयः । अत ऊर्ध्वमृतुतिथ्यादिकम् ॥ ६ ॥

**अथ मन्त्रव्याख्यानावसरेऽनुवाको व्याख्यायते**

इयमेव सा या प्रथमा व्यौच्छत्सा वास्वन्तश्चरति प्रविष्टा ।
वधूर्मिमाय नवगज्जनित्री त्रय एनां महिमानः सचन्ते ॥

उषस्यः सर्वोऽनुवाकः । उषःशब्देन रात्रेरन्त उच्यते, तद्दैवत इत्यर्थः । देवानामार्षम् । त्रिष्टुप् छन्दः । प्रकाशात्मकमुषसो रूपं सर्वरात्र्यन्धकारापसारणस्वभावत्वात् । तत्र च ब्रह्माद्वैतात्मके जगति रात्रिरविद्या तमोरूपा, उषा तु विद्या प्रकाशस्वभावा । सांख्यदर्शने तु तामसी रात्रिरुषस्तु सत्त्वम् । इयमेव सा उषा या प्रथमा, या महाप्रलयरूपब्रह्मरात्र्यवसानात्मिका उषा, सैवेयम् । का सा । या व्यौच्छत् विशेषेण उञ्छनमपसारणं कृतवती, अपसारितवती । किम् । अर्थात्तमः अविद्याम् । सा वास्वन्तश्चरति, सा उषा आसु वर्तमाना अन्तर्मध्ये चरति संचरति । प्रविष्टा सती या वधूर्मिमाय, वहतीति वधूः आपो वा, निर्मितवती ब्रह्मरूपविद्यात्मिकेमाः । नवगत्स्तुतिपात्रम् । जनित्री जनिका, त्रिलोकी इयं ब्रह्मणो विवर्तः परिणामो वा । त्रय

एनां महिमानः सचन्ते, यस्मात्त्रयो लोका महिमानो महान्तः एनामुषसं सचन्ते 'षच समवाये' यत एतया उषसा संबध्यन्ते तदाश्रितत्वात्तत्प्रकाश्यत्वाच्च । उषःशब्दोऽत्र ह्यचकासन्तत्वेन नपुंसकलिङ्गः प्रतिभाति । छन्दसि तु लिङ्गव्यत्ययः । यद्वा लिङ्गमशिष्यं लोकप्रमाणत्वात् । तथाच लोकेऽपि उषःशब्दात् स्त्रीत्वप्रतीतिः ॥ १ ॥

छन्दस्वती उषसौ पेपिशाने समानं योनिमनुसंचरेते ।
सूर्यपत्नी विचरतः प्रजानती केतुमती अजरे भूरिरेतसा ॥

द्वादशाहिषु बह्वीनामुषसामन्तर्गतत्वे द्विरूपेण स्तुतिः । छन्दस्वती छन्दस्वत्यौ उषसौ, प्रातरनुवाके गायत्र्यादिच्छन्दसां संभवाच्छन्दोयुक्तत्वमुषसोः । पेपिशाने, पेश इति रूपनाम, तेन पेशतिः शोभातिशयक्रियः, अतिशयेन शोभमाने । समानं तुल्यां योनिं स्थानं रात्र्यन्तरूपं अनुसंचरेते लक्षणीकृत्य चेष्टेते । ब्रह्म वा योनिः । सूर्यपत्नी सूर्यपत्न्यौ सूर्यः पालयिता जनको ययोः, हे सूर्यपत्न्यौ । विचरतः प्रजानती परिज्ञानवत्यौ । केतुमत्यौ प्रकाश-

चिह्नयुक्ते । अजरे अविनाशिन्यौ । भूरिरेतसौ रेतो जगत्प्रजननमवश्यायादि, तदनयोर्भूरि बहु विद्यते । द्विवचनस्य 'सुपां सुलुक्' ( पा० सू० ७।१।३९ ) इत्याकारादेशः । एवमन्यत्र क्वचिल्लुक्, क्वचित्पूर्वसवर्णदीर्घादेशोऽनुमन्तव्यः ॥ २ ॥

ऋतस्य पन्थामनु तिस्र आगुस्त्रयो घर्मासो अनु रेतसागुः ।
प्रजामेका रक्षत्यूर्जमेका क्षत्रमेका रक्षति देवयूनाम् ॥ ३ ॥

तिस्र उषसो वाक्रयात्मना स्तूयन्ते ऋत्विग्भिः । वैखरी मध्यमा पश्यन्तीति तिस्रो वाचः सूक्ष्माया मूलप्रकृतित्वेनात्राविवक्षणात् । ऋतस्य यज्ञस्य सत्यस्य च ब्रह्मस्वरूपस्य च प्राप्तौ पन्थान उपायास्तिस्रो वाचः अन्वागुः अन्वागताः विवर्तं परिणामं वा प्राप्ताः । त्रयो घर्मासो अनु रेतसागुः, तास्तिस्रो वाचः त्रयो घर्मासः घर्म एव घर्मासः 'आज्जसेरसुक्' (७।१।५०) रेतसा ब्रह्मबीजेनान्वागताः । घर्मशब्दः सारवचनः, वाक्रयस्य तु सारत्वं जगत्त्रयस्य तदन्वयात् तद्व्यतिरेकेणाप्रतिभासात् । तत्रैका वैखरी वाक् प्रजां रक्षति प्रजायमानं सर्वं पा-

लयति संपादयति उच्चार्यमाणेन मन्त्रेण सर्वस्य यज्ञस्य साङ्गस्य संपादनात् । एका अन्या मध्यमा वाक् ऊर्जमन्नं रक्षति संकल्पयति देवतोद्देशेन द्रव्यसंकल्पत्वाद्भागस्य । एका अन्या पुनः क्षत्रं बलं रक्षति पश्यन्त्यात्मिका वाक् द्रव्ये यज्ञोपयोगिनि क्रियमाणे कोशशून्यत्वं भवतीत्यादिलोभमूलासात्त्विकसंकल्पाकलुषितेति । सात्त्विके निर्विभागे कर्मकर्तव्यतासंकल्पे सति यज्ञस्य फलजननशक्तिः, यजमानस्य च फलं भोगफलं रक्षितं भवति। असात्त्विकसंकल्पो हि निष्फलः । केषां प्रजादिकां रक्षति । देवयूनां दीव्यन्ति द्योतन्ते कर्मसु कौशलेनेति देवा यजमाना ऋत्विजश्च, त एव युवानः समर्थाः कर्मसु, तेषाम् । इत्थं तावद्यज्ञोपायत्वमुषोविवर्तरूपवाक्त्रयस्य, सूक्ष्मवागात्मकब्रह्मप्राप्त्युपायत्वमपीत्थम्—देवयूनां यजमानादीनां प्रजां नित्यनैमित्तिकादिमोक्षोपायभूतकर्मरूपामेका वैखरी अत्र विद्यात्मिका रक्षति अनुष्ठापयति। अन्या मध्यमा ऊर्जं बलं पालयति, संकल्पविशेषनिगडनिबन्धो हि

अन्तरात्मा विषयपवनैरपह्रियते । अन्या पश्यन्ती क्षत्रं सर्वशक्त्यात्मकं वाग्रूपं ब्रह्म रक्षति तद्द्वारेण तत्प्राप्तेः । यद्वा त्रयो घर्मास्त्रीणि सवनानि तदधिष्ठातृदेवताविशेषाश्च, तैर्हि यज्ञः समाप्यते । सवनदेवतास्तु इरा सरस्वती भारती, इरा पृथिवी सरस्वती, अन्तरिक्षं भारती द्यौः । तत्र पृथिवी प्रजां पुत्रादिकां रक्षति, अन्तरिक्षमूर्जमन्नं रक्षति वृष्टिदानद्वारेण, द्यौस्तु क्षतस्य दुःखस्य त्राणं रक्षति निरतिशयप्रीत्यात्मकत्वात् स्वर्गस्य । ताश्चैतास्तिस्र उषसो विद्याभागात्मना प्रकाशमानत्वात् । अग्निरादित्य इन्द्र इति वा सवनदेवताः ॥ ३ ॥

चतुष्टोममदधाद्या तुरीया यज्ञस्य पक्षा ऋषयो भवन्ती ।
गायत्री त्रिष्टुब्जगती विराडर्कं युञ्जाना स्वराभरन्निदम् ॥

चतुर्थी उषा विराड्रूपेण स्तूयते । हे ऋषयो ज्ञानयुक्ताः तुरीया चतुर्थी या उषा, सा यज्ञस्याग्निष्टोमस्य चतुष्टोममग्निष्टोममितरसंस्थाप्यप्रकृतिभूतं नित्यं अदधात् आदधौ चकार । किं कुर्वती । यज्ञस्याग्निष्टोमस्य पक्षौ भवन्ती पक्षाविव संपद्यमाना । तथा अर्कं यु-

ञाना, अर्चनमर्कः पूजा स्तुतिस्तां युञ्जाना संबन्धयन्ती कुर्वती । स्वराभरन्निदं, स्वरिति लोकत्रयोपलक्षणार्थं, लोकत्रयमिदमारब्धवती। प्रकृतिकर्मफलत्वाद्वा स्वर्गस्यैव काम्यत्वमुक्तम्, नित्यस्यापि हि अग्निष्टोमस्याग्निहोत्रादेरिव कामसंबन्धोऽप्यस्ति । का असावित्यपेक्षायामाह विराडिति। कथं तुरीयत्वं विराज इत्यपेक्षायामुच्यते गायत्री त्रिष्टुब्जगती विराडिति। गायत्र्यादीनि अन्यानि त्रीणि छन्दांस्यग्निष्टोमे विद्यन्ते, तेनेयं तुरीयेत्यर्थः । पक्षद्वयभवनकर्तृत्वं तु विराज इत्थमुक्तम्। अग्निष्टोमे एकविंशतिः स्तोत्रीणां, तत्र मध्ये स्थितो माहेन्द्रग्रहयजियज्ञस्यात्मत्वेन कल्पते। तदपेक्षया ह्युच्यते एकविंशोऽग्निष्टोमः, अग्निष्टोमस्तोमः एकविंशतिस्तोत्रीय इत्यर्थः । अग्निष्टोमं संस्थाप्याग्निष्टोमः सोमयागः, तत्रापि माहेन्द्रग्रहयजिप्रधानारोप इत्युक्तम् । एकविंशतिस्तोत्रीयास्वेकान्नविंशतिर्विराजः सन्ति । तत्रोभयदिग्भागवर्तिनौ नवकावपेक्ष्य मध्यस्था विराट् पक्षिणी कल्पिता। नवकौ तु पक्षा-

विव । अथ कथमग्निष्टोमश्चतुष्टोमः । इत्थम्— चत्वारः स्तोमा यस्य सः चतुष्टोमः । ते पुनस्त्रिवृत्पञ्चदशसप्तदशैकविंशाः । एवं ह्याम्नायते—त्रिवृद्बहिष्पवमानः, पञ्चदशान्याज्यानि, पञ्चदशो माध्यन्दिनः पवमानः, सप्तदशान्याज्यानि, सप्तदश आर्भवः पवमानः, एकविंशोऽग्निष्टोम इति ॥ ४ ॥

पञ्चभिर्धाता विदधा इदं यत्तासां स्वसृरजनत्पञ्च पञ्च ।
तासामु यन्ति प्रयवेण पञ्च नाना रूपाणि क्रतवो वसानाः ॥

इदं जगत्त्रयं धाता प्रजापतिः पञ्चभिः पृथिव्यादिभिर्विदधाः व्यधात् कृतवान्, तथा तासां पृथिव्यादिमात्राणां स्वसृर्भगिनीः पञ्च पञ्च अजनयत् । कास्ताः पञ्च पञ्च । अर्थाद्वाय्विन्द्रियमात्राः, प्राणापानादीन्वायून् घ्राणादीनीन्द्रियाणि पञ्च । सांख्यदर्शनानुसारेण तु प्रजापतिर्मूलप्रकृत्यात्मा तदधिष्ठाता वा परमेश्वरः सेश्वरसांख्यानां पञ्चभिस्तन्मात्रमात्राभिः पञ्च महाभूतमात्राः विदधे स्वसृश्च तासां पञ्च बुद्धिकर्मेन्द्रियवायुपञ्चकत्रयात्मिका मात्राः । तासामु यन्ति प्रयवेण पञ्च ना-

नारूपाणि ऋतवो वसानाः, उ इति निपातः 'यु मिश्रणे' इत्यस्य प्रयवः, ऋतवः क्रान्तदर्शना विद्वांसः तासामिन्द्रियमात्राणां प्रयवेण मिश्रीभावेन संबन्धिनः पण्डिता अपि वसाना विवेकमाच्छादयन्तो विषयलोभेन नानारूपाणि पञ्च रूपादीनि विषयजातानि यन्ति प्राप्नुवन्ति भुञ्जते, ततश्च संसारसागरे निमज्जन्ति । तस्माद्विषमविषयपरिहारे प्रयत्नो विधेयो विद्वद्भिरिति तात्पर्यम् । पञ्चभिः पञ्चभिरभिजुहुयादित्युक्तम् । तत्र प्रथमाष्टकोपयोगी प्रथमपञ्चको व्याख्यातः ॥ ५ ॥

अथ द्वितीयाष्टकोपयोगी द्वितीयो व्याख्यायते

पञ्च व्युष्टीरनु पञ्च दोहा गां पञ्चनाम्नीमृतवोऽनु पञ्च ।
पञ्च दिशः पञ्चदशेन क्लृप्ताः समानमूर्ध्नीरभि लोकमेकम् ॥

पञ्च व्युष्टीरुषा निर्मितवती 'उष दाहे' विशेषेण दाहिका उष्टयो रूपादिविषयमात्राः । अनु पञ्च दोहाः, अनन्तरं पञ्च दोहा तया निर्मिताः । ते पुनः श्रुत्या प्रतिपादिताः—ते एते देवा अदुहुर्हारीतेन पात्रेणामृतं, राजतेन

पितरोऽदुहुः स्वधां, दारुपात्रेण आहूय तं मनुष्या अदुहुरन्नमयस्मयेनासुरा अदुहुर्यवान्, अलाबुपात्रेण सर्पा अदुहुर्विषमिति। गां पञ्च-नाम्नीं, प्रकाम्या—अघ्न्या-इडा-संहिता-विश्वरू-पेति गोः पञ्च नामानि। ऋतवोऽनु पञ्च, अनन्तरं पञ्चर्तवः निर्मिता ब्रह्मादिकन्ययो-षसा, हेमन्तशिशिरयोरेकत्वापादनात्पञ्चत्वम्। पञ्च दिशः पञ्चदशेन क्लृप्ताः, पञ्च दिशः पञ्चद-शेन स्तोमेन सह क्लृप्ताः निर्मिताः। ऊर्ध्वा पञ्च-म्यत्र। कीदृशः दिशः। समानमूर्ध्नीः तुल्यमूर्ध्यः प्राची यामी प्रतीची उदक् दिशः, अधऊर्ध्वा ए-कवचना एका दिक्, अन्तरिक्षं स्वर्गो वा पञ्चानां मूर्धा। अभि लोकमेकम्, एकं लोकमुपाधिं लक्षणीकृत्य पञ्चत्वेन विभक्ता दिश इत्यर्थः॥१॥

ज्योतिष्मती प्रतिमुञ्चते नभ उषा देवी सूर्यस्य व्रतेन।
विपश्यन्ति पशवो जायमाना नानारूपा मातुरस्या उपस्थे २

ज्योतिष्मती प्रकाशवती उषा देवी नभ आकाशं प्रतिमुञ्चते तमसा वियोजयति। केन। सूर्यस्य व्रतेन कर्मणा। तां च तादृशी-मुषसं नानारूपा जायमाना अपि सद्योजाता

अपि पशवोऽपि विशेषेण पश्यन्ति अस्या अन्तरिक्षलक्षणाया मातुर्निर्मातुरुपस्थे उत्सङ्गे स्थिताम् ॥ २ ॥

त्रिंशत्स्वसार उपयन्ति निष्कृतं समानं केतुं प्रतिमुञ्चमानाः ।
ऋतूंस्तन्वन्ते कवयः प्रजानतीर्मध्ये छन्दसः परियन्ति भास्वतीः ॥ ३ ॥

त्रिंशत्स्वसारो भगिन्यः समानकारणप्रभवत्वादुषस उपयन्ति आवर्तन्ते प्रतिमासं, निष्कृतं निःसंशयं कृतं स्वयं प्रजापतिना वा समानं तुल्यं केतुं गगनं जीवात्मानं वा प्रतिमुञ्चमानाः उषसो विमोचयन्त्यः, ऋतून् पञ्च षड्वा तन्वन्ते विस्तारयन्ति । कवयः आक्रमणक्रियायाः कर्त्र्यः । प्रजानतीः प्रज्ञानवत्यः । मध्ये छन्दसः परियन्ति, छन्दःशब्देन गतिक्रियायोगाल्लोकत्रयमुच्यते वेदो वा गायत्र्यादिच्छन्दोयुक्तत्वात्, लोकत्रयस्य वेदस्य वा मध्ये परियन्ति प्रत्यावर्तन्ते पूर्वापरदिवसानि एष्यमाणदिवसमध्ये प्रत्यावर्तन्त इत्यर्थः । भास्वतीः दीप्तिमत्यः ॥ ३ ॥

शुक्रर्षभा नभसा ज्योतिषागाद्विश्वरूपा शबल्यग्निकेतुः ।
समानमर्थं स्वपस्यमाना बिभ्रती जरामजर उष आगाः ॥ ४ ॥

शुक्रा शुक्ला चासावृषभा कामानां सेक्त्री, नभसा ज्योतिषागात्, नभसा नभःस्थेनादित्येन ज्योतिषा सह आ अगात् आगता। विश्वरूपा चन्द्रतारादिनानारूपा। शवली रात्रितमसा दिवसभासा च छुरितत्वाच्छवला। अग्निकेतुः अग्निवत्प्रकाशमाना तमसो वा केतुर्विनाशिका अग्निवत्। समानमर्थं स्वपस्यमाना, एकं प्रयोजनं सुष्ठु अपस्यमाना जनयन्ती। समानोऽतः संवत्सरः। अपस्यमानेति अपपूर्वस्यास्तेः रूपमस्यतेर्वा, तत्र समानमर्थं तमोलक्षणमपास्यन्तीत्यर्थः। बिभ्रती जरां, मनुष्यादीनां जनानां पोषयन्ती कालावृत्तिमुखेन। अजर उष आगाः, हे उष अजरे जरारहिते त्वमागाः आगता॥ ४॥

ऋतूनां पत्नी प्रथमेयमागादह्नां नेत्री जनित्री प्रजानाम्।
एका सती बहुधोषो व्युच्छाजीर्णा त्वं जरय सर्वमन्यत्॥ ५॥

ऋतूनां पत्नी पालयित्री सती इयमुषा प्रथमं पूर्वमागात् आगता। अह्नां दिनानां नेत्री अग्रगामिनी सेनापतिप्राया। प्रजानां प्रजायमानानां त्रयाणां लोकानां जनित्री विद्यात्म-

कत्वेन ब्रह्मस्वभावत्वात्। यत एवैका सती बहुधा विवृत्ता परिणता वा, तत उच्यते हे उषः व्युच्छ अविद्यातमःपटलमपसारय। यतस्त्वमजीर्णा स्वयं जरारहिता, अतः सर्वमन्यदविद्यानिर्मितभेदजालं जरय नाशय ब्रह्मभूयमस्मान् गमयेति यावत् ॥५॥ द्वितीयः पञ्चकः ॥

ऋतस्य धाम प्रथमा व्यूषुष्यपामेका महिमानं बिभर्ति ।
सूर्यस्यैका चरति निष्कृतानि घर्मस्यैका सवितैकां नियच्छते ॥

एकैवोषाः पञ्चधा विभज्यते अवान्तरभेदेन। या प्रथमा व्यूषुषी विशिष्टोषाः, सा ऋतस्य यज्ञस्य सत्यस्य वा धाम आस्पदं ब्राह्मः सारस्वतो हि सकलसत्यसंकल्पो यज्ञाद्यारम्भयोगः। एका द्वितीया पुनरपामवश्यायजलानां महिमानं माहात्म्यं बिभर्ति। एका तृतीया पुनः सूर्यस्य निष्कृतानि चरति दिनकार्याणि संपादयति पुरुषपक्षिप्रभृतिचेष्टारूपाणि। सवितैकां नियच्छते, पञ्चमीं सविता ग्रसतीत्यर्थः, उत्कटतेजस्कसवितृरूपेण निवर्तत इति यावत् ॥१॥

एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम् ।
तेन दस्यून्व्यसहन्त देवा हन्तासुराणामभवच्छचीभिः ॥ २ ॥

एकाष्टका तपसा संयमानुष्ठानादिना, तप्यमाना प्रजापतिनानुष्ठीयमाना सती, गर्भं जजान जनितवती । कम् । इन्द्रम् । महिमानं महान्तम् । तेन चेन्द्रेण देवा दस्यून् वृत्रादीन् व्यसहन्त अभिबभूवुः न्यक्कृतवन्तः । महेन्द्रो हन्ता असुराणामभवत् शचीभिरभिचारादिक्रियाभिः । अथवा आदित्यस्तान् जघान । असुरा अत्र मेघाः । देवा रश्मयः । शच्योऽभिघातक्रियाः ॥ २ ॥

अनानुजामनुजां मामकर्त सत्यं वदन्त्यनुयच्छ एतत् ।
भूयासमस्य सुमतौ यथा यूयमन्या नो अन्यामति मा प्रयुक्त ॥

इयमुषाः अनानुजामकनिष्ठं सन्तं परमात्मरूपतया अनुजमविद्याविभक्तेन रूपेण मामकर्त कृतवती । कालपरिवृत्तिवशेन हि ज्येष्ठकनिष्ठता भवति, कालात्मिका चोषाः । अनुयच्छे अभ्यर्थये एतत् सत्यं वदन्ती वादयन्तीमुषसम् । सत्यसंकल्पत्वात् सत्यं वदन्तीत्युच्यते । किं तदर्थये । भूयासमस्य सुमतौ, अस्य परमात्मनः शोभनायां मतौ नित्ये ज्ञाने आनन्दात्मनि भूयासं स्यां ब्रह्मत्वं प्राप्नुयामि-

त्यर्थः । यथा यूयमुषसः परमप्रभास्थिताः, तथा स्याम् । अन्या नो अन्यामति मा प्रयुक्त, अन्या एका उषाः नोऽस्माकं अन्यामुषसं मा अतिप्रयुक्त पूर्वा पूर्वा उषा अपरामपरामुषसमक्रमस्य कारयित्रीमस्माकं मा कार्षीदित्यर्थः, उत्तरोत्तरा उषसोऽस्माकमविद्याविनाशकारिण्यः सन्त्विति यावत् ॥ ३ ॥

अभून्नु नः सुमतौ विश्ववेदा आष्टा प्रतिष्ठामाविदे न गावम् ।
भूयासमस्य सुमतौ यथा यूयमन्या नो अन्यामति मा प्रयुक्त ॥

हे आष्टाः व्यापिकाः उषसो विश्ववेदाः सर्वधनः सर्वस्य च वेत्ता प्रजापतिः नोऽस्माकं सुमतावभूत् भवतु शोभनां मतिं करोत्वित्यर्थः । प्रतिष्ठामाविदे न गावं, अहं परब्रह्मणि प्रतिष्ठामाविदे लभेय । नशब्द उपमार्थीयः । गामिव, गौरिव । यथा पङ्के महति मग्ना गौस्तत्रैव प्रतिष्ठां लभते, तद्वत् । अथवा गौर्वाक् सर्वार्थेषु प्रतिष्ठा तां विनार्थानवगमात् । यथोक्तं

'न सोऽस्ति प्रत्ययो लोके……………….।'

इति ॥ ४ ॥

प्रथमा ह व्युवास सा धेनुरभवद्यमे ।
सा नः पयस्वती दुहामुत्तरामुत्तरां समाम् ॥ ५ ॥

प्रथमा आद्या सर्गादिभिर्वा उषा व्युवास व्युष्टा । प्राचीना सा धेनुरभवत् भूता यमे संयते प्रजापतौ। एतद्धेनुसम्बन्धादेव पञ्चनाम्नी गौः पूर्वमन्त्रास्थिता । सा धेनुरूपेण विवृत्ता परिणता वा सती उत्तरामुत्तरां समां तुल्यां धेनुं दुहां दोग्धु पूरयतु, यज्ञोपयोगिनीं धेनु-परम्परामस्माकं संपादयत्वित्यर्थः ॥ ५ ॥ तृतीयः पञ्चकः ॥

देवा ग्रावाणो घोषमकृत हविष्कृण्वन्तः परिवत्सरीयम् ।
एकाष्टके सुप्रजसः सुवीरा ज्योग्जीवेम बलिहृतो वयं ते ॥

हे देवाः कर्मणि द्योतमानाः ग्रावप्रभृतयः दृषदुपलोलूखलमुसलाः यूयं घोषमकृत शब्दं कृतवन्तः । किं कुर्वन्तः । परिवत्सरीयं हवि-ष्कृण्वन्तः, परिवत्सरः संवत्सरः तत्र भवं परिवत्सरीयं सोमरसतण्डुलपिष्टादिकम् । हे एकाष्टके वयं ज्योक् चिरकालं जीवेम त्वत्प्र-सादात् । कीदृशाः । ते तुभ्यं बलिहृतो हविषो दातारः, सुप्रजसः शोभनप्रजायुक्ताः, सुवीराः सुपुत्राः । पुनर्वचनमतिशयार्थम् ॥

इत्येकषष्टितमी काण्डिका ॥ ६१ ॥

अथ

## द्विषष्टितमी काण्डिका ।

गवा चेदष्टका स्यात्पशुना वा तदुक्तम् ॥ १ ॥

चेच्छब्दो यद्यर्थे । निश्चितेऽपि च चेच्छब्दो दृष्टो वेदाश्चेत्प्रमाणमिति । स्थालीपाकेन गवा वा च्छागेन वा अष्टका भवति । यदा गवा, तदा स्थालीपाकस्थानेऽपि गौस्त्यक्तव्या पित्रुद्देशेन ब्राह्मणाय दातव्येत्यर्थः । यदा तु च्छागेन, तदा अतिदेशमाह तदुक्तमिति । आदावेव पशुकल्प इत्युक्तम् । तदेव तन्त्रमिह ज्ञेयमित्यर्थः । एतावांस्त्विह विशेषः—पितृभ्यस्त्वा जुष्टमवकृन्तामीति वपाकर्तनं कर्तव्यमिति ॥१॥

वह वपामिति वपां जुहुयात् ॥ २ ॥

'वह वपां जातवेदः' इत्यादिना वपां जुहुयात् प्राचीनावीती दक्षिणाभिमुखः ॥ २ ॥

पेशीरवदानस्थानेऽङ्गारिणीः कुर्यात् ३

दीर्घमांसलताः पेश्यः । ता अवदानस्थानेभ्य

उद्धृत्य अङ्गारिणीः कुर्यात् अङ्गारेषु पचेत्, न स्थाल्यामित्यर्थः ॥ ३ ॥

**यथाकामं मज्जुका ॥ ४ ॥**

मज्जुका वपानिर्मितो यूषः, यथाकामं यथा संपद्यते तथा कार्येत्यर्थः । सा च स्थाल्यामेव पक्तुं शक्यते, न शूले । यदि तु केनापि प्रयोगेण शूले पक्तुं शक्येत विगलनधर्मात्मिका सती, तदा न वार्यत इत्युक्तं भवति ॥ ४ ॥

**ये समाना इति द्वाभ्यां स्थालीपाकस्य पेशीनां जुहोति ॥ ५ ॥**

ये समाना इति द्वाभ्यां स्थालीपाकेन पेशीभिश्च यथासंख्यं जुहुयात् । 'ये समानाः समनसः पितरः' इति स्थालीपाकस्य, 'ये समानाः समनसो जीवाः' इति पेशीनाम् ॥५॥

**स्विष्टकृद्धर्मेण वहान्नं वह मांसं जातवेदः पितृभ्य इति जुहुयात् ॥ ६ ॥**

स्विष्टकृद्धर्मेण कर्तव्यः स्वकाले कर्तव्यः । मन्त्रेण विशेषमाह—'वहान्नं जातवेदः' इति

स्थालीपाकस्विष्टकृदिति मन्त्ररूपान्यथाकृत्या 'वह मांसं जातवेदः' इति त्र्यङ्गिस्विष्टकृदिति । ऋतुतिथ्यादिकं पूर्ववत् ॥

वह वपां जातवेदः पितृभ्यो यत्रैतान्वेत्थ निहितान्पराके । मेदसः कुल्या उप तान्स्रवन्तु सत्या एषामाशिषः सन्तु कामैः ॥

हे जातवेदः प्राप्तधन जातविज्ञान वा पितृभ्यो वपां वह प्रापय यत्र पराके परलोके कर्मभिर्निहितान् स्थितानेतान् पितॄन् वेत्थ जानासि । तांश्च त्वया प्रापिता मेदसः कुल्या उपस्रवन्तु पितृसमीपे वहन्तु । ताश्चाशिषः प्रकृताः कामैरभिलाषैर्विषयीकृताःसत्याः सन्तु ॥

ये समानाः समनसः पितरो यमराज्ये ।
तेषां लोकः स्वधानमो यज्ञो देवेषु कल्पताम् ॥

ये समानास्तुल्याकृतयः समनसश्च तुल्यचित्ताः पितरो यमराज्ये पितृलोके तिष्ठन्ति, तेषां स्वधानमोऽस्तु । यज्ञश्चायं तेषामस्तु । तथा तेषां पितॄणां लोको देवेषु मध्ये कल्पतामवकल्पताम् ॥

ये समानाः समनसो जीवा जीवेषु मामकाः ।
तेषां श्रीर्मयि कल्पतामस्मिल्लोके शतं समाः ॥

ये मामकाः पितरो जीवा जीवन्तो जीवत्स्वेव मध्येऽवस्थिताः समानाकृतयः समानचित्ताश्चास्मिंल्लोके मनुष्यत्वं प्राप्ताः, तेषां श्रीः मयि कल्पतां शतं समाः शतं वर्षाणि अनेन कर्मणा। वहान्नं वह मांसमिति गतार्थम् ॥ इत्यष्टकामन्त्राः ॥ ६ ॥

इति द्विषष्टितमी काण्डिका ॥ ६२ ॥

---

अथ

## त्रिषष्टितमी काण्डिका।

अष्टकायज्ञादूर्ध्वं श्राद्धमाह

हविरर्हानुपवेश्य ॥ १ ॥

पितॄनावाहयिष्यामीत्युक्त्वा ॥ २ ॥

अपयन्त्वसुरा इति द्वाभ्यां तिलैः सर्वतोऽवकीर्य ॥ ३ ॥

एत पितर आगच्छत पितर आ मे यन्त्वन्तर्दधे पर्वतैरिति जपित्वा ॥ ४ ॥

यास्तिष्ठन्त्यमृता वाग्यन्मे मातेत्ययुग्भ्यः पाद्यमानीय ॥ ५ ॥

उदकानि चानयेदेताभिरेव ॥ ६ ॥

हविः स्वधां श्राद्धभोजनमर्हन्ति, ये ते हविरर्हाः स्मृत्युक्ता वेदविदादयः[1] पतितादिवर्जाः प्रकृतकर्मयोग्याः । तानुपवेश्य, वैश्वदेवे द्वौ प्राङ्मुखौ पित्र्ये त्रीनुदङ्मुखानास्तीर्य दर्भासनेषु, ततः पितॄनावाहयिष्यामीति ब्राह्मणेभ्योऽनुज्ञामर्थयते । पितृयज्ञग्रहणं प्राधान्यात् । तेनादौ विश्वेदेवावाहना कार्या । ततश्च आवाहय इति पङ्क्तिपावनैरनुज्ञातः पूर्वं वैश्वदेवविषये अपयन्त्वसुरा इति द्वाभ्यां

'यवैस्तिलार्थं कुर्वीत वैश्वदेवे न संशयः ।'

इति परिशिष्टानुसारेण सर्वतो यवविकरणेनासुरावकाशापासनां कृत्वा 'ओमासश्चर्षणीधृतः' इति विश्वेदेवानावाहयेत् । आवाहनमाह्वानम् । अनन्तरं पित्र्ये 'अपयन्त्वसुराः' इत्याभ्यामेव तिलानां सर्वदिक्केन विकरणेनासुराव-

---

१ वेदादिविदः क पाठः ।

काशमपास्य पितॄनावाहयेत् 'एत पितरः' इत्यादिभिश्चतुर्भिः। एतन्मन्त्रजप एव ह्यावाहनम्। ततो 'यास्तिष्ठन्ति' इति पञ्चभिः पाद्यं पादार्हमुदकं ब्राह्मणसंख्यया प्रतिपात्रमानयेत्। केभ्यः। अयुग्भ्यो ब्राह्मणेभ्यः, अयुग्मरूपेण ये त्रयः स्थिताः पित्र्ये तदर्थमित्यर्थः। प्रदर्शनार्थं चैतत्। तेन युग्भ्यामपि वैश्वदेवाभ्यां अर्घ्यपाद्यानयनं, पञ्चकापक्षे वा अयुग्भ्य इति विज्ञेयम्। आनीय च ब्राह्मणपात्रेषु सिञ्चेत् 'दक्षिणं पादम्' इति द्वाभ्याम्। तत एताभिरेव पञ्चभिर्ऋग्भिरुदकान्यानयेत्। उदकानीति बहुवचनलिङ्गात् पात्रभेदेनोदकमानयेदिह, तत्साहचर्यात्पाद्येऽप्येवम्। उदकानि त्वर्घार्हाः पुष्पतिलसुगन्धद्रव्यान्विता आपोऽत्र ॥ १—६ ॥

आदित्या रुद्रा वसव इत्येनान्समीक्ष्य ७

अग्नौ करवाणीत्युक्त्वा ॥ ८ ॥

अग्निं परिस्तीर्य सोमाय पितृमते स्वधानमोऽग्नये कव्यवाहनाय स्वधानम इत्यग्नौ हुत्वा ॥ ९ ॥

**ये मामकाः पितर एतद्वः पितरोऽयं यज्ञ इति तिसृभिः कल्पितान्नमभिमृशति ॥ १० ॥**

अर्घ्यदानानन्तरमादित्या रुद्रा वसव इत्यादिना ब्राह्मणान् समं कृत्वा वीक्षते, ततोऽग्नौ करवाणीति ब्राह्मणान् पृष्ट्वा कुर्वित्यनुज्ञातो दक्षिणाग्रैर्दर्भैः परिस्तीर्य दक्षिणाभिमुखः प्राचीनावीती सोमाय पितृमते स्वधानमोऽग्नये कव्यवाहनाय स्वधानम इति प्रधानान्तेनाग्नावाहुतिद्वयं जुहुयात्। पुनरग्निग्रहणं पिण्डपितृयज्ञवद्भूमौ प्रक्षेपो मा विज्ञायि । तदनन्तरमेतद्व इत्यादिभिस्तिसृभिः कल्पितं पात्र एकोद्धृतमन्नैकदेशमभिमृशेत्। ततः स्तोकस्तोकं पात्रेषु दद्यात् । अन्ये तु पात्रेषु दत्तमिति मन्त्रलिङ्गात्पात्रेषु परिशिष्टस्याभिमर्शनमाहुः । यदि पात्रशब्देन भोजनाधारा उच्यन्ते, अथापि ब्राह्मणा उभयथा अतीतपरिवेशनक्रिया प्रतीयते । पूर्वव्याख्यानेऽपि पात्रे देयं हविरिति लिङ्गमाहुः ॥ ७–१० ॥

एषा व ऊर्गामासु पक्कमिति च क्षीरं घृतं वासिच्य ॥ ११ ॥

एषा व ऊर्गिति आमासु पक्कमिति क्षीरं घृतं वा वैकल्पिकं विसृष्टेऽन्ने आसिञ्चेत् । अन्ये तु वाशब्दं समुच्चयार्थं वर्णयन्ति । तेन एषा व ऊर्गिति क्षीरमासिञ्चेत्, आमासु पक्कमिति घृतं मन्त्रलिङ्गात् । वैकल्पिकस्तु पक्षो रूढतरः । पक्कशब्दः क्षीरेऽपि हि युज्यते, तेन मन्त्रलिङ्गमविशिष्टम् ॥ ११ ॥

अमुष्मै स्वधानमोऽमुष्मै स्वधानम इति यथालिङ्गमनुमन्त्र्य भोजयेत् ॥१२॥

अमुष्मायिति सामान्यनिर्देशेन विशेषो लक्ष्यते । तेन पितृपितामहप्रपितामहनामानि चतुर्थ्यन्तानि प्रतीयन्ते सगोत्रप्रवराणि कठाय कश्यपगोत्राय पञ्चप्रवराय देवदत्ताय स्वधानम इत्यादीनि । भोजयेदिति भुञ्जानान्प्रयुञ्जीत १२

प्राश्नन्तु भवन्त इत्युक्त्वा यन्मे प्रकामादिति भुञ्जानान्समीक्ष्याहोरात्रैर्यद्वा क्रव्यात्स्वधां वहध्वमिति चैताभिः ॥१३

यन्मे प्रकामादित्यनेन यद्वः क्रव्यादित्यादिभिस्त्रिभिर्भुञ्जानान्समीक्षेत समं कृत्वा । ऋगपेक्षया त्वेताभिरिति निर्देशः ॥ १३ ॥

पृथिवी दर्विरिति निपरणं कुर्यात् १४

पृथिवी दर्विरित्यादिभिस्त्रिभिस्त्रीन् पिण्डान् पितृपितामहप्रपितामहानां दक्षिणाग्रदर्भेषु कल्पयेत् पूजयेच्च यथाचारम् ॥ १४ ॥

येऽत्र पितरः प्रेता इति वासांसि निदध्यात् ॥ १५ ॥

येऽत्र पितर इत्यादिना पिण्डानामुपरि वासांसि आच्छादनानि निदध्यात् । तानि तु कार्पासतन्तुरूपाणि रूढानि ॥ १५ ॥

ऊर्जं वहन्तीरित्यपः परिषिच्य ॥१६॥

ऊर्जं वहन्तीरित्यादिना पिण्डेषु परिषिञ्चेत्। ता अपि मन्त्रलिङ्गादन्नस्यन्दिनीः कुर्यात् ॥१६॥

मा मे क्षेष्ठेति सतृणमन्नमभ्युक्षेत्॥१७॥

मा मे क्षेष्ठेति मन्त्रेण । सर्वाभ्युक्षणं तु अन्नमन्नमिति मन्त्रगताद्वीप्सानिर्देशाद्गम्यते ॥ १७ ॥

**विषदमन्नमानीय कच्चित्संपन्नं भोरि-त्युक्त्वा तृप्यन्तु भवन्त इत्युक्त्वा ॥१८**

विषदं निर्मलं मोदकप्रभृति सकलं लेश-मुद्धृतं पात्रे समाधाय कच्चित्संपन्नं भोरिति वदेत्। ततः सुसंपन्नमिति ब्राह्मणैरुक्ते शेषमन्न-मिति च प्रश्नस्योत्तरे इष्टेभ्य इति च भणिते, अग्निदग्धाश्च ये जीवा इत्यनेन दक्षिणाग्रा-स्तीर्णदर्भोपरि सर्वसिद्धे सजले अञ्जलिना दक्षिणाभिमुखेन प्राचीनावीतिना प्रक्षिप्ते सत्य-नन्तरं 'तृप्यन्तु भवन्तः पितरः' इत्यादिमन्त्र-षट्कं पठेत् पितृपितामहप्रपितामहमातृपितामहीप्रपितामहीतृप्तिलिङ्गकम्। अत एव मन्त्र-लिङ्गान्निपरणस्वधानमस्करणप्रभृतिषु मात्रा-दीनां नामोच्चारणसहितमन्त्रक्रियामाहुः। अत्र तृप्यन्तु भवन्तः पितर इति बहुवचनं पितृ-व्याद्यपेक्षम्। यथोक्तं

'भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान्भवेत्।
सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीत्॥' (९।१८२)

इति ॥ १८ ॥

**तृप्तानाचामयित्वा यन्मे रामः शकुनि-**

रिति प्रदक्षिणं कृत्वा प्रत्येत्याभिरमन्तु भवन्त इत्युक्त्वा देवाश्च पितरश्चेत्यनुवाकशेषेणोपतिष्ठते ॥ १९ ॥

आचमनमाचामः । तं कृत्वा आचामयित्वा प्रीतान् यन्मे राम इत्यादिना प्रदक्षिणं यथा भवति तथा प्रत्येत्य प्रत्यावृत्त्य अभिरमन्तु भवन्त इत्युक्त्वा अभिरताः स्म इति प्रत्युक्ते सति, देवाश्च पितरश्चेत्यादिना अनुवाकशेषेण ब्राह्मणानामुपस्थानं कुर्यात् दक्षिणां दत्त्वा यथाशक्ति ॥

अथ मन्त्रार्थविवृतिः

ओमासश्चर्षणीधृतो विश्वे देवास आगत ।
दाश्वांसो दाशुषः सुतम् ॥
विश्वे देवास आगत शृणुता म इमं हवम् ।
एदं बर्हिर्निषीदत ॥

वैश्वदेव्यावनुष्टुभौ । मधुच्छन्दस आर्षम् । हे विश्वे देवा आगत आगच्छत, हे ओमासः, अव रक्षणादिषु पठ्यते, अवन्ति रक्षन्ति तर्पयन्ति वा ये ते ओमासः, औणादिको मप्रत्ययः 'च्छ्वोः शूडनुनासिके च' (६।४।१९) इत्यूठ् 'आद्गुणः' ओमा एव ओमासः 'आज्जसेरसुक्' । चर्ष-

णयो मनुष्याः, तान् धारयन्ति चर्षणीधृतः । दाश्वांसो दाशुषः सुतं 'दाशृ दाने' इत्यस्य दाश्वानिति निपातः 'दाश्वान्साह्वान्मीढ्वांश्च' (६।१।१२) इति, दाशुषो दानशीलस्य यजमानस्य सुतं पुत्रं दाश्वांसः दानशीलाः ॥ यजमानसुतं ददति ये, ते संबोध्यन्ते । हे देवा आगच्छत इमं मे मम हवमाह्वानं शृणुत आकर्णयत, आकर्ण्याह्वानमागत्य च एदं बर्हिर्निषीदत इदं बर्हिरास्तीर्णं स्थितमतोऽत्र आ निषीदत उपविशत ॥

अपयन्त्वसुराः पितृरूपा ये रूपाणि प्रतिमुच्याचरन्ति ।
परापुरो निपुरो ये हरन्त्यग्निष्टांल्लोकात्प्रणुदत्वस्मात् ॥ १ ॥

अपेतो यन्त्वसुराः ये पितृषद उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः । असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥ २ ॥

तूखानामार्षम् । अनुवाकद्वयेऽपि पितरो देवताः । आद्या वर्धिनी, उदीरतामिति त्रिष्टुप् । असून् रान्तीत्यसुरा दैत्या यज्ञविध्वंसकाः । ते अपयन्तु अपगच्छन्तु अपसरन्तु, इतः स्थानात् पलायन्तामित्यनेन मन्त्रद्वयेन यवतिलविकरणेन बाध्यमानाः सन्तः । कीदृशाः । ये

रूपाणि स्वानि प्रतिमुच्य पितृरूपा भूत्वा मायया आचरन्ति चेष्टन्ते । परापुरो निपुरो ये हरन्ति, परान् पृणन्तीति परापुरः 'पृञ् तर्पणे कान्तौ च' इत्यस्य परापूर्वस्य क्विपि 'उदोष्ठ्यपूर्वस्य' (७।१।१०२) इत्युत्वरपरत्वे शसि परापुर इति रूपम् । एवं निपूर्वस्य निपुर इति । तत्र परापुर इति ब्राह्मणार्थं हविरुच्यते, निपुर इति तु पिण्डार्थम् । परापुरो निपुरश्च हविर्विशेषान् ये मायया हरन्ति, तान् असुरान् अस्माल्लोकादग्निः प्रणुदतु अपसारयतु, आस्तां तावद्यज्ञभूमिः, लोकादप्यस्माद्भूमिलोकाख्यादपसारयतु अग्निरसुरानित्यर्थः ॥ अपेतो यन्त्वसुरा ये पितृषदः, पितॄन् सीदन्त्युपसर्पन्ति पितृदत्तहविषोऽपहाराय ये ते पितृषद इतः स्थानादपयन्त्वसुराः । उदीरतामवर इति त्रिस्थानानां पितॄणां यज्ञभूमावागमनमनया आशास्यते । वसवो रुद्रा आदित्याश्च भूम्यादिस्थाना यथाक्रमं पितृपितामहप्रपितामहाः । तथाच श्रुतिः

'वसवः पितरो रुद्राः पितामहा आदित्याः प्रपितामहाः ।'

इति । अवरे अवरस्थानाः पितरो वसुरूपा उदीरतामागच्छन्तु । उत्परासः, उदित्युपसर्गः ईरतामित्यनेनानुवृत्तेन संबध्यते, परे एव परासः परस्थाननिवासिनः आदित्यरूपाः प्रपितामहाः उदीरतामागच्छन्तु । उन्मध्यमाः, मध्यमाश्चान्तरिक्षवासिनः पितामहा रुद्ररूपा उदीरताम् । कीदृशाः । सोम्यासः सोममर्हन्तीति सोम्याः, तैर्हि महेन्द्रः प्रातःसवनादिषु सोमं वहति, सोम्या एव सोम्यासः । असुं य ईयुः, य इहलोके प्राणांस्त्यक्त्वा परलोके असुं प्राणमीयुः प्राप्ताः पुनः कर्मवशेन प्राणिनः संपन्नाः । अवृकाः अकर्तना अनुपघातका इति यावत् । ऋतज्ञाः सत्यज्ञाः यज्ञज्ञा वा । ते नोऽवन्तु पितरो हवेषु, ते पितरस्त्रिस्थाना अपि हवेष्वाह्वानेषु सत्सु नः अस्मानागच्छन्तु रक्षन्तु वा ॥

एत पितरो मनोजवैरागच्छत पितरो मनोजवैः ।

ये निखाता येऽपरुप्ता गर्भाद्येऽवपेदिरे । सर्वास्तानग्न आवह पितॄन्हविषे अत्तवे ॥

आगच्छत पितरो मनोजवसः पितरः पितरः शुन्धध्वम् ।

आ मे यन्तु पितरो भागधेयं विराजाहूताः सलिलात्स-मुद्रात् । अस्मिन्यज्ञे सर्वकामांल्लभन्तामक्षीयमाणानुपजीव-न्त्वेनान् ॥

अन्तर्दधे पर्वतैरन्तर्मह्या पृथिव्या । दिवा दिग्भिरनन्ता-भिरन्तरन्यान्पितॄन्दधे ॥

अन्तर्दध ऋतुभिरहोरात्रैः ससन्धिकैः । अर्धमासैश्च मासै-श्चान्तरन्यान्पितॄन्दधे ॥

ये निखाता इत्यनुष्टुप् । विकरभागिनामाह्वानं क्रियते येभ्यः 'अग्निदग्धाश्च ये जीवाः' इति भूमौ विकरो दीयते । अन्तर्दध ऋतुभिरित्यनुष्टुप् परपित्रवकाशनिवारणी । हे पितरः एत आगच्छत । कैः । मनोजवैः मनस इव जवो वेगो येषां तैरेव विमानादिभिः । आगच्छतेत्यत्राप्यागम एवार्थः, त्वरातिशयार्थं तु पुनर्वचनम् । ये निखाताः, नतु दग्धाः, भूमौ खनिं कृत्वा निहिताः

'ऊनद्विवार्षिकं प्रेतं निखनेयुः सजातयः ।'(मनु०५।६८)

इति । येऽपरुप्ताः, जले क्षिप्ताः । ये च गर्भे एव सन्तोऽवपेदिरे अवपन्ना नष्टाः विस्रुताः, यदुद्देशेनोच्यते

'गर्भस्रावे गर्भसंमिता रात्रयः ।'

इति । तान् सर्वान् पितॄन् हे अग्ने आवह प्रापय । किमर्थम् । हविषे अत्तवे हविरत्तुं भक्षयितुम् । हविष इति व्यत्ययेन द्वितीयार्थे चतुर्थी । अत्तवे इति तुमर्थे तवेप्रत्ययः ॥

हे पितरो मनोजवसः मनोवेगयुक्ताः सन्त आगच्छत । हे पितरः शुन्धध्वमिदं हविः शुद्धं पवित्रं कुरुत । मे मम संबन्धि भागधेयं हविर्भागं पितर आयन्तु आगच्छन्तु विराजेति विराडग्निर्यजमानो वा, तेनाहूताः सर्वे समागच्छन्त्वित्यर्थः । आगत्य चास्मिन् पितृयज्ञे सर्वे आकारिताः सन्तः सर्वान् कामान् काम्यमानान् हविर्विशेषांल्लभन्तां प्राप्नुवन्तु । प्राप्य चैनान्कामान् अक्षीयमाणान् अन्यैरसुरादिभिरनुपभुक्तानुपजीवन्तु भक्षयन्तु । प्राप्तमपि हि कश्चिद्भोक्तुं न लभते, तदर्थं वा अभ्यर्थना ॥

अहमन्यान् पितॄन् परपितॄनन्तर्दधे अन्तर्हितान् व्यवहितान् करोमि । कैरन्तर्दधे । पर्वतैर्मेर्वादिभिः । कया च । पृथिव्या मह्या । तथा दिवा स्वर्गेण, दिग्भिः पूर्वादिभिरनन्ताभिर्व्यापिनीभिः अहमन्यान्पितॄनन्तर्दधे पि-

न्तराणि । तथा ऋतुभिर्वसन्तादिभिः अहोरात्रैर्दिवसैः ससन्धिकैः ससंध्यैरर्धमासैर्मासैश्चान्यान् पितॄनन्तर्दधे । वाक्यचतुष्टयेन मन्त्रचतुष्कमेतदाह्वाने ॥

यास्तिष्ठन्ति या धावन्ति या अद्रुग्धाः परिसस्रुषीः ।
अद्भिर्विश्वस्य धर्त्रीभिरन्तरन्यान्पितॄन्दधे ॥

अमृता वागमृता आपोऽग्निर्वाचोऽमृतं तत्रिवृदेकधाम ताभिर्मत्प्रत्ताभिः स्वधया मदध्वमिहासभ्यं वसीयोऽस्तु देवाः ॥

यन्मे माता प्रलुलोभ यच्चचारानुव्रतम् ।
तन्मे रेतः पिता वृङ्क्तां माभिरन्योऽवपद्यताम् ॥
यन्मे पितामही प्रलुलोभ यच्चचारानुव्रतम् ।
तन्मे रेतः पितामहो वृङ्क्तां माभिरन्योऽवपद्यताम् ॥
यन्मे प्रपितामही प्रलुलोभ यच्चचारानुव्रतम् ।
तन्मे रेतः प्रपितामहो वृङ्क्तां माभिरन्योऽवपद्यताम् ॥

यास्तिष्ठन्तीत्यनुष्टुप्, यन्मे मातेति च । यास्तिष्ठन्ति स्थावररूपाः तडागादिगाः, या धावन्ति नद्यादिगताः, या अद्रुग्धाः अनुपाहिंसिता नित्या मेध्याः, या परिसस्रुषीः परिस्रवन्त्यो ह्रदप्रभवाः, ताभिः सर्वाभिर्विश्वस्य लोकत्रयस्य धर्त्रीभिः पाद्यार्थमाह्रियमाणाभिरन्यान् पितॄन् अन्तर्दधे ॥

अमृता वाक्, वाक् स्तनयित्नुरूपा अमृता अविनाशिनी । एवमापोऽपि अमृता मेध्याः । अग्निर्वाचोऽमृतं, मेध्याया वाचोऽग्निर्वैद्युतोऽमृतं तत्कृतत्वात्तस्याः । तन्निवृदेकधाम, तदेतत् त्रिवृत् त्रयमेकधाम एकाश्रयं, एको हि मेघस्त्रयस्याश्रयः । कस्य त्रयस्य । अपां वाचोऽग्नेः । ताभिर्मत्प्रत्ताभिः स्वधया मदध्वं, हे देवा ऋत्विजः पितरो वा अद्भिः पाद्यादिभिर्मया प्रकर्षेण दत्ताभिर्मदध्वं तृप्यत स्वधया वा । स्वधया हि पितरो माद्यन्ति, यथोक्तं

'यथा सुराणाममृतं पितॄणां च स्वधा यथा ।
सुधा यथा च नागानां तथा गङ्गाजलं नृणाम् ॥'

इति । इहास्मभ्यं वसीयोऽस्तु देवाः, हे देवाः इहलोके अस्मदर्थं वसीयो भवतु यज्ञोपयोग्यमन्नादिकमतिशयेन वशगतं सुलभमस्तु ॥ स्त्रीव्यभिचाराद्दोषाशंकायां भिषजितुमाह यन्मे मातेति ।

'यादृशं भजते हि स्त्री सुते गर्भं तथाविधम् ।' (मनु० ९।९)

इति हि स्मरणात् क्षेत्रमप्रधानम् । श्रुतिरपि बीजप्राधान्यमाह

'अप्रमत्ता रक्षत तन्तुमेनं मा वा परे क्षेत्रे बीजमवाप्सुः। जनयितुः पुत्रो भवति संप्रदाये मोघं लभते क्षेत्रे तन्तुमेतम् ॥' (आप०ध०सू०२।६।१३।६)

इति । यन्मे माता प्रलुलोभ परपुरुषे आध्यानादिकं चकार, एतदेव च अननुव्रतं कुत्सितं व्रतं चचार चरितवती, तद्रेतो मम दोषभूतं पिता वृङ्क्तां वर्जयतु अपसारयतु । आभिश्च पाव्यादिभिरन्यो मात्रा यो ध्यातः, स मावपद्यतां आगान्मासौ हविर्ग्रहीतुम्। माभुरन्योवपद्यतामिति केचित्पठन्ति, तत्र आभुशब्दो मुधानिष्फलादिपर्यायः, मा निष्फलमागादन्यः। गतार्थमन्यत् ॥

आदित्या रुद्रा वसवो मे सदस्यास्तेषां सख्ये स्वधया मदध्वम्। स्वधां वहध्वममृतस्य योनिं यात्र स्वधा पितरस्तां भजध्वम् ॥

त्रिष्टुप्। हे पितरः, आदित्या रुद्रा वसवश्च मे मम सदसि भवाः अत्र यज्ञभूमौ स्थिताः सहचरा मित्राणि तेषामादित्यादीनां सख्ये वर्तमाना यूयं स्वधया मदध्वं तैः सह, स्वधां वह-

ध्वमिति स्वधां भजध्वम् । कीदृशीम् । अमृतस्यामरणधर्मस्य योनिं कारणम् । हे पितरः अत्र परलोके या योग्या स्वधा, तां भजध्वं सेवध्वम् । पितॄनुद्दिश्य यत्त्यज्यते अन्नं, सा स्वधेत्युच्यते ॥

सोमाय पितृमते स्वधानमः । अग्नये कव्यवाहनाय स्वधानमः ॥

सोमः पितृमान्देवता, अग्निः कव्यवाहनश्च । तद्यागेन हि पितृतृप्तिः श्रूयते

'तत्सोमं पितृमन्तं यजन्ति सोमपास्तत्पितॄन्यजन्ति द्वे वा अग्नेस्तन्वा हव्यवाहन्या देवेभ्यो हव्यं वहति कव्यवाहन्या पितृभ्यः ॥'

इति । स्वधानम इति संप्रदानार्थीयो निपातसमुदायः । द्वावपिच स्वधानमःशब्दावन्ननामसु पठ्येते । अथवा नमोऽन्नं हविः स्वधा संपद्यतामग्नये देयमित्यर्थोऽनुमन्तव्यः ॥

ये मामकाः पितरः पार्थिवासो ये अन्तरिक्षे दिवि ये समुद्रे । वाचमास्त्वा अमृता बभूवुस्तेऽस्मिन्यज्ञे सर्वकामांल्लभन्ताम् ॥

एतद्वः पितरो भागधेयं पात्रेषु दत्तममृतं स्वधावत् ।
अक्षीयमाणमुपजीवन्त्वेनं मया प्रत्तं स्वधया मदध्वम् ॥

अयं यज्ञः परमो यः पितॄणां पात्रे देयं हविरघ्यमग्नेः । मनश्च वाक्‌ पितरो वः प्रदानैरश्विभ्यां प्रत्तं स्वधया मदध्वम्‌ ॥

ये मदीयाः पितरः पृथिव्यामन्तरिक्षे दिवि च व्यवस्थिताः कर्मवशेन मानुषादिवाय्वादितारादिरूपत्वं प्राप्ताः, समुद्रे च जलचररूपत्वमापन्नाः, ये च सूक्ष्मां स्वप्रकाशां परब्रह्मरूपां निर्विभागां वाचमाश्वा प्राप्य अमृता अमरणधर्मका बभूवुः संपन्नाः, ते सर्वे अस्मिन्‌ पितृयज्ञे सर्वकामांल्लभन्तामुद्देश्याः संपद्यन्ताम्‌ ॥

हे पितरः एतद्वो युष्माकं भागधेयमेव भागः । किं तत्‌ । यत्पात्रेषु दत्तं, पात्राण्यत्र विद्वांसो ब्राह्मणा मित्राणि वा, अमृतममरणकारि अमृतमिव वा, स्वधावत्‌ स्वधाशब्दयुक्तम्‌ । अत एनं हविर्भागं मया प्रकर्षेण दत्तं पितृगणा उपजीवन्तु भुञ्जताम्‌ । अनया स्वधया हे पितरो मदध्वम्‌ ॥

अयमेव परम उत्कृष्टो यज्ञो यः पितॄणाम्‌ । अत्र हि हविः पात्रे देयं, पात्रेषु विद्वद्ब्राह्मणेषु

दीयते न त्वग्नौ हुत्वा भस्मीभावमापाद्यते, अपात्राणि वा पात्राणि तेषु स्थाप्यते। अग्नेश्च जाठरस्याद्यमदनीयं भवति। किंच अत्र यज्ञे हे पितरः, मनसा वाचा प्रकृष्टैश्च दानप्रकारैर्दानक्रियया अरिक्तभावापन्नैरुदकदानादिभिः प्रकर्षेण दत्तं हविर्वो युष्मभ्यमश्विभ्यां च देवताविशेषाभ्यां देवभिषग्भ्यां प्रत्तमिति स्तुतिः, हस्तौ वाश्विनौ तौ हि सर्वक्रियां व्याप्नुतः। हे पितरः ईदृश्या स्वधया मदध्वम् ॥

एषा व ऊर्गेषा वः स्वधा तामत्त च पिवत च मा च वः क्षेष्ठाः येह पितर ऊर्ग्देवता च तस्यै वयं ज्योग्जीवन्तो भूयास्म ॥

आमासु पक्वममृतं निविष्टं मया प्रत्तं स्वधया मदध्वम्। वैश्वदेवे हविषि पिन्वमानं विश्वेषु भूतेषु पृथङ्निविष्टम् ॥

हे पितरो विश्वे देवाश्च एषा भक्तादिका वो युष्माकं ऊर्क् अन्नं, एषा च घृतदधिरूपा क्षीररूपा वा स्वधा उभयरूपापि वा ऊर्क् बलं स्वधा च तामन्नरूपामत्त भक्षयत, क्षीरघृतरूपां तु पिवत। मा च इयमपि वः युष्माकं क्षेष्ठाः क्षयं विनाशं मा गात्। हे पितरः या

इह यज्ञे ऊर्क् अन्नं देवता पितृरूपा, तस्यै तदर्थं वयं ज्योक् चिरकालं जीवन्तो भूयास्म चिरकालं यागं कुर्यामेत्यर्थः ॥

आमासु अपक्वासु ओषधिषु गोषु मांसादिसमूहात्मिकासु पक्वं भोगयोग्यतां प्राप्तं क्षीरं घृतं वा निविष्टं स्थितं अमृतमिव, तत् मया युष्मभ्यं दत्तम्। तेन स्वधाभूतेन मदध्वम्। वैश्वदेवे हविषि पिन्वमानं, मिश्रीभवत् वैश्वदेवग्रहणं प्राथम्यात् वैश्वदेवे पित्र्ये च हविषि अन्तर्भवत् क्षीरं घृतं वा। विश्वेषु सर्वेषु भूतेषु स्त्रीप्रभृतिषु सक्षीरत्वेन पृथक् निविष्टमिति क्षीरघृतस्तुतिः ॥

अमुष्मै स्वधानमोऽमुष्मै स्वधानमः ॥

नमोऽन्नं पितृपितामहप्रपितामहानां स्वधा भवत्वित्यर्थः ॥

एतदनन्तरं प्राश्नन्तु भवन्त इत्यनुमतं कृत्वा भोजयेत्। चतुर्थ्यन्तपितृपितामहप्रपितामहानां नामयोगेन च स्वधानमस्कारः पृथिवी ते पात्र-

**मित्यनेन सघृतमन्नमभिमृश्य तदन्ते कर्तव्यः । ततोऽनुमतदानम् ॥**

पृथिवी ते पात्रं द्यौरभिधानं ब्राह्मणस्य मुखे अमृतं जुहोम्यूर्गस्यूर्जो दा ऊर्जं मे देह्यूर्जं मे धेह्यन्नं मे देह्यन्नं मे धेह्यक्षितिरसि मा मे क्षेष्ठामुत्रामुष्मिंल्लोक इह च ॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पांसुरे ॥ विष्णो हव्यं रक्षस्व विष्णो कव्यं रक्षस्व ॥

ते सघृतान्ना पृथिवी मही तव पात्रं पार्थिवानि पात्राणि द्वयरूपाणि वर्णितानीत्यर्थः । अभिधानं च तव दिव्यन्तरिक्षे वर्तमानः शब्दो मन्त्रादिस्तव वाचक इत्यर्थः । अत एवंभूतममृतममरणकारि पीयूषसदृशं ब्राह्मणस्य मुखे त्वां जुहोमि । असि त्वमूर्क् अन्नम्, ऊर्जो दाः ऊर्जः बलस्य त्वं दाता । अत ऊर्जं मे मह्यं देहि, तथोर्जं धेहि विधेहि कुरु बलमुत्पाद्य मह्यं प्रयच्छेत्यर्थः । एवमन्नं देहि अन्नं मे धेहीति । अक्षितिरसि, असि त्वमक्षितिरक्षयधर्मकं प्रवाहरूपेण । अतो मा मे क्षेष्ठाः विच्छेदस्तव मा भूदमुत्र मद्गृहे, इह इहलोके अत्र

जन्मनि, अमुष्मिंश्च परलोके जन्मान्तरे च मा मे क्षेष्ठाः ॥

इदं विष्णुः प्रजापतिः विचक्रमे पराक्रान्तवान्, त्रेधा लोकत्रयात्मना पदं निहितवान् । चतुर्थपदमस्य पांसुरे अविद्यारजसा च्छन्ने जीवात्मगणे समूढं निमग्नं जीवात्मत्वेनैव व्यामूढमतथापि तथा सर्वजीवात्मसु स्थितमित्यर्थः ॥ अत उच्यते हे सर्वमय विष्णो हव्यकव्ये रक्षस्व गोपाय राक्षसादिभ्यः ॥

यन्मे प्रकामादुत वाप्यकामादसमिद्धे ब्राह्मणेऽब्राह्मणे वा ।
यत्स्कन्दति निर्ऋतिं पाथ उग्रामग्निष्टत्सर्वं शुन्धतु ॥
उशन्तस्तेन पितरो मदन्तां तेन पूतेन देवता मादयन्ताम् ॥
अहोरात्रैः ससन्धिकैरर्धमासैर्मासैर्ऋतुभिः परिवत्सरैः ।
संवत्सरस्य कृत्तीभिरन्तरन्यान्पितॄन्दधे ॥
यद्वः क्रव्यादजहादेकमङ्गं पितृलोकं जनयञ्जातवेदाः ।
तद्व एतेन पुनराप्यायतामरिष्टासः पितरो मादयध्वम् ॥
स्वधां वहध्वममृतस्य योनिं यात्र स्वधा पितरस्तां भजध्वम् ।

यन्मे मम पाथः अन्नं निर्ऋतिं भूमिं स्कन्दति पतति दानवमातरं वा गच्छति अविधानोपहतत्वाद्धन्तुमिच्छति, तत् सर्वमग्निः शुन्धतु पवित्रीकरोतु । तेन च शोधितेन पितरो मद-

न्तां हृष्यन्तु । किं कुर्वन्तः । उशन्तः कामयमानाः । किंच । तेनानेन पूतेन पवित्रेण सता देवता अपि मादयन्तां विश्वेदेवात्मिका मादयन्तामिति स्वार्थे णिच् माद्यन्तु । रामो राज्यमकारयदित्यादौ हि स्वार्थे णिच् दृश्यते । कीदृशीं निर्ऋतिम् । उग्रां भूमिपक्षे दुष्टलेपादिना अपवित्रभूतां, दानवमातृपक्षे तु प्रचण्डाम् । अशुद्धत्वे कारणमाह—प्रकामात् श्रद्धातिशयात् बाहुल्यात् वा दीयमानं स्कन्दति पतति भूमौ निर्ऋतौ वा गच्छति ब्राह्मणैरुपेक्षितत्वात्, अकामाद्वा श्रद्धाभावाद्दीयमानं निर्ऋतिं गच्छति, असमिद्धे वा ब्राह्मणे मूर्खे दुराचारदूषिते वा यद्दीयते प्रच्छन्नत्वादब्राह्मणे वा, तत् निर्ऋतिं स्कन्दति तदुत्संसर्गोऽपवित्रीभूतमयोग्यं करोतीत्यर्थः ॥ अहोरात्रैरिति अन्तर्दधे पर्वतैरित्यादिना गतार्थम् । संवत्सरस्य क्लृप्तयो याभिः संवत्सरः कल्प्यते परिच्छिद्यते, तास्तु घटिकानालिकादयः ॥

यद्वः क्रव्यादजहादिति त्रिष्टुप् । इह प्रेतानां यदङ्गं श्मशानाग्निना दह्यते, तत् परलोकस्थानां

विशेषकर्मवशेन उत्पद्यते । यत्तु अदग्धं, न तज्जायत इति, तेन विकलानि पितृशरीराणि भवन्ति । तत्पूरणायेदमुच्यते—हे पितरो वो युष्माकं यदङ्गं क्रव्यादजहात् तत्याज न ददाह, क्रव्यं अपक्वं मांसमत्तीति क्रव्यात् श्मशानाग्निः, एकग्रहणमुपलक्षणार्थम्, तत् जातवेदाः जातप्रज्ञानो जातधनो वा वैदिकक्रियादिना आहवनीयादिः पुनरप्येतेन कर्मणा आप्यायतां युष्माकं पूरयतु वर्धयतु । अतश्च हे पितरो यूयमरिष्टासः अरिष्टाः अनुपहिंसिताः सन्तोऽनेन कर्मणा मादयध्वम् । किं कुर्वन् जातवेदा विकलमङ्गमाप्याययतु । पितृलोकं जनयन्, पितृशरीराणि उत्पादयन्, हेतौ शतृप्रत्ययः, पितृलोकजननाय अर्जयन्वसतीतिवत् । हे पितरः स्वधां वहध्वं प्राप्नुत । कीदृशीम् । अमृतस्य योनिम्, अमरणधर्मत्वस्य कारणम् । या अत्र परलोके योग्या स्वधा, तां भजध्वं विभजध्वं वा अनुचरेभ्यः । यदपेक्षयोच्यते निपरणे 'ये चात्र त्वानु' इति ॥

नारायणस्यार्षं 'मधु वात ऋतायते' इति

त्र्यचं पठेत्, ओंभूर्भुवःस्वस्तत्सवितुरिति च त्रिः । दक्षिणाग्रान्दर्भानास्तीर्य यास्तिष्ठन्ति० इत्यनेन भूपृष्ठे दर्भतिलोदकेनावनेजनं स्वधा । उशन्तस्त्वा हवामह० इति पठेत् । तिलास्तोयं०॥

पृथिवी दर्विरक्षिता तृप्तिः स्वधानुपदस्ता तां पृथिवीं दर्विमक्षितां तृप्तिं स्वधामनुपदस्तामग्निरिव पृथिवीमुपजीवासौ ये चात्र त्वान्वेषा ते स्वधा ॥ १ ॥ अन्तरिक्षं दर्विरक्षिता तृप्तिः स्वधानुपदस्ता तामन्तरिक्षं दर्विमक्षितां तृप्तिं स्वधामनुपदस्तां वायुरिवान्तरिक्षमुपजीवासौ ये चात्र त्वान्वेषा ते स्वधा ॥ २ ॥ द्यौर्दर्विरक्षिता तृप्तिः स्वधानुपदस्ता तां दिवं दर्विमक्षितां तृप्तिं स्वधामनुपदस्तां सूर्य इव दिवमुपजीवासौ ये चात्र त्वान्वेषा ते स्वधा ॥ ३ ॥

एतैस्त्रिभिः पितृपितामहप्रपितामहानां त्रीन्पिण्डान् निपृणाति मन्त्रलिङ्गात् । अग्निवायुसूर्याश्चात्र लोकत्रयस्थाः पित्रादित्वेन भाव्यन्ते, पिण्डेषु च पृथिव्यादिबुद्धिः क्रियते ॥

इयं पृथिवी दर्विरिवान्नसाधनत्वसामान्यात् दारयति वा दोषान् कर्माद्यनुष्ठानद्वारेण विदुषामिति दर्विः पृथिवी अक्षिता अविनाशिनी इतरदर्विविलक्षणा, तृप्तिः प्रीतिहेतुत्वात्, स्वधा

प्रथमपिण्डरूपा पृथिवी, अनुपदस्ता 'दसु उपक्षये' अनुपहिंसिता, तां पृथिवीं दर्विमक्षितां तृप्तिं स्वधामनुपदस्तां पृथिवीं प्रथमपिण्डरूपां उपजीव भुङ्क्ष्व हे पितः । क इव । अग्निरिव, यथा अग्निः पृथिवीमुपजीवति भौमस्तदधिपतित्वात्, तद्वत् । ये चात्र त्वानु, ये चात्र परलोके त्वामनु स्थिताः तव अनुचरभूताः, तेऽप्युपजीवन्तु पिण्डमेतत् सानुचर उपजीवेत्यर्थः । एषा स्वधा भवत्विति शेषः ॥ अनेनैवेतरौ गतार्थौ । अन्तरिक्षं दर्विस्तमसो विदारणादन्नसाधनत्वाद्वा । द्यौर्दर्विर्दुःखनिवारणात् स्वर्गस्य निरतिशयसुखात्मकत्वात् ॥

अत्र पितरो मादयध्वम् । येऽत्र पितरः प्रेता युष्मांस्तेऽनु य इह पितरो जीवा अस्मांस्तेऽनु येऽत्र पितरः प्रेता यूयं तेषां वसिष्ठा भूयास्थ य इह पितरो जीवा वयं तेषां वर्षिष्ठा भूयास्म ॥ एतानि वः पितरो वासांस्यतो नोऽन्यत्पितरो मा यूढ्वं वीरान्नः पितरो दत्त ॥

हे पितरः ये प्रेता मृताः सन्तः अत्र परलोके स्थितास्ते युष्मान् अनुसरन्तु युष्मदनुयायिनो भवन्तु । हे पितरो ये प्रेताः सन्तः

इहलोके स्थितास्ते अस्माननुसरन्तु, ये परलोके स्थितास्तेषां मध्ये यूयं वसिष्ठाः अतिशयेन वसुभिर्धनैः पूर्णा भूयास्थ संपद्यध्वम् । हे पितरो ये जीवाः स्थिताः इह अस्मिल्लोके स्थितास्तेषां मध्ये वयं वर्षिष्ठा वर्षैर्धनादिभिर्वा वृद्धतमा भूयास्म संपद्येमहि ॥ वः युष्मभ्यं एतानि वासांसि कार्पासतन्तुरूपाणि दत्तानि ॥ अतो नोऽन्यात्पितरो मा यूढ्वम् 'यु मिश्रणे' यदन्यदद्दत्तं भृत्याद्यर्थं परिशेषितमन्नादिकं, तत् स्वकीयेन मिश्रितं कृत्वा मा हार्षुः। हे पितरो नोऽस्मभ्यं वीरान् पुत्रान् दत्त ॥

ऊर्जं वहन्तीरमृतं घृतं मधु पयः कीलालं परिस्रुतं स्वधा स्थ पितॄन्मे तर्पयत ॥

आप उच्यन्ते—हे आपः स्वधा स्थ पितॄणां हविर्भवथ, ततश्च मम पितॄन् तर्पयत। किं कुर्वत्यः। ऊर्जमन्नं बलममृतममरणकारि पीयूषं वा वहन्त्यः प्रापयन्त्यः, घृतं मधु कीलालं चान्नरसं सद्योजातं परिस्रुतं क्षीरं च वहन्त्यः। अद्भ्यो हि सर्वं जायते इति सर्वं तत्र शक्त्यात्मना स्थितम् ॥

मन्त्रलिङ्गाच्च घृतमिश्राभिरद्भिरभिषेकः पिण्डानां कर्तव्यः ॥

मा मे क्षेष्ठा बहु मे पूर्तमस्तु ब्रह्माणो मे जुषन्तामन्नमन्नम् ।
सहस्रधारममृतोदकं मे पूर्तमस्त्वेतत्परमे व्योमन् ॥

हे अन्न मे मम मा क्षेष्ठा क्षयं मा गाः अविच्छिन्नं भव । पूर्तं वैदिकं कर्म श्राद्धादिकं बहु विपुलं विपुलबलं च अस्तु भवतु । ब्रह्माणो ब्राह्मणा ममान्नमन्नं सर्वस्य हविष्यान्नस्य अंशं जुषन्तां सेवन्तामदन्तु, सहस्रधारं सहस्रशाखं सहस्रधारं वा अपरिमितस्थितिकमित्यर्थः । कीदृशम् । अमृतोदकं अमृतमिवोदकं व्यञ्जनं क्षीरादिकं यस्य तत् । यत्पूर्तं यज्ञोपयोगि, तत् परमे व्योमन्नस्तु परब्रह्मप्राप्तये भवतु । एतच्च भुक्तपरिशिष्टमभ्युक्षणं परमे व्योम्नि वर्तमानं पवित्रं भवतु ॥

अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम ।
भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ॥

स्पष्टम् ॥

यन्मे रामः शकुनिः श्वापदश्च यन्मेऽशुचिर्मन्त्रकृतस्य प्राशत् । वैश्वानरः सविता तत्पुनातु तस्मिन् पूते देवता मादयन्ताम् ॥ तेन पूतेन पितरो मदन्ताम् ॥

मन्त्रेण कृतं मन्त्रकृतं पित्र्यं हविः। तस्यांशं यदशुचिः प्राणिपाशः प्राशत् प्राश्नादुच्छिष्टं कृत्वा दूषितवान् अलक्षितः, तद्वैश्वानरः औपसदोऽग्निः पुनातु पवित्रं करोतु। तस्मिंश्च पूते पवित्रिते सति देवता विश्वेदेवा माद्यन्तु। पितरश्च तेन पूतेन माद्यन्तु। कोऽसावशुचिः। रामः शकुनिः श्वापदश्च, रामः काकः शकुनिः पक्षीति सामान्यविशेषसमानाधिकरणः, शुन इव पदं यस्य स श्वापदो मार्जारादिः॥

अभिरमन्तु भवन्तोऽभिरताः स्मः। देवाश्च पितरश्चैतत्पूतमेवोपजीवन्तामस्मिंल्लोके मां धत्त जीवेम शरदः शतं पश्येम शरदः शतम्॥

अथास्मभ्यमूर्जं धत्त ज्योतिर्धत्ताजरं न आयुर्यदन्तरिक्षं पृथिवीमुत द्यां यत्पितरं मातरं वा जिहिंसिमाग्निर्नस्तस्मादेनसो गार्हपत्यः प्रमुञ्चतु चकृम यानि दुष्कृता॥

देवा विश्वे देवाः पितरः पितृपितामहप्रपितामहादयः एतत्कर्म पवित्रमुपजीवन्तां भुञ्जताम्। हे देवाः अनेन कर्मणा प्रीताः सन्तोऽस्मिंल्लोके मां धत्त चिरं स्थापयत दीर्घायुष्ट्वं मम कुरुतेत्यर्थः। शरदः शतं जीवामो वयं

त्वत्प्रसादात् । एवं वर्षशतं पश्येम अविकलेन्द्रियाः स्यामेत्यर्थः ॥ अथ तथा अस्मभ्यमूर्जं बलमन्नं च ज्योतिर्दीप्तं ब्रह्मवर्चसादिकमजरं चाविनाशि दीर्घमायुः धत्त ददत । किंच । यदन्तरिक्षमन्तरिक्षस्थं पक्ष्यादिकं पृथिवीस्थितं च, स्वर्गस्थितं देवताविशेषं जिहिंसिम हिंसितवन्तो वयमनुपकृतवन्तोऽपूर्णकर्मानुष्ठानेन अशुद्धसंकल्पादिना विराधितवन्तः, एवं पितरं मातरं वा यज्जिहिंसिम विराधितवन्तस्ततो यदेनः पापमुत्पन्नं, तस्माद्गार्हपत्यसदृशोऽग्निरस्मान्प्रमुञ्चतु वियोजयतु । अन्यान्यपि यानि पापानि चकृम वयं कृतवन्तस्तेभ्योऽपि विमुञ्चत्वयमग्निरस्मान् ॥

तृप्यन्तु भवन्तः पितरो ये च भवतोऽनु ये चास्मास्वाशंसन्ते तृप्यत । तृप्यन्तु भवन्तः पितामहा ये च भवतोऽनु ये चास्मास्वाशंसन्ते तृप्यत । तृप्यन्तु भवन्तः प्रपितामहा ये च भवतोऽनु ये चास्मास्वाशंसन्ते तृप्यत । तृप्यन्तु भवत्यो मातरो याश्च भवतीरनु याश्चास्मास्वाशंसन्ते तृप्यत । तृप्यन्तु भवत्यः पितामह्यो याश्च भवतीरनु याश्चास्मास्वाशंसन्ते तृप्यत । तृप्यन्तु भवत्यः प्रपितामह्यो याश्च भवतीरनु याश्चास्मास्वाशंसन्ते तृप्यत तृप्यत तृप्यत । अमुकस्यामुकगोत्रस्य दत्तमन्नमक्षयमस्तु स्वधा ॥

अस्मान्मन्त्रलिङ्गात् षण्णां श्राद्धम् । हे पितरो भवन्तस्तृप्यन्तु । ये च भवतोऽनु, येऽपि युष्मदनुचरास्ते तृप्यन्तु । तृप्यन्तु इति वचनं पितृव्याद्यपेक्षमित्युक्तम् । एवं पितामहादिष्वपि यथायथं योजनीयम् । ये चास्मास्वाशंसन्ते, अन्येऽपि ये अस्मास्वाशंसनं हविराशां कुर्वन्ति अदग्धादयः, तेऽपि तृप्यन्तु अनेन कर्मणा । गतार्थमन्यत् । अन्ते त्रिस्तृप्यतेरभ्यासोऽतिशयार्थः ॥

दातारो नः प्रवर्धन्तां वेदाः सन्ततिरेव च ।
श्रद्धा च नो मा व्यगमद्बहु देयं च नोऽस्त्विति ॥
(मनु० ३।२५९)

अन्नं च नो बहु भवेदतिथींश्च लभेमहि ।
याचितारश्च नः सन्तु मा च याचिष्म कंचन ॥ एवमस्तु ॥

निगदव्याख्यातम् ॥

अथ कुशाविसर्जनं

वाजे वाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः । अस्य मध्वः पिवत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥

हे वाजिनो देवाः पितरश्च नोऽस्मान् वाजे वाजे अन्ने अन्ने अवत रक्षत । हे विप्रा ब्रा-

ह्मणाः, तेषु हि विश्वेदेवबुद्धिः पितृबुद्धिश्च, तदुद्देशेन भोजितेषु ब्राह्मणेष्वियम्, अथवा 'प्रा पूरणे' विशेषेण पूरका विप्राः पितरो विश्वेदेवाश्च अमृताः अमरणधर्मकाः, ऋतज्ञाः सत्यज्ञा यागज्ञा वा, अस्य मध्वः मधुररसस्य भागं पुनः पुनः पिवत, मादयध्वं च पुनः पुनः । संप्रति तु तावत्तृप्तत्वात् यात गच्छत देवगमनैर्मार्गैर्यैरध्वभिर्देवा गच्छन्ति ॥

आ मा वाजस्येति परिषेकः ॥

आ मा वाजस्य प्रसवो जगम्यादा मा द्यावापृथिवी विश्वरूपे ।

आ मा गन्तां पितरं मातरं चा मा सोमो अमृतत्वेन गम्यात् ॥

माशब्देन लक्ष्मीरभिधास्यते । मा लक्ष्मीः कर्त्री आ जगम्यात् आ समन्तात् स्थिरा भूयात् मा गच्छेत् । मा लक्ष्मीः कीदृशी । प्रसवः प्रसूता धनपुत्रादिद्वारेणोत्पत्तिकारिका । कस्य । वाजस्य नारायणस्य । द्यावापृथिवी च आ जगम्यात् आगच्छतां द्यौराकाशात्स्वर्गस्थानात्, पृथिवी भूमिस्थानाद्वा स्वर्गलोकादाजगम्यात् ।

मा लक्ष्मीः कीदृशी । विश्वरूपा विश्वस्य व्यापिका विश्वमयी च सा विश्वव्यापिका, तथा मदीयं पितरं मातरं च मा लक्ष्मीः स्वयं सार्धं गृहीत्वा आगन्ताम् । हे सोम त्वमागम्यात् । सह केन । अमृतेन सह अमृता अमरणरूपवस्तुना सह । मा लक्ष्मीश्च आगम्यात् ।

पृच्छां संपाद्य अमुकस्यामुकगोत्रस्य सांवत्सरिकं श्राद्धमच्छिद्रमस्तु एवमस्तु । तिलोदकं स्वधा उदकतर्पणं स्वधा ॥

इति त्रिषष्टितमी काण्डिका ॥ ६३ ॥

अथ

चतुःषष्टितमी काण्डिका ।

---

अथान्वष्टकाश्राद्धं

द्वितीयस्य ॥ १ ॥

प्रथमोद्धृतं हविष्यैरुपसिच्यावाहनादि सिद्धं संप्रदानम् ॥ २ ॥

पूर्वेण निपरणं व्याख्यातम् ॥ ३ ॥

द्व्यामुष्यायणस्य द्विधा श्राद्धं स्मृत्योक्तम् । परिग्रहीतृगोत्रेण जनयितृगोत्रेण तन्त्रेण कुर्यात् आवृत्त्या वा । तत्र यदा तन्त्रेण, तदा प्रदाने निपरणे च मन्त्रोहः—अमुष्मै स्वधानम इति । अत्र जनकप्रतिग्रहीत्रोर्नाम चतुर्थीद्विवचनान्तमुच्चारयितव्यं देवदत्तयज्ञदत्ताभ्यां स्वधानम इत्यादि । निपरणेऽपि अग्निरिव पृथिवीमुपजीवतं देवदत्तयज्ञदत्तौ ये च वामन्वित्यादि । आवृत्तिपक्षे परिग्रहीतुः पूर्वं कृत्वा पश्चाज्जनकस्य कुर्यात् । तत्र द्वितीयश्राद्धप्रकारोऽनेनोच्यते । द्वितीयस्येत्यत्र सूत्रे प्रकारं वक्ष्याम इत्यध्याह-

तैव्यम् । द्वितीयस्य जनकश्राद्धस्येतिकर्तव्यतां वक्ष्यामो द्व्यामुष्यायणकर्तृकस्येत्यर्थः, अथवा द्वितीयस्य पितुर्बीजिनः श्राद्धं पृथग्वक्ष्याम इति व्याख्येयम् । यद्वा एकोऽपि कृत्रिमपुत्रादिर्भिद्यते कुलद्वयसंबन्धभेदात् । तत्र प्रतिग्रहीतुः श्राद्धे कृते जनकस्य श्राद्धं कुर्वाणः स एव द्वितीय उच्यते । तस्य द्वितीय इत्युच्यमानतामापन्नस्य द्वितीयश्राद्धं वक्ष्याम इत्यर्थः ॥ एकसंघातेनैव या रसवती कृता, ततः प्रतिग्रहीतृश्राद्धकरणात्प्रथममेवोद्धृत्य सर्वान्नं पृथक् स्थापयितव्यं सव्यञ्जनम् । तच्चोपग्रहीतृश्राद्धानन्तरं हविष्यैर्दधिक्षीरमधुप्रभृतिभिरुपसिञ्चेत् । तत आवाहनादि संप्रदानमनुवाकशेषेणोपस्थानान्तमन्येषु ब्राह्मणेषु कुर्यात् । सिद्धमित्यनेन पूर्वोक्तप्रकारं निर्दिशति आवाहनाद्युपस्थानान्तं पूर्वोक्तमन्यूनातिरिक्तं पुनः कुर्यात् । स्थालीपाकादिकमेव तु तन्त्रेणोपकरोति । प्रथमोद्धृतं हविष्यैरुपसिच्यावाहनादि सिद्धं संप्रदानमित्यस्यापरा व्याख्या—प्रथमं परिग्रहीतृश्राद्धार्थमुद्धृतं यस्मात् तत् प्रथमोद्धृतं, तत् यातयामत्वदोषापसारणाय

हविष्यैः क्षीरादिभिरुपसिच्य तत एवावाहनाद्यु-पस्थानान्तं सकलं सिद्धं पूर्वज्ञातमेवावृत्त्या कुर्यात्, अन्यत् स्थालीपाकादि सकृत्कृतं तन्त्रे-णोपकरोति प्रयासाद्यदि वा कालभेदात्॥ पूर्वेण निपरणं व्याख्यातमिति, निपरणं यथादर्शित-मेव कर्तव्यं, तत्र पूर्ववदूहः कर्तव्य इत्यर्थः। अन्या व्याख्या—निपरणं पूर्वेण ग्रन्थेन यथा व्याख्यातं वर्णितं, तथैव कर्तव्यं, नतु वक्ष्यमा-णान्वष्टक्यवदिति । सर्वथा स्थितमेतत् सारतो ह्यामुष्यायणेनावृत्तिपक्षे हविरर्हानुपवेश्येत्यादि-कमेवोपस्थानान्तमावर्तनीयं, नतु स्थालीपाका-दिकं तस्य तन्त्रत्वात् । यत्तु पूर्वेण निपरणं कार्यं पितामहप्रपितामहयोरत्रैव तन्त्रेण नामोच्चारणं कर्तव्यं द्वितीयतृतीयपिण्डौ निपृणाति इति व्याख्यातं पूर्वैः, तच्चिन्त्यं प्रचुरसाधुप्रयोगपर्या-लोचनेन । तदेवं तन्त्रपक्षे द्वौ वैश्वदेवौ ताव-त्तन्त्रेण भवतः जनयितुस्तत्पितुस्तत्पितामहस्य, परिग्रहीतुस्तत्पितुस्तत्पितामहस्य। एवं मात्रादी-नामप्यपरस्त्रिकस्तन्त्रेण ज्ञेयः। तेनाद्यपक्षे स्था-

लीपाकादि सकलं तन्त्रं, तत्र सामान्यविधाने नैव तन्त्रपक्षस्य गतार्थत्वादिहाप्रदर्शनमूहमात्रस्य सुगमत्वात् । आवृत्तौ तु शेषोऽभिधानमपेक्षत इति सूत्रकारेणेह पृथक् प्रयतितम् ॥ १-३ ॥

इति चतुःषष्टितमी काण्डिका ॥ ६४ ॥

---

अथ

पञ्चषष्टितमी काण्डिका ।

प्रातरन्वष्टक्यम् ॥ १ ॥

एतेनैव धर्मेण ॥ २ ॥

अष्टकायाः अनु पश्चाद्भवमन्वष्टक्यमित्यन्वर्थिकेयं संज्ञा अन्वष्टक्यमिति । एतच्च केचिदष्टकाया अङ्गं वदन्ति केचित्तत्सदृशं विकारभूतं कर्मान्तरम् । तत्रोभयथापि तत्कालत्वे प्राप्ते कालान्तरमाह प्रातरिति नवम्यां कर्तव्यमित्यर्थः ॥ एतेनैव धर्मेणेति सर्वनाम्ना प्रकृतस्य द्वितीयस्य श्राद्धस्य परामर्शः । यथा द्वितीय-

श्राद्धे स्थालीपाकादिकं न क्रियते, संप्रदानावाहनाद्युपस्थानान्तमन्यूनातिरिक्तमनुष्ठीयते, तद्वदन्वष्टक्य इत्यर्थः ॥ १–२ ॥

विशेषमाह

संप्रदाय निपरणं कुर्यात् ॥ ३ ॥

अन्वष्टक्ये हविरर्हानुपवेश्यावाहनाद्युपस्थानान्तं कृत्वा निपरणं कुर्यात्, नतु मध्ये, पूर्ववदिति शेषः ॥ ३ ॥

निपरणस्यात्र विशेषान्तरमाह

षट् कर्षूः कुर्याद्दक्षिणायताः पूर्वापराः प्रादेशमात्रीश्चतुरङ्गुलपृथ्वीस्तावदन्तरास्तावदवखाताः ॥ ४ ॥

कर्षूः खनिरुच्यते । षट् गर्तान् कुर्यात् दक्षिणायताः दक्षिणोत्तररेखया आयताः दीर्घाः । किंप्रमाणं दैर्घ्यमित्यपेक्षायामाह प्रादेशमात्रीः प्रादेशमात्राः । पूर्वापराः पूर्वपश्चिमभावेन पङ्क्त्या स्थिताः । चतुरङ्गुलपृथ्वीः पार्श्वतश्चतुरङ्गुलपरिमाणाः पूर्वपश्चिमरेखायाः । तावदन्तराः, चतुरङ्गुलपरिमाणमेव चासामन्तरं व्यवधानं कर्त-

व्यं पङ्क्तिरूपेण निर्मितानाम् । तावदवखाताः चतुरङ्गुलपरिमाणा एव ता अधः खननीयाः ४

तासां दक्षिणतः खराः ॥ ५ ॥

कर्तव्या इति शेषः । खरा मृत्तिकास्थलानि । ते तासां कर्षूणां दक्षिणेषु भागेषु षट् कर्तव्याः ॥ ५ ॥

तेष्वग्नीन्विहृत्यावोक्ष्य कर्षूर्दक्षिणाग्रान्दर्भानास्तीर्य पिण्डपितृयज्ञावृता पूर्वासु तिसृषु निधाय मज्जानमुपनिनीय दुग्धेनाभितः परिषिच्य ये चात्र रसाः स्युरेतद्भवद्भ्य इत्युक्त्वा तृप्यन्तु भवन्त इत्युक्त्वैवमपरासु स्त्रीभ्यो दद्यान्मज्जवर्जं सुरां तूपनिनयेत् ॥ ६ ॥

मन्थेनाभितः परिषिच्य ये चात्र रसाः स्युरेतद्भवतीभ्य इत्युक्त्वा तृप्यन्तु भवत्य इत्युक्त्वा प्रेष्याः पिण्डान्भक्षयेयुर्निषादा वाग्नावप्सु वा ब्राह्मणं वा भोजयेत् ॥ ७ ॥

तेषु खरेषु जानुदघ्नेषु औपसदादुद्धृत्य विहृत्य परिस्तीर्य पर्युक्ष्य परिसमूह्य चाग्नीन् कर्षूश्चावोक्ष्य अवसिच्य कर्षूषु दक्षिणाग्रान्दर्भानास्तीर्य, उक्तस्य पिण्डपितृयज्ञस्य आवृत् इतिकर्तव्यता पृथिवी दर्विरित्यादिमन्त्रादिका, तया पूर्वासु पूर्वदिग्वर्तिनीषु तिसृषु कर्षूषु त्रीन् पिण्डान् पितृपितामहप्रपितामहेभ्यो निधाय, मज्जानं च पिण्डसमीपे यूषलक्षणं स्थापयित्वा, सर्वतश्च सर्वपिण्डान् दुग्धेन परिषिच्य, अन्येऽपि ये रसवत्यां सिद्धा रसाः सन्ति तैरपि पिण्डान् सर्वतः परिषिच्य, एतदन्नं भवद्भ्यः पितृपितामहप्रपितामहेभ्यो देवदत्तादिभ्य इत्युक्त्वा, तृप्यन्तु भवन्तः पितर इत्युक्त्वा च, एवमेवापरासु अपरदिग्भागवर्तिनीषु तिसृष्ववशिष्टासु कर्षूषु स्त्रीभ्यो मात्रादिभ्यस्त्रीन् पिण्डान् पृथिवी दर्विरित्यादिप्रकारेण दद्यात्। एतावांस्तु विशेषः—मज्जानं तत्र नोपनिनयेत्। मज्जस्थाने तु सुरां विकृतयवरसरूपामुपनिनयेत्॥ मन्थेन चोदकाविलीकृतसक्तुरूपेण सर्वतः परिषिञ्चेत् अन्येऽपि ये रसास्तैरपि सिञ्चेत्। एत-

ऋवतीभ्यो मात्रादिभ्य इत्युक्त्वा तृप्यन्तु भवत्यो मातर इत्यादि चोक्त्वा पिण्डानां प्रतिपत्तिं कुर्यात् । कथम् । प्रेष्या भृत्या अनुज्ञाताः सन्तः पिण्डान्भक्षयेयुः, धीवरा वा सुरास्पर्शदूषितत्वात्, अप्स्वग्नौ वा क्षेप्तव्याः । ब्राह्मणं वा भोजयेत्पिण्डान् ये सुराभिष्यन्दसंस्पर्शेन अदूषिताः प्रथमास्त्रयः ॥ इत्यन्वष्टक्यम् ॥

इति पञ्चषष्टितमी काण्डिका ॥ ६५ ॥

---

अथ

षट्षष्टितमी काण्डिका ।

**अथ प्रथमश्राद्धस्याष्टकया धर्मो व्याख्यातः ॥ १ ॥**

अथशब्द आनन्तर्यार्थः । यदुक्तं

'शुचिर्भूतः पितृभ्यो दद्यात् ।' (४६।१)

इति, तत्राग्न्युत्पत्त्यनन्तरमेव प्रथमश्राद्धं क्रमप्राप्तमपि नोक्तं विकृतेः प्रकृतितन्त्रापेक्षितया प्रकृतितन्त्रपरिज्ञानं विना दुरधिगमत्वात् । अष्ट-

काविकारा हि सर्वश्राद्धानि प्रकृतौ ज्ञातायां सुखेन सूयन्ते इत्यष्टकानन्तरं शुचिभूतस्यैकादशेऽहनि प्रथमश्राद्धमधुनारोप्यते। किंच प्रथमश्राद्धस्यामङ्गलप्रायत्वेन लोके प्रसिद्धत्वात् प्रचुरपुरुषार्थाभिहिताग्न्याधानानन्तरमभिधानं न कृतमित्यप्याहुः। अत एवाथशब्दो मङ्गलमपि तन्त्रेण द्योतयतीति वर्णयन्ति। अतश्चायमर्थः—अथ प्रकृत्यधिगत्यनन्तरं प्राप्तप्रस्तावस्य प्रथमश्राद्धाभिधानस्य सामान्येनाष्टकया धर्मो व्याख्यातः। धर्म इतिकर्तव्यता विध्यन्त इत्येवंभावः प्रकार इति पर्यायाः॥ १॥

विशेषमाह

एकवन्मन्त्रानूहेत्॥ २॥

एकोद्दिष्टत्वादतिदेशप्राप्तस्य मन्त्रगतस्य पितृनाम्नो बहुवचनान्तस्यैकवचनमूहेत् कर्मसमवेतार्थप्रकाशनेन मन्त्राणामुपकारकत्वात्। एकेनार्थेन तुल्यमेकवत्। वैश्वदेवप्रथमपशुश्राद्धेषु न सन्ति ते तावत्, अतो नात्रोहानूहविवेकोऽस्ति। यद्यपि च

'दूष्यते वा ऋचोऽक्षरं यदेतदूहितं तस्मादृक्षु नोहेद्ब्राह्म-णवदूहेद्विकृती यथार्थं यजूँषि ॥'

इति निषिद्ध ऋचामूहः, तथापि सूत्रकारवचन-प्रामाण्यादूहः क्रियते । यत्र हि स्तुत्यादिना अनूहितान्येव ऋगक्षराणि संगच्छन्ते, तत्र स-र्वथा नोहनीयान्यृक्षु इति निषेधस्य तात्पर्यम् । असति तु गत्यन्तरे 'सर्वानर्थक्याद्वरमेकदेश-विकारः' इति न्यायोऽप्यत्र अनुगुणोऽस्ति तत्र स्पष्टार्थमूहविषयो निदर्श्यते । इह पितृशब्दोऽन-न्तरप्रमृते वर्तते यस्य श्राद्धमाम्नातं गुरुपिता-महमातुलभ्रातृप्रभृतेः । अत एव मातुलादि-पदं नोहनीयमिति गम्यत एकवदित्यस्यान्य-परिसंख्यार्थत्वात् । संबन्धिशब्दे हि पितृशब्दे भ्रात्रादिषु केनोहो वार्यते । तस्मात्पितृशब्दो रूढोऽनन्तरप्रमृते श्राद्धकर्मसु । अत एवावाह-नादिवाक्यतः पितृशब्दो मातृपितृपितामहप्र-भृतिष्वपि वर्ततेऽष्टकादिषु । नहि बहूनां श्राद्धे प्रस्तुते कस्यचिदावाहनं कस्यचिन्नेति युज्यते बहुवचनं चैकत्र । एवं स्थिते एकोद्दिष्टे प्रथम-श्राद्धे मन्त्रप्रयोगपद्धतिरियम्—प्राथम्यात् प्रथ-

मपञ्चकेन स्थालीपाकस्याज्यभागान्तं हुत्वा ऋतुतिथ्यादिकं यथायथं कृत्वा हविरर्हमुपवेश्य पितरमावाहयिष्यामीत्युक्त्वा · ओमावाहयेत्यनुज्ञात अपयन्त्वसुरा इति तिलान्विकिरेत् । अत्रोत्तरत्र

उदीरतामवर उत्पर उन्मध्यमः पिता सोम्यः ।
असुं य इयायावृक ऋतज्ञः स नोऽवतु पिता हवेषु ॥

इति ।

एहि पितर्मनोजवैरागच्छ पितर्मनोजवैः । यो निखातो योऽपरुप्तो गर्भाद्योऽवपेदे । सर्वं तमग्न आवह पितरं हविषे अत्तवे ॥

एके त्वाहुः 'ये निखाताः' इति अत्र प्रायेण वक्तव्यं विकरभाजो ह्येतदामन्त्रणं विकरश्च प्रथमश्राद्धे नास्ति ।

आगच्छ पितर्मनोजवः पितः पितः शुन्धस्व । आ मे यातु पिता भागधेयं विराजाहूतः सलिलात्समुद्रात् । अस्मिन्यज्ञे सर्वकामांल्लभतामक्षीयमाणमुपजीवत्वेनम् ।

अन्तर्दध इत्याद्यविशिष्टम् । अमृता वागित्यादौ स्वधया मदस्व, इहास्मभ्यं वसीयोऽस्तु देव, देवशब्दोऽपि हि पितरि व्याख्यातुं श-

**क्यते, अत्र विश्वेदेवाभावेऽपि । यन्मे माते- त्येक एवाविशिष्टः । आदित्या रुद्रा इत्यत्रापि स्वधया मदस्व स्वधां वह पितस्तां भजस्व । अग्नौकरणमविशिष्टम् ॥**

यो मामकः पिता पार्थिवो योऽन्तरिक्षे यो दिवि यः समुद्रे । यो वाचमाप्त्वामृतो बभूव सोऽस्मिन्यज्ञे सर्वकामांल्लभताम् ॥

एहि पितर्भागधेयं पात्रे दत्तममृतं स्वधावत् ।
अक्षीयमाणमुपजीवत्वेनं मया प्रत्तं स्वधया मदस्व ॥
अयं यज्ञः परमो यः पितुर्मनश्च वाक्च पितस्ते ।
प्रदानैः स्वधया मदस्व ॥

एषा त ऊर्गेषा ते स्वधा तामद्धि च पिब च मा च ते क्षेष्टा येह पिता ऊर्क् । मया प्रत्तं स्वधया मदस्व ॥

**यन्मे प्रकामादित्यादौ उपंस्तेन पिता मदतामिति । अहोरात्रैरित्यविशिष्टम् । यद्वः क्रव्यादित्यत्र यत्ते क्रव्यात् तत्त एतेन अरिष्टः पितर्मादयस्व, एवं स्वधां वह पितस्तां भजस्व । पृथिवी दर्विरित्यविशिष्टम् । उत्तरौ तत्र न स्तः । ये पितः प्रेतास्त्वा तेऽनु य इह पितर्जीवा वयं तेषां वर्षिष्ठा भूयास्म ॥**

एतत्ते पितर्वासांसि । अतो नोऽन्यत्पितर्मा यूथाः ।
वीराम्नः पितर्देहि । पितरं मे तर्पयत ॥

मा मे क्षेष्ठेत्यविशिष्टम् । यन्मे राम इत्यत्र तेन पूतेन पिता मदताम् । देवता मादयन्तामित्यस्य त्वनूहोऽसमवेतार्थत्वात् विश्वेदेवानामत्र अभावात् सावित्रादिवदत्र स्तुत्यर्थत्वादसमवेतार्थत्वेन । एवं विश्वेदेवाश्च पिता चेत्याद्यनुमन्तव्यम् ॥ २ ॥

विशेषान्तरमाह

पेश्यः प्रातरित्यनियमः ॥ ३ ॥

अष्टकायाः पशुर्विकल्पितः । पशुपक्षे च पेश्योऽवदानस्थाने चोदिताः । ता अतिदेशेन प्रथमश्राद्धे विकल्प्यमानपश्वनुकामित्वेन प्राप्ताः सत्यो नियमाभावविशिष्टाभावा उच्यन्ते पेशीषु स्वेच्छा कर्तव्या नवेति । पेशीद्वारेण च पशौ स्वेच्छोक्तिरियम् । विकल्पपक्षे हि पाक्षिको नियमः स्यात् । एवं यत्प्रकृतावन्वष्टक्यं, तस्यापीहातिदेशेन नित्यप्राप्तस्य अनियमः उच्यते ३

विशेषान्तरमाह

तिस्रः कर्षूः कुर्यात् ॥ ४ ॥

अनियतायामन्वष्टक्यकर्तव्यतायां सत्यां यदा कदाचिदन्वष्टक्यं प्रथमश्राद्धे कुर्यात्, तदा तिस्र एव कर्षूः कुर्यात्, नातिदेशप्राप्ताः षडिति नियमोऽयम् । कर्षूसंख्यया चाग्नीनपि त्रीन् कुर्यात् ॥ ४ ॥

त्रिष्वग्निषु कृत्वैकैकं पिण्डमुत्सृज्य प्रथमामन्नस्य पूरयेद्दधिमध्विति द्वितीयां घृतमांसमिति तृतीयाम् ॥ ५ ॥

त्रिष्वग्निषु यथाप्राप्तहोमान् कृत्वा पित्रुद्देशेनैकैकस्यां कर्ष्वामेकैकं पिण्डं क्षिपेत् पृथिवी दर्विरिति मन्त्रेणावृत्तिभाजा । तत्र प्रथमामन्नस्य नानाप्रकारस्य हविष्यस्य भागेन पूरयेत्, द्वितीयां तु दधिमध्विति पूरयेत्, निपातानामनेकार्थत्वादितिशब्दः करणशक्तिप्रधानोऽधिकरणशक्तिप्रधानान्तःशब्दवत्, दधिमधुभ्यां द्वितीयां पूरयेदित्यर्थः । घृतमांसमिति तृतीयां

पूरयेदिति समानम् । पूर्वेण वपाक्षीरादिपरिषे-कोऽपि प्रकृतिवत् एतत्ते, तृप्यतु भवानिति ॥५॥

एवं मासि मासि ॥ ६ ॥

प्रतिमासमेषैव कर्तव्यता नवश्राद्धानामित्यतिदेशार्थः ॥ ६ ॥

एवं सांवत्सरिकम् ॥ ७ ॥

संवत्सरे भवं सांवत्सरिकं सपिण्डीकरण-मप्येवमित्यतिदेशार्थः, अथवा संवत्सरे भवं सांवत्सरिकमिति व्युत्पत्तिर्ज्ञेया । द्विधा हि स्मृतिर्दृश्यते । काचिदाह सपिण्डीकरणादूर्ध्वं त्रि-पुरुषमेव कर्तव्यम् । यथाह मनुः

'यः सपिण्डीकृतं प्रेतं पृथक्पिण्डे नियोजयेत् ।
विधिघ्नस्तेन भवति पितृहा चोपजायते ॥'

इति । अपरा त्वेकोद्दिष्टमेवाह प्रतिसंवत्सरं श्राद्धम् । यथाह याज्ञवल्क्यः

'मृताहनि तु कर्तव्यं प्रतिमासं तु वत्सरम् ।
प्रतिसंवत्सरं चैव श्राद्धमेकादशेऽहनि ॥' (१।९।२५५)

इति । मासिकातिदेशेन हि एकोद्दिष्टत्वमतिदिष्टम् । नच एवं सति विरोधः विकल्पेनोभयोरनुग्रहात् उदितानुदितवद्वा शाखाभेदेन व्यवस्थानात्कुलदेशभेदेन वा । सर्व्वशाखाप्रत्ययबुद्धिसर्व-

स्थितिप्रत्ययमेकैकं कर्म युक्तम् । इह चैवमादि न वितन्यते । स्मृतितन्मीमांसासिद्धेषु स्मार्तेषु कदाचन मन्त्रादिविनियोगार्थमिदम् ॥ ७ ॥

सपिण्डीकरणे विशेषमाह

चतुर्थं पिण्डमुत्सृज्य त्रैधं कृत्वा पिण्डेषु निदध्यात् ॥ ८ ॥

अर्थात् पितृपितामहप्रपितामहानां दद्यात् ॥८

भागनिधाने मन्त्रानाह

संसृजतु त्वा पृथिवी वायुरग्निः प्रजापतिः । संसृजध्वं पूर्वेभिः पितृभिः सह ॥ समाना वः सं वो मनांसीति ॥ ९ ॥

संसृजत्वित्यनेन सहान्तेन, समाना व इत्यादिना सं वो मनांसीत्यादिना च त्रयेण प्रक्षिपेदेकैकत्रेत्यर्थः । तत्र शाखान्तरीया प्रथमा पठिता । द्वे तु

समाना व आकूतानि समानि हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥ २ ॥
सं वो मनांसि सं व्रता समु चित्तान्याकरत् ।
अमी ये विव्रता स्थन तान्वः संनमयामसि ॥ ३ ॥

हे पितस्त्वां पृथिवी संसृजतु । कैः । पूर्वैः

पितृभिः सह पितृपितामहप्रपितामहैरित्यर्थः । एवं वायुरग्निः प्रजापतिरित्येकैकं संबन्धनीयम् । संसृजध्वमिति व्यत्ययेन बहुवचनम् । त्वं च हे पितः संसृजस्व । यथाश्रुतं वा हे पितृपितामहप्रपितामहा यूयमप्यनेन सह संसृजध्वम् ॥

संसृष्टानां च सतां युष्माकमाकूतानि इच्छाः समानानि सन्तु परस्परानुकूलानीत्यर्थः । तथा हृदयानि समानानि युष्माकं सन्तु । समानं च मनो ज्ञानं धनं वास्तु । यथा वः सुसहासति, यथा युष्माकं सह कार्याणि सुष्ठु भवन्ति ॥

युष्माकं मनांसि ज्ञानानि, चित्तानि हृदयानि, व्रतानि कर्माणि समाकरं समाकार्षम् । संशब्दाः सर्वे करोतिना संबध्यन्ते समार्थाः सन्तः । ये च युष्माकं मध्ये विव्रता विरुद्धचेष्टास्तानहं संनयाम्यनेन कर्मणा परस्परानुकूलचेष्टान् करोमीत्यर्थः ॥ ९ ॥

एवमुदकानि ॥ १० ॥

पाद्यानि अर्घ्याणि चतुर्थे पात्रे निधाय पि-

ण्डवत्पितृपात्रेषु अनेनैव मन्त्रत्रयेण निदध्यादित्यतिदेशार्थः । अत्र पात्रपिण्डचतुष्टेन ब्राह्मणचतुष्टम् । निपरणं पुनः पश्चादावाहनाद्युपस्थानान्तं कृत्वान्वष्टक्यादिवत् । तथाच

चतुर्भ्यश्चार्घ्यपात्रेभ्य एकं वामेन पाणिना ।
गृहीत्वा दक्षिणेनैव पाणिना च तिलोदकम् ॥

इति ॥ १० ॥

इति सपिण्डीकरणम् ॥

इति षट्षष्टितमी काण्डिका ॥ ६६ ॥

अथ

सप्तषष्टितमी काण्डिका ।

उक्तं सर्वश्राद्धानामष्टकाविकारत्वम् । तत्र यानि पञ्चम्यादौ पुत्रकामादिश्राद्धानि लोके प्रसिद्धानि, यानि च नान्दीमुखप्रभृतीनि विवाहोपनयनतीर्थयात्राविशेषप्राप्तिविद्वद्वरद्विजोत्तमगृहागमनादिनिमित्तानि विश्वजिदधिकरणनयकल्पितस्वर्गफलकानि, तानि प्रथमाष्टकाप्रकाराणि । यानि त्वभणितनिमित्तान्येवानन्तरकथितस्वरूपाणि मेदोघृतकुल्यादिपितृतर्पणाद्यर्थार्थवादबलेन मांसविशेषसाध्यानि, तानि द्वितीयमांसाष्टकाविकारत्वेन गम्यन्ते । यानि तु पिण्डान्वाहार्यशब्दवाच्यानि अमावस्याद्वादशीसंक्रान्त्यादिनिमित्तकानि उक्तनयेन स्वर्गफलकानि नित्यानि च होमाग्निष्टोमनिदर्शनेन, तानि च मांसाष्टकाविकारत्वेन प्रतीयन्ते । तदेतद्भेदत्रयं क्रमेण भणति

अथेतरस्य श्राद्धस्याष्टकया धर्मो व्याख्यातः ॥ १ ॥

अथेत्यानन्तर्यार्थः प्रकृतिज्ञानपूर्वकस्य विकृतिज्ञानस्य निदर्शितत्वात्। इतरस्य नान्दीमुखादेरमांससाध्यस्य धर्म इतिकर्तव्यतादिपर्यायोऽष्टकया प्रथमया व्याख्यातः॥ १॥

प्रथमाष्टकाप्रकारत्वमेव व्यंक्तुमाह

**प्रथमेन पञ्चकेन॥ २॥**

आज्यमिति स्थितमेव॥ २॥

**आवाहनादि सिद्धं संप्रदानम्॥ ३॥**

संप्रदानमपि सिद्धमविचारितमेव सर्वप्रकृतिविकृतिसाधारणत्वात्॥ ३॥

**पूर्वेण निपरणं व्याख्यातम्॥ ४॥**

पूर्वेणाष्टकाप्रकारेण निपरणं कर्तव्यं, नत्वन्वष्टकाप्रकारेण कर्षूकरणादिनेति। व्याख्यातं विशेषेण कथितं पूर्वैः॥ ४॥

इति सप्तषष्टितमी काण्डिका॥ ६७॥

अथ

अष्टषष्टितमी काण्डिका ।

अथेतरस्य पशुश्राद्धस्याष्टकया धर्मो व्याख्यातः ॥ १ ॥

मध्यमेन पञ्चकेन ॥ २ ॥

प्रधानहोम इति शेषः ॥ २ ॥

आवाहनादि सिद्धं संप्रदानम् ॥ ३ ॥

गतार्थम् ॥ ३ ॥

पूर्वेण निपरणं व्याख्यातम् ॥ ४ ॥

इत्यष्टषष्टितमी काण्डिका ॥ ६८ ॥

अथ

एकोनसप्ततितमी काण्डिका ।

अथेतरस्य मासि मासि श्राद्धस्याष्टकया धर्मो व्याख्यातः ॥ १ ॥

इतरस्य प्रथममासव्यतिरिक्तस्य आमावस्यादेस्तृतीयाष्टकया धर्मो व्याख्यातः । अस्य पिण्डान्वाहार्यमिति संज्ञा प्रसिद्धा पिण्डदानान-

न्तरं ब्राह्मणभोजनस्य आहरणात् प्रदानाद्न्वर्थिकेयं संज्ञा॥ १ ॥

उत्तमेन पञ्चकेन ॥ २ ॥

तृतीयेन पञ्चकेनाज्यभागान्ते स्थालीपाकस्य होमः तृतीयाष्टकावत् ॥ २ ॥

पूर्वेण निपरणमिति ॥ ३ ॥

गतार्थम् । अन्ये तु पूर्वेण निपरणमिति सर्वत्रेत्थं व्याचक्षते—पूर्वेण पृथिवी दर्विरित्यनेनैव निपरणं, नतु उत्तराभ्यामिति नियमार्थमेतत्। इदं त्वखिलार्यजनानुष्ठानविपरीतम्। किंचैकोद्दिष्टत्वं चापतेदेवम्। उक्तं हि

'वसवः पितरो भूम्यधिपतयो रुद्राः पितामहा अन्तरिक्षाधिपतय आदित्याः प्रपितामहास्तृतीयलोकाधिपतयः।'

इति। तत्र पितृप्रकाशसमर्थत्वात्प्रथममन्त्रस्य मन्त्रलिङ्गबलेन एकोद्दिष्टत्वं प्राप्नोति मुनिवचनबलेन त्वन्यत्र विनियोगो नास्ति क्षीणत्वादर्थापत्तेरन्यार्थत्वेन वचनस्योपपन्नत्वात् ॥ ३ ॥

इत्येकोनसप्ततितमी काण्डिका ॥ ६९ ॥

अथ

सप्ततितमी काण्डिका ।

एवं 'शुचिर्भूतः पितृभ्यो दद्यात्' (४६।१) इति प्रसक्तानुप्रसक्तं निवर्त्य फाल्गुनीपाकयज्ञमविशिष्टमाह

**अथ फाल्गुन्यां तैलापूपस्य जुहोति १**

फाल्गुने मासि पौर्णमासी फाल्गुनी । तस्यां तैलपक्केन गोधूमादिमयेनापूपेन होमः कर्तव्यः । अथशब्दः श्राद्धानन्तरतां भणन् श्राद्धप्रकरणनिवृत्तिस्वस्त्ययनभविष्यत्त्वद्योतनद्वारेण मङ्गलमभिद्योतयति ॥ १ ॥

अधुना जुहोतिशब्दश्रवणात्पाकयज्ञतन्त्राभावाशङ्कानिवारणाय यज्ञप्रतीतये देवतां मन्त्रं चापूपहोमे दर्शयति यज्ञस्य होमान्तत्वोपदर्शनाय

**अर्यमा देवता ये ते अर्यमन्निति ॥२**

अपूपमन्त्रे अर्यमा देवता, संबन्धश्च यवस्य । ये ते अर्यमन्निति मन्त्रः ॥ २ ॥

अथेन्द्राण्याः ॥ ३ ॥

जुहोतीत्यनुषज्यते । द्रव्यमन्त्रौ त्वत्र वक्ष्येते प्रकरणसमाप्तौ ॥ ३ ॥

प्रससाहिष इति तुण्डिलस्य जुहोति ४

तुण्डा यस्य विद्यते स तुण्डिलो मध्योन्नतः पुरोडाशाकृतिस्तण्डुलपिष्टादिपक्वः किलाटलेपिकादिर्वा । तेन प्रससाहिष इति मन्त्रेण जुहोति ॥ ४ ॥

गोलका रुद्रदैवत्याः ॥ ५ ॥

गोलका यवमया व्रीहिमया वा गोला इति प्राकृतभाषया प्रसिद्धाः । ते रुद्रदैवत्याः कर्तव्याः । मन्त्रोऽपि रुद्रलिङ्गकोऽर्थात् ॥ ५ ॥

अदितिर्द्यौरदितिरिन्द्राणी पत्न्येत्योदनयोः शाकपललाक्तयोः ॥ ६ ॥

पात्रद्वयोद्धृतावोदनौ । तयोरेकं शाकेनाभ्यज्य मिश्रीकृत्य अदितिर्द्यौरदितिरन्तरिक्षमित्याहुतिं जुहुयात्, द्वितीयं तु पललेन तिलतण्डुलचूर्णविनिर्मितेनाभ्यज्य इन्द्राण्याः पूर्वो-

क्ताया इन्द्राणी पत्या इत्यादिमन्त्रेण जुहुयात् । तदेवं पञ्च हवींष्यत्र प्रधानयागः ॥

ये ते अर्यमन्बहवो देवयानाः पन्थानो राजन्दिव आचरन्ति । तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देव ॥

अरीन् रागादीन् अमति नाशयति तमोवत् यो ब्रह्मात्मकत्वात् सोऽर्यमा, राजमानत्वाच्च राजा, हे राजन् अर्यमन् नोऽस्मान् रक्ष गोपाय क्लेशेभ्यः । कैः रक्ष । पथिभिर्मार्गैरुपायैः । ये ते बहवो भवन्ति पन्थानः, तत्र ये देवयानाः देवानां प्राणादीनां गमनोपायभूता दिवो द्योतमानात्परब्रह्मण आचरन्ति आगच्छन्ति, तैः पथिभिरुपायैरस्मात्रक्ष । नाहं मलिनवैषयिकसुखादानद्वारेण रक्षामभ्यर्थये, किंतु मोक्षमिति यावत् । भोगासक्ताभिप्रायेण तु यैर्दिवं स्वर्गमाचरन्ति गच्छन्ति, तैर्नो रक्ष स्वर्गं प्रापयेति योजना । अद्य अस्मिन्नहनि अचिरेणैवेत्यर्थः । सुगेभिः सुगमनैः । किंच अधि च ब्रूहि देव, अधिकं ब्रूह्यस्मान् हे देव पितेव मोक्षोपायमाधिक्येनोपदिशेत्यर्थः ॥

इन्द्राणी पत्या सुजितं जिगायोदंशेन पतिविद्ये बिभेद ।
त्रिंशद्यस्या जघना योजनान्युपस्था इन्द्रं स्थविरं बिभर्ति ॥

जगती । उदिति उपसर्गो जयतिना संबध्यते । इन्द्राणी शची पत्या भर्त्रा सह स्पर्धमाना सुरतसमये तं पतिं सुजितमुज्जिगाय सुष्ठु जितोऽसीति पुरुषायितेन जित्वा जगर्ज । हेतुमाह—अंशेन पतिविद्ये बिभेद । उदिति भिदिनापीह संबध्यते । पत्युर्विद्या यत्र सुरतव्यापारे पुरुषकर्मणि तत्पतिविद्यम् । तत्र अंशेन भागेन यतः सा शची उद्बिभेद उद्भिन्ना अधिकतरकौशला जाता । किंच त्रिंशद्योजनानि यस्या जघनं, योजनशब्दोऽङ्गुलिनामसु पठितः, अतिवैतत्यार्थं वा त्रिंशद्योजनग्रहणं विततजघनत्वाच्च इन्द्रं जितवतीत्यर्थः । यतोऽसावुपस्थे नितम्बे स्थविरं प्रवृद्धतरमपीन्द्रं बिभर्ति धारयति तस्मात्स्वव्यापारं संस्थाप्य शोभना इन्द्रं जयतीति अर्थ उत्तानः । परमार्थस्तु—इन्द्राणी विद्या, तस्याः पतिरिन्द्रः परमात्मा । सा च अंशेन भागेन तादात्म्यादुज्जिगाय व्याप्तवती स्पर्धया विततजघनतया, हन्तीति जघनमवि-

द्याविनाशकारिसामर्थ्यमाह । इन्द्रं स्थविरं वृद्धं अविद्याजरया वासनादिना व्योमवज्जीवात्मादिरूपेण व्यवधीयमानमुपस्थे स्वरूपे बिभर्ति धारयति विरोधिनीमविद्यां व्यावर्त्य । प्रकृष्टपुरुषार्थोपायत्वपर्यवसायिसरस्वतीरूपविद्याप्रशंसेयम् । यथोक्तमस्माभिः

'अवावरीं धीतिमिरस्य पीवरीं
संसारसिन्धोः परमार्थदृश्वरीम् ।
सुधीवरीं सत्पुरुषार्थसंपदां
नमामि भक्त्या परया सरस्वतीम् ॥'

इति ॥

प्रससाहिषे पुरुहूत शत्रूञ्ज्येष्ठस्ते शुष्म इह रातिरस्तु ।
इन्द्राभर दक्षिणेना वसूनि पतिः सिन्धूनामसि रेवतीनाम् ॥

जगती । हे इन्द्र पुरुहूत बहुभिराहूत त्वं शत्रून् प्रससाहिषे साहयसि अभिभवसि । भवतो ज्येष्ठोऽतिशयेन प्रशस्तः शुष्मो बलम् । किंच त्वं रेवतीनां रैयुक्तानां मुक्तादिधनवतीनां सिन्धूनां नदीनां पतिरतस्त्वत्प्रसादादिहास्मद्गृहे रातिर्दानं यागादिप्रवृत्तिरस्तु भवतु । आ भर दक्षिणेन वसूनि, धनानि दक्षिणेन हस्तेनाभर आहर धनपतिस्त्वम् ॥

मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते।
यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु ॥

व्याख्यातेयम् ॥

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वेदेवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम् ॥

अदितिरदीनात्मा विद्यात्मिका सरस्वती । सा द्यौः स्वर्गः पृथिवी चेत्यर्थस्तद्विवर्तपरिणामाभ्याम्, अन्तरिक्षं च । अन्तरिक्षपक्षे सर्वगतत्वेन सर्वमप्यदितिः, पृथिवीपक्षे लोकत्रयस्थितजनाप्यायकत्वेन सह हेतुत्वेन च तथा स्तुतिः । अदितिर्माता निर्मात्री । सैव पिता पालयित्री। सैव च पुत्रः पावयित्री । विश्वे सर्वे देवा अदितिरदितिरेव । पञ्चजना अदितिरेव ।

'मनुष्याः पितरो देवा गन्धर्वा असुरास्तथा ।
रक्षांसि जायमानत्वाज्जनाः पञ्च प्रकीर्तिताः ॥'

यच्च जातं किंचित्, यच्च जनित्वं जनिष्यमाणं, तत् सर्वमदितिरेव ॥ इति फाल्गुनी ॥

इति सप्ततितमी काण्डिका ॥ ७० ॥

अथ

एकसप्ततितमी काण्डिका ।

**गावो भग इति द्वाभ्यां गोयज्ञस्य ॥१॥**

गवां प्रसूतानां स्वास्थ्यपुनःसद्गर्भग्रहणाद्यर्थो वसन्ते यज्ञो गोयज्ञः । अश्रुतद्रव्येषु आज्यं हविश्चतुर्गृहीतं यवव्रीहिनिर्मितं वा यावकादि दृष्टार्थेषु लोके स्वस्त्ययनेषु प्रवृत्त्यर्थत्वात् । प्रायेण पलाशादिस्रुवेण होम उपनयनादौ दृष्टत्वात् ॥ १ ॥

प्रायेण स्वस्त्ययनानि इत ऊर्ध्वं दृष्टार्थानि, श्रावणयष्टकादिप्रभृतीन्यदृष्टार्थान्यपि । अत्रैवावसरे प्रथमकर्मफलार्थं स्वस्त्ययनमाह

**सीरा युञ्जन्तीति तिसृभिरायोजनीयस्य ॥ २ ॥**

आयोजनं बलीवर्दसंबन्धः प्रयोजनं यस्य यज्ञस्य स आयोजनीयः । तस्य जुहुयात् सीरा युञ्जन्तीत्यादिभिस्तिसृभिर्ऋग्भिः ॥ २ ॥

**प्रथमोत्तमाभ्यां युनक्ति ॥ ३ ॥**

सीरा युञ्जन्तीति या प्रथमा गायत्री, पूषा

युनक्तीति च या उत्तमा द्विपदा त्रिष्टुप्, ताभ्यां युगान्तरे बलीवर्दान् युनक्ति यूपैः संयोजयतीत्यर्थः। युनक्तियोक्रयतीतिशब्दौ बलीवर्दानां यूपसंयोजने रूढौ ॥ ३ ॥

**मध्यमया फालम् ॥ ४ ॥**

युनक्त सीरेति मध्यमया फालं युनक्ति ॥४॥

**शुनं सुफाला इति प्रदक्षिणं द्वे कृषति ५**

शुनं सुफाला इत्यादिकया ऋचा प्रदक्षिणं कृत्वा द्वे सीते कृषति ॥ ५ ॥

**लाङ्गलं पवीरवमित्यपरे द्वे ॥ ६ ॥**

लाङ्गलं पवीरवमित्यादिकया अन्ये द्वे सीते कृषति ॥ ६ ॥

**घृतेन सीतेति सीतायज्ञस्य ॥ ७ ॥**

घृतेन सीतेति मन्त्रेण सीतायज्ञस्य जुहुयात्। कार्तिकशुक्लद्वादश्यां यवबीजवपनोपक्रमाय सीतायज्ञस्य आर्येषु प्रसिद्धेर्यत्र वीरणादिमयी सीता कुमारीदेवता विरच्यते ॥७॥

**या ओषधय इति बीजवपनीयस्य ८**

बीजं वपनीयं यस्य स बीजवपनीयो यज्ञः।

तस्य या ओषधय इत्यादिना जुहुयात् । सीतायज्ञानन्तरमेवैष यज्ञस्ततो यवबीजवपनम् ८

विमुच्यध्वमिति विमोचनीयस्य ॥९॥

अत्रापि प्रयोजनार्थीयस्तद्धितः । विमुच्यध्वमित्यादिना विमोचनीययज्ञस्य जुहुयात् । सर्वबीजवपनसमाप्तावयं यज्ञः स्वस्तये ॥ ९ ॥

त्रातारमिन्द्रमिति द्वे पर्ययणस्य ॥१०॥

पर्ययणं खलप्राप्तानां व्रीहीणां क्षोदनं बलीवर्दचरणैर्गाहनं यत्र गाहिकेति प्रसिद्धिरार्याणाम् । तत्प्रयोजनस्य यज्ञस्य त्रातारमिन्द्रमित्यादिना द्वयेन जुहुयात् । पर्ययणे द्वे साधने इति तु सूत्रान्वयः ॥ १० ॥

एवं प्रथमोद्वपनस्य ॥ ११ ॥

प्रथमोद्वपनं व्रीह्यादीनां नवनिष्पन्नानामाद्यं वपनम् । तत्प्रयोजनस्य यज्ञस्य त्रातारमिन्द्रमिति द्वे साधनभूते ऋचौ ॥ ११ ॥

उदुत्तमं मुमुग्ध्युदुत्तमं वरुणेति वरुणयज्ञस्य ॥ १२ ॥

तडाकप्रतिष्ठाकालेऽयं वरुणयज्ञः ॥ १२ ॥

सं वरत्रां हिरण्यकेशमवटमिति कूपयज्ञस्य ॥ १३ ॥

नवकूपप्रतिष्ठाकालेऽयम् ॥ १३ ॥

प्र वां दंसासीति मण्डपानाम् ॥१४॥

तमेव यज्ञं कृत्वा कूपसंस्कारार्थं मण्डपानां यवमयानां हुत्वा शेषं भक्षयेदिति शेष इति माथुरप्रभृतयः । अन्ये मण्डपानामिति पाठं दृष्ट्वा व्याचक्षते किल—मण्डमुदकमुच्यते, मण्डं पिवति इति मण्डपः सेतुर्नद्यादितरणोपायः । तेषां प्रतिष्ठार्थं यज्ञं कुर्यात् प्र वां दंसासीतिमन्त्रेण होमान्तम् । कश्मीरेषु च एतद्बाहुल्येन कर्म दृश्यत इत्यादित्यदर्शनेन व्याख्यातम् ॥ १४ ॥

देवेभ्यो वनस्पत इति वनस्पतियज्ञस्य ॥ १५ ॥

फलतरुरोपणकालेऽयम् ॥ १५ ॥

वनस्पते वीड्वङ्ग इति रथयज्ञस्य १६

नवनिर्मितरथारोहणार्थम् ॥ १६ ॥

धन्वना गा इति द्वाभ्यां धनुर्यज्ञस्य १७

धनुषो ग्रहणकाले मासवेधकाले चायं क्षत्रियाणां प्रथमकल्पेन, एवं कृष्यङ्गकर्म वैश्यानामुक्तमिति ज्ञेयं तेषामेव कृषिवृत्तिस्मरणात्, अनुकल्पेन त्वन्यत्र । यदुक्तं

'प्रभुः प्रथमकल्पेऽपि योऽनुकल्पेन वर्तते ।
स नाप्नोति फलं तस्य परत्रेति विचारितम् ॥'
(मनु० ११।३०)

इति ॥ १७ ॥

**रात्री व्यख्यदिति द्वाभ्यां रात्रियज्ञस्य ॥ १८ ॥**

रात्रिजागरणसमयेऽयम् ॥ १८ ॥

अथ मन्त्रभाष्यम् । तत्र गावो भग इति द्वे पदे

गावो भगो गाव इन्द्रो मे अच्छा गावः सोमस्य प्रथमस्य भक्षः । इमा या गावः सजनास इन्द्र इच्छामीद्धृदा मनसा चिदिन्द्रम् ॥ १ ॥

हे सजनासः समाना जनाः, इमा या गावस्ता अहमच्छा इच्छामि आभिमुख्येन इच्छामि अभिलषामि हृदा हृदयेन, मनसा चिदिति निपातश्चार्थे मनसा च मननेन । किमर्थम् । इन्द्रं यष्टुं सान्नाय्येन । इन्द्रयागेनापि किमिति

चेत्, इन्द्र इच्छामि भवितुमिति योजनीयम्। नित्यनैमित्तिककर्मानुष्ठानेन ज्ञानसहकारिणा मोक्षाभिधानपरमात्मलयो भवति। किंच गावः सोमस्य प्रथमस्य भक्षः गाव इति व्यत्ययेन षष्ठ्यर्थे प्रथमा गवां सोमस्य प्रथमस्योत्कृष्टस्य हविषः सान्नाय्यस्याभिषुतरसस्य शेषो भक्षो भवतीति सोमयागेषु। अतो मे मम गाव एव भगः प्रधानं धनं गाव एवेन्द्र इन्द्रलये हेतुत्वात्॥ १॥

न ता अर्वा रेणुककाटो अश्नुते न संस्कृतत्रमुपयन्ति ता अभि। उरुगायमभयं तस्य ता अनु गावो मर्तस्य विचरन्ति यज्वनः॥ २॥

अर्वतीत्यर्वा अश्वः। स ता गा न अश्नुते न व्याप्नोति। कीदृशः। रेणुककाटः पार्थिवस्य रजस उद्भेदकः। संस्कारैर्निवारितमलान् द्विजातीन् तृणाति हिनस्तीति संस्कृतत्रः, तं पापिष्ठं ता गावो नाभ्युपयन्ति तस्य समीपमाभिमुख्ये नागच्छन्तीत्यर्थः। किं तर्हि। उरूणि महाप्रभावाणि कर्माणि गच्छति अनुतिष्ठति, उरूणि वेदादीनि वा गायति यः स उरुगायो

महाप्रभावो धार्मिकस्तस्य यज्वनः अभयस्य अधर्मभयरहितस्य गृहे अनु विचरन्ति क्रीडन्ति ता गावः । मर्तस्य मर्त्यस्य । उरुगायमिति अभयमिति षष्ठ्यर्थे द्वितीये ॥ २ ॥

सीरा युञ्जन्तीति तिस्रः । अदितिनिर्ऋत्यो-रार्षम् । तत्र प्रथमोत्तमाभ्यां युनक्तीत्युक्तम् । प्रथमा गायत्री तावत्

सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक् ।
धीरा देवेषु सुम्नयुः ॥ १ ॥

कवयः क्रान्तफालदर्शनाः सीराणि फालानि युञ्जन्ति यूपेषु नियोजयन्ति । युगा वितन्वते पृथक्, युगानि बलीवर्दस्कन्धेषु निदधति पृथक् पृथक् । धीरा देवेषु, विजिगीषुषु द्योतमानेषु वा मध्ये बुद्धिमन्तः । सुम्नयुः, सुम्नयवः व्यत्ययेनैकवचनं, सुम्नं सुखमिच्छन्ति आत्मन इति सुम्नयवः 'क्याच्छन्दसि' इति उप्रत्ययः ॥

अथोत्तमा

पूषा युनक्तु सविता युनक्तु बृहस्पतिः सविता देवो अग्निः ॥ ३ ॥

द्विपदा । त्रिष्टुप् । पूषा यूपं युनक्तु दान्तस्कन्धे निदधातु । सविता युनक्त्विति समानम् ।

एकस्य सवितृशब्दस्य सकलकृषिफलप्रसवक्रियाणां कर्ता वाच्य इत्यपौनरुक्त्यम् ॥ ३ ॥

मध्यमया फालं युनक्तीत्युक्तम्। सा व्याख्यायते

युनक्त सीरा वि युगा तनोत कृते योनिर्वपतेह बीजम्।
गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः पक्वमेयात्॥

त्रिष्टुप्। सीराणि फालानि युनक्त यूपेषु-योजयत। वि युगा तनोत, युग्यानि वितनुत अगम्यासु योक्त्राणि विसारयतेत्यर्थः। कृते योनिः, हलबलीवर्दादिकृतो योनिरस्ति। अत इह क्षेत्रेषु बीजं वपत। गिरा च श्रुष्टिः सभरा असन्नः, नः अस्माकं श्रुष्टिः कीर्तिरसदस्तु कर्षणात्। यज्ञादिद्वारेण श्रूयते या श्रवणक्रियेप्सिततमा सा श्रुष्टिः। कया। गिरा वाचा श्रुतिस्मृतिरूपया। कीदृशी श्रुष्टिः। सभरा, भर इति तेजोनामसु पठ्यते, हरति साधुमनांसि तमांसि वेति भरः, 'हृग्रहोर्भश्छन्दसि' इति हस्य भत्वम्, सभरा सतेजस्का इत्यर्थः। नेदीय इत्सृण्यः पक्वमेयात्, इदिति पादपूरणे, अतिशयेन निकटमचिरे-

णैव कालेन पक्कं सत् अन्नमस्माकं आ इयात् आगच्छतु । सृण्यः, सृण्या इवाकृष्टो हस्ती, सृणिरङ्कुशः ॥

शुनं सुफाला वितुदन्तु भूमिं शुनं कीनाशा अभियन्तु वाहैः ।
शुनासीरा हव्यजुष्टिं जुषाणेदं बीजमवतमुप्यमानम् ॥

शुनः वायुः, सीरः आदित्यः । हे शुनासीरौ इदं बीजमवतं, हव्यजुष्टिं जुषाणा, हविर्जोषं जुषमाणौ हविः सेवमानौ, द्विवचनस्य 'सुपां सुलुक्' इत्याकारः। किंच युष्मत्प्रसादात् कीनाशाः कर्षकाः शुनं सुखं कृत्वा भूमिं वितुदन्तु व्यथयन्तु पाटयन्तु। तथा सुफालाः सुसंयुक्तफालाः सन्तः एतैर्वाहैर्बलीवर्दैः अभियन्तु अभिगच्छन्तु प्राप्नुवन्तु फलसमृद्धिम् ॥

लाङ्गलं पवीरवं सुशेवं सोमपित्सरु ।
उदिद्वपति गामविं प्रस्थावद्रथवाहनं प्रहव्यं च पीवरीम् ॥

पङ्क्तिः। इत् उत्, एतौ निपातौ पादपूरणार्थौ। लाङ्गलं फालं वपति बीजम्। तदेतावन्न तावत् वक्तव्यं धान्यादिकमेवोत्पादयति, किं तर्हि, गवाश्वयागादिकं सर्वं सस्यव्रीह्यादिद्वारेण । बहुलादन्नात् सर्वं हि उद्भवति विक्रयादिमुखेन। अत उच्यते लाङ्गलं गां वपति अविं च वपति

रथवाहनं च तुरगादिकम् । कीदृशम् । प्रस्थावत् सवेगगमनम् । प्रकृष्टं च हव्यं वपति यज्ञसाधनं पीवरीं तरुणं युवतिं च लिङ्गव्यत्ययेन तन्त्रेण । पवीरवं पविश्चक्रनेमिः, पवेरिव रवो यस्य तत् पवीरवं यथाहि रथो गच्छन् शब्दविशेषं करोति तथा फालं धरणिं पाटयत् । सुशेवं, शेवः सुखं सुसुखम् । सोमपिच्छरु शरु फालमूर्धा अथवा ये भूमिगताः प्रच्छन्ना दानवादयः सोमं पिवन्ति अपहृत्य तान् भूमिविदारणव्याजेन श्रृणाति हिनस्तीति सोमपिच्छरु फालम् ॥

घृतेन सीता मधुना समज्यतां विश्वैर्देवैरनुमतं मरुद्भिः ।
ऊर्जो भागं मधुमत्पिन्वमानास्मान्सीते पयसाभ्यावव्रृत्स्व ॥

सीता भूमिदेवता घृतेन मधुना मधुररसेन समज्यतां संतृप्यताम् । त्वमपिच संतर्पिता सती हे सीते अस्मान् पयसा क्षीरेण सह अभ्यावव्रृत्स्व आभिमुख्येन आवर्तस्व पुनः पुनः सांमुख्यं भजस्व । किं कुर्वती । ऊर्जोऽन्नस्य भागं विभजनं देवब्राह्मणाद्यर्थं मधुमत् मधुररसयुक्तं पिन्वमाना परिपोषयन्ती । कीदृशं

भागम्। विश्वैर्देवैर्योतनै रश्मिभिरनुमतं संमतं मरुद्भिर्वायुभिश्च । धरणिसमीरणरविकिरणसंघट्टनघटितं हि सकलमन्नम् ॥

विमुच्यध्वमघ्न्या देवयाना अगन्म तमसस्परं ज्योतिरपाम ॥

द्विपदा जगती। हे अघ्न्याः अहन्तव्या विमुच्यध्वमस्मदुपकारेण परलोके देवयाना देवशरीरा भूयास्त । वयमपि युष्मत्प्रसादाहितान्नादिना सत्कर्माणि कृत्वा तमसः अविद्यायाः परम् अगन्म गमिष्यामः, गत्वा च तमसः परं ज्योतिरपाम परं ब्रह्म प्राप्स्यामः ॥

त्रातारमिन्द्रमिति द्वे ।

त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः॥

व्याख्यातेयम् ॥ द्वितीया तु

उग्रो जज्ञे वीर्याय स्वधावाञ्चक्रिरपो नर्यो यत्करिष्यत् ।
जग्मिर्युवा नृषदनमवोभिस्त्राता न इन्द्र एनसो महश्चित् ॥

इन्द्रो नोऽस्माकं महश्चित् महत एनसः पापात् त्राता गोपायिता। स हि उग्रः प्रचण्डो जज्ञे जातः वीर्याय रिपुवधाय । स्वधावान् स्वधाया अन्नस्य यज्ञे भोक्ता उत्पादयिता वृष्ट्यादिद्वारेण । नरेभ्यो हितः । अपश्चक्रिः, अप इति

कर्मनाम, करोति चक्रिः, कर्म करोति। यत् करिष्यत्, यच्चिकीर्षितम्। जग्मिर्युवा नृषदनं, नरः सीदन्ति अस्मिन् नृषदनं यज्ञः, गच्छतीति जग्मिर्यज्ञस्य गन्ता, युवा नित्यतरुणः समर्थः यौति मिश्रयति चात्मजीवात्मानौ ज्ञानकर्मसमुच्चययुक्त्येति युवा। अवोभिरवनैः रक्षणप्रकारैस्त्रातेति संबन्धः॥

उदुत्तमं मुमुग्धीति उदुत्तमं वरुणेति च द्वे

उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत।
अवाधमानि जीवसे॥ १॥
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम॥

शुनःशेपस्यार्षम्। द्वितीया व्याख्याता सन्ध्योपासने। हे वरुण उदुत्तमं पाशं विचृत 'चृती च्छेदने' विच्छिन्धि, अवाधमानि पाशबन्धनानि विचृत। जीवसे जीवनाय॥

सं वरत्रामिति हिरण्यकोशमवटमिति द्वे।

सं वरत्रां दधातन निराहावं कृणोतन।
सिञ्चामहा अवतं वयमुद्रिणं विश्वतोऽदस्तमक्षितम्॥

कूपार्थमुच्यते। वरत्रां बलत्रां पानीयाकर्षणार्थं च चर्ममयीं रज्जुं संदधातन। निराहावं

कृणोतन, निराहावं जलनिर्गमनमार्गं कुरुत, यतो वयमत्रतं अवटं कूपगतं सिञ्चामहे सिञ्चामः परिपूरयामः । कीदृशमवतम् । उद्रिणं ऋणा जलधारा उद्गतजलधारम्, तथा विश्वतः सर्वतः अदस्तमनुपहिंसितं, अक्षितं अक्षीणम् । कूपखानकादय एवमुच्यन्ते । घटारघट्टादिर्वा निराहावः, निराहूयते आदीयतेऽनेन जलमिति निराहावः ॥

हिरण्यकोशमवटं सुवरत्रं सुषेचनम् ।
उद्रिणं सिञ्चे अक्षितम् ॥

अवटं कूपं सिञ्चे सिञ्चामि पूरयामि । कीदृशम् । हिरण्यकोशं सुवर्णकोशवत् उज्ज्वलं, सुवरत्रं शोभनरज्जुं, सुषेचनमारामं पिपासितहृदयादेः, उद्रिणं ऊर्ध्वप्रवृत्तजलधारं, अक्षितमनुपक्षीणमनवरतोपयुज्यमानजलमपि ॥

प्र वां दंसांस्यश्विनाववोचमस्य पतिः स्यां सुगवः सुवीरः ।
उपपश्यन्नश्ववन्दीर्घमायुरस्तमिवेज्जरिमाणं जगम्यात् ॥

व्याख्यातेयम् ॥

देवेभ्यो वनस्पते हवींषि हिरण्यपर्ण प्रदिवस्ते अर्थम् ।
प्रदक्षिणेद्रशनया नियूयर्तस्य वक्षि पथिभी रजिष्ठैः ॥

हे वनस्पते अग्ने त्वमृतस्य यज्ञस्य हवींषि

वक्षि प्रापयसि देवेभ्यो देवार्थं, प्रदक्षिणेद्रशनया नियूय, प्रदक्षिण इदिति पादपूरणार्थः प्रदक्षिणं कृत्वा रशनया रज्ज्वा नियूय संमिश्रीकृत्य रज्ज्वा प्रापयसीत्यर्थः । पथिभिर्मार्गैः । कीदृशैः । रजिष्ठैः रजोयुक्तैः । हे हिरण्यपर्ण सुवर्णपत्र प्रदिवस्ते अर्थं प्रतिदिवसं ते तव प्रयोजनं भवति नित्येषु कर्मसु प्रतिदिनं हविषो वहनात्, अथवा प्रदिवः प्रकृष्टायां दिवि स्वर्गस्थितेभ्यो देवेभ्यस्तव प्रयोजनम् । वनस्पतेरधिष्ठात्री देवता अग्निरत्र संबोध्यते ॥

वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः सन्नद्धो असि वीडयस्वास्थाता ते जयतु जेत्वानि ॥

वीडुशब्दः संस्तम्भनामसु पठ्यते । वीडूनि परस्परसंस्तम्भनसमर्थानि अङ्गानि यस्य स वीड्वङ्गः । हे वनस्पते रथ त्वं सखा हि अस्माकं, तथा प्रतरणः प्रकर्षेण तारयति अध्वानमिति प्रतरणः, शोभना भटाः सारथ्यादयो यस्य स सुवीरः, गोभिः गोमन्त्रभिः संनद्धः बद्धोऽसि । त्वं वीडयस्व अवस्तभ्नीहि धारय सारथ्यादीन् दृढावयवसंश्लेषद्वारेणेत्यर्थः । आस्था-

ता ते जयतु जेत्वानि तथा अधिष्ठाता स्वामी जेत्वानि जेतव्यानि जयतु ॥

धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरप कामं कृणोतु धन्वना सर्वाः प्रदिशो जयेम ॥

धन्वना 'ऊधसोऽनङ्' 'धनुषश्च' धनुषा गवादीन् पशून् जयेम । आजिं संग्रामं च धनुषा जयेम । तथा धन्वना तीव्रा उद्धताः समदोऽत्यन्तं मदवतीः शत्रुसेनाश्च जयेम । किंच इदं धनुः शत्रोः शातयितुः कामं काम्यमानमभिलषितमखिलमपकृणोतु अपसारयतु विनाशयतु । तथा धनुषा सर्वदिग्वासिनः प्रकृष्टान् योद्धॄन् जयेम ॥

वक्ष्यन्तीवेदागनीगन्ति कर्णं प्रियं सखायं परिषस्वजाना ।
योषेव शिङ्क्ते वितताधिधन्वञ्ज्या इयं समरे पारयन्ती ॥

इयं ज्या गुणः कर्णं कर्णान्तं आगनीगन्ति अकृष्टा सती अतिशयेन आगच्छति । वितताधिधन्वन्, धनुषि वितता विस्तारिता, पारयन्ती शक्नुवती समरे संग्रामे । किंच आकृष्यमाणा शिङ्क्ते अव्यक्तं शब्दं करोति वक्ष्यन्तीव वि-

वक्षुरिव कर्णमागनीगन्ति, इदिति पादपूरणार्थः। किंच परिषस्वजाना समाश्लिष्यन्ती। केव। योषेव सुन्दरी, सापि परिरिरंसुरेवं भवति॥

रात्री व्यख्यदायती पुरुत्रा देव्यक्षभिः ।
विश्वा अधि श्रियोऽधित ॥
उप ते गा इवाकरं वृणीष्व दुहितर्दिवः ।
रात्रि स्तोमं न जिग्युषी ॥

एते व्याख्याते ॥

इति प्रकीर्णयज्ञमन्त्राः ॥

इत्येकसप्ततितमी काण्डिका ॥ ७१ ॥

अथ

## द्वासप्ततितमी काण्डिका ।

समुपहतेऽद्भुते वा शान्त्यै शमीशमुकशाम्यवाकमश्वत्थप्लक्षन्यग्रोधोदुम्बरं दूर्वां च दर्भपिञ्जलानि सुमनश्चापामार्गं सर्वबीजानि सीतालोष्टं गोमयं हिरण्यं वल्मीकवपां चाद्भिः संसृजति सं वः सृजामीति द्वाभ्याम् ॥ १ ॥

सम्यगुपघातः समुपहतं व्याधिदुर्भिक्षशत्रूदयादिस्तस्मिन् सति, अद्भुते वा अद्भुतमकालोत्थमुल्काधूमकेतुगगनाङ्गनपटहरवाकर्णनदुःस्वप्नाद्यनिष्टसूचकं तस्मिंश्च सति, शान्त्यै शान्त्यर्थं शम्यादीनि षोडश द्रव्याणि अद्भिः सह संसृजति मिश्रयतीत्यर्थः वानस्पत्यान्यन्तर्भावयतीत्यर्थः । पूर्वमेवोद्धृत्य प्रोक्षणकूर्चं कुर्यात् सदाचारात्। सीता हलविलिखिता भूमिस्तस्या लोष्टो मृत्पिण्डः । संमिश्रणं तु सं वः सृजामीति द्वाभ्यां मन्त्राभ्याम् ॥ आज्यभागान्ते चायं संसर्ग इष्टः ॥ १ ॥

या ओषधय इत्यनुवाकेन संयूय ॥२॥

या ओषधय इत्यादिना अनुवाकेन संयोज्या- लोडयतीत्यर्थः ॥ २ ॥

अपास्मदेत्विति चतसृभिः संप्रोक्ष- णम् ॥ ३ ॥

अपास्मदित्यादिभिश्चतसृभिर्ऋग्भिराज्यभा- गान्ते संप्रोक्षणं तावदेकं कुर्यात् । अथ कस्येदं संप्रोक्षणम् । अश्वेभाजपुरुषरथगृहक्षेत्रप्रभृतेः तथासदाचारात्

पारम्पर्यवशायात आचारो वेदपूर्वकः ।
प्रमाणं वेदसंयोगभाजामाचमनादिवत् ॥ ३ ॥

देवाद्भुतेषु यन्नो भयमित्यष्टर्चेन स्था- लीपाकस्य जुहोति ॥ ४ ॥

देवाद्भुतेषु देवाश्रयेषु चन्द्रार्कादिदोषेषु भ- यनिमित्तेषु सत्सु यन्नो भयमित्यष्टाभिर्ऋग्भिः स्थालीपाकेन अष्ट आहुतीर्जुहुयात् ॥ ४ ॥

यद्देवा देवहेडनमिति तिसृभिः ॥५॥

तदनन्तरं यद्देवा इत्यादिभिस्तिसृभिस्तिस्र आहुतीरन्याः स्थालीपाकस्य जुहुयात् ॥ ५ ॥

**भद्रं कर्णेभिरिति चतसृभिः ॥ ६ ॥**

चतस्र अन्या आहुतीः स्थालीपाकस्य जुहुयात् ॥ ६ ॥

**उक्तं संप्रोक्षणम् ॥ ७ ॥**

अस्मिन्नेवावसरे पूर्वोक्तमेव अपास्मदेत्विति चतसृभिः संप्रोक्षणं द्वितीयं कुर्यात् ॥ ७ ॥

**धूर्भिरुपधूर्भिश्च हुत्वा पुनः संप्रोक्षणम् ॥ ८ ॥**

स्थालीपाकानन्तरमृतुतिथ्यादयः प्रागुक्तनयेन स्विष्टकृदङ्गभूताः कर्तव्याः । ततो धुर उपधुरश्चान्या आहुतयः कार्याः । ततः स्विष्टकृदादितन्त्रं समापनीयम् । ततस्तृतीयं प्रोक्षणं कर्तव्यमिति तात्पर्यतो ज्ञेयम् ॥

**अथ मन्त्रभाष्यं**

सं वः सृजामि हृदयं संसृष्टं मनो अस्तु वः ।
संसृष्टास्तन्वः सन्तु वः संसृष्टः प्राणो अस्तु वः ॥
सं या वः प्रियास्तन्वः सं प्रिया हृदयानि वः ।
आत्मा वो अस्तु सं प्रियः सं प्रियास्तन्वो मम ॥

**अनुष्टुभौ । वेधसो वैष्णवस्यार्षम् । वः यु-**

ष्माकं शमिप्रभृतीनां हृदयं सारं संसृजामि संयोजयामि परस्परं संबद्धं करोमि यद्वा सीतादीनां अधिष्ठात्र्यो देवताः संसृज्यन्ते, तासां च हृदयादिसंभवः यजमानेनास्पदादिसंबन्धनिभेन, अधर्मापसारणाय हृदयादीनामद्भिः संसर्ग आशास्यते। संसृष्टं संबद्धमेककार्यसंपादनक्षमं युष्माकं मनो अस्तु मदीयं युष्मन्मनोभिर्युष्मदीयं च परस्परम्। एवं तन्वस्तनवः संसृष्टा युष्माकं सन्तु। प्राणो जीवः संसृष्टो भवतु ॥ १ ॥

या वो युष्माकं तनवस्ताः प्रियाः, तथा हृदयानि चित्तानि प्रियाः प्रियाणि सुखकारीणि संसन्तु सम्यक् भवन्तु। मदीया अपि शरीरादयः शान्तिकर्मणि करणीये श्रेयस्कराः सन्तु इत्यर्थः ॥ २ ॥

या ओषधय इत्यादिरनुवाकः। अनुष्टुप् छन्दः। आथर्वणस्य भिषज आर्षम्। प्राधान्यादोषधीस्तुतिः। तं क्रमेण व्याख्यास्यामः

या ओषधयः प्रथमजा देवेभ्यस्त्रियुगं पुरा।
मनै नु बभ्रूणामहं शतं धामानि सप्त च ॥ १ ॥

या देवेभ्यः प्रथमजा ज्येष्ठा ओषधयः, कियता कालेन ज्येष्ठाः, त्रियुगं पुरा त्रिभिर्युगैः पूर्वभूता ज्येष्ठा इत्यर्थः, तासामोषधीनां बभ्रूणां पक्वरसयोगेन पाटलानामहं धामानि स्थानानि नामानि तेजांसि च मनै मन्ये जानामि । कियन्ति । शतं सप्त च सप्ताधिकं शतमित्यर्थः, पुरुषस्य मर्माणि सप्ताधिकं शतं, तान्येवौषधीनामित्याहुः ॥ १ ॥

शतं वो अम्ब धामानि सहस्रमुत वो रुहः ।
अधा शतक्रतवो यूयमिमं मे अगदं कृत ॥ २ ॥

समुदायादुद्धृत्यैकस्या ओषधेः संबोधनम् । हे अम्ब ओषधे शतं धामानि युष्माकं सहस्रमुत धामानि सहस्रं चेत्यर्थः, असंख्यानि धामानीत्यर्थः । अधा अथ संमिश्रीकरणानन्तरं शतक्रतवो बहुकर्माणो मम संबन्धिनमिमं संमिश्रितद्रव्यसमूहमगदं विषापसारणसमर्थं कृत कुरुत ॥ २ ॥

पुष्पवतीः प्रसूमतीः फलिनीरफला उत ।
अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥ ३ ॥

याः पुष्पवत्यः सुमनःप्रभृतयः, याश्च प्रसू-

वेन गुल्ममञ्जर्यादिना युक्ता यवाद्याः, याश्च फलिन्यो मुद्गाद्याः, याश्च फलरहिताश्चन्दनाद्याः, याश्च वीरुधः, ताः सर्वा एताः पारयिष्णवो नः पारयन्तु विघ्नोपशान्तिमित्यर्थः । अश्वा इव सजित्वरीः, यथा वडवा वेगवाहिन्योऽन्योन्यस्पर्धया जयनशीला अश्वारोहं पारं नयन्ति, तथा ओषधयः सन्तु इत्यर्थः ॥ ३ ॥

ओषधीरिति मातरस्तद्वो देवीरुपब्रुवे ।
रपांसि विघ्नतीरित रक्षश्चातयमानाः ॥ ४ ॥

'उष दाहे' इत्यस्य किल ओषशब्दः, ओषं दाहं विप्लवं धयन्ति नाशयन्तीति ओषधयः । हे मातरः ओषधयो यूयं यथार्थेन नाम्ना प्रसिद्धाः । ततो देवीरोषधीः युष्मान् अहमुपब्रुवे ब्रवीमि, रपांसि पापानि विघ्नतीः नाशयन्तीः ॥ ४ ॥

अश्वत्थे वो निषदनं पर्णे वो वसतिः कृता ।
गोभाज इत्किलासथ यत्सनवाथ पूरुषम् ॥ ५ ॥

हे ओषधयः यत् यस्मात् अश्वत्थे युष्माकं निषदनमवस्थानं पर्णे च पलाशे वसतिर्निवासः कृतः संसर्गेऽन्योन्यान्वितत्वसंपादनात्, यतश्च गोभाजः गवां सेवकाः आप्यायका आसथ

भवथ, तथा पुरुषं सनवाथ 'वन षण संभक्तौ' पुरुषं विभजथ ओदनादिद्वारेण संतर्पयथ, एवंभूता भवत्यः प्रस्तुतकार्यं कुर्वन्तु इत्यर्थः ॥ ५॥

अश्वावतीं सोमावतीमूर्जयन्तीमुदोजसम् ।
आविित्सि सर्वा ओषधीरस्मा अरिष्टतातये ॥ ६ ॥

अहं सर्वा ओषधीः आवित्सि आवेद्मि । अश्वावतीमित्यादौ व्यत्ययेनैकवचनम्, अश्वानां पोषिकाः । सोमावतीं सोमलतापरिपोषिकाः । ऊर्जयन्तीः बलमुत्पादयन्तीः । उदोजसं उद्गतेन ओजसा बलेन युक्ताः । एवंभूता सर्वा आवेद्मि, अतोऽस्मा अरिष्टतातये सन्तु ताः सर्वाः 'रुष रिष हिंसायाम्' रिष्टं हिंसितमरिष्टं श्रेयः, तननं ततिर्विस्तारः, तदर्थमस्माकं सन्तु । अथवा अश्वा इति तेजोनाम, सोम इति शीतनाम, तेन शीतोष्णवीर्यवतीरित्यर्थः ॥ ६॥

यदौषधयः समग्मत राजानः समिताविव ।
विप्रः स उच्यते भिषग्रक्षोहामीवचातनः ॥ ७ ॥

यदा यस्मिन्काले ओषधयः समग्मत संगताः परस्परं संबद्धा भवन्ति राजान इव समितौ संग्रामे महाबलपराक्रमाः, तदा तत्प्र-

सादादेव प्रयोक्ता ओषधीनां शान्तिकर्मणां च भिषक् वैद्यो विप्रश्च विद्वान् ब्राह्मणो यथायथं रक्षोहा रक्षःप्रभृतीनां हन्ता, अमीवानं व्याधिरोगं चातयति नाशयतीत्यमीवचातन उच्यते, नान्यदा। शान्तिकर्मणि प्रयुज्यमाना ओषधय एव शमीप्रभृतयो रक्षःप्रभृतीनुपद्रवकारिणो घ्नन्ति, पञ्चमूलप्रभृतयश्च ओषधयो ज्वरादिरोगान्। तत्संबन्धमात्रेण ब्राह्मणवैद्यप्रभृतयः कीर्तिमासादयन्तीति तात्पर्यम्। स विप्र उच्यते, रक्षोहा स भिषगुच्यते अमीवचातनस्तदेति संबन्धः ॥ ७ ॥

उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते ।
धनं सनिष्यन्तीनामात्मानं तव पूरुष ॥ ८ ॥

शुष्मा बलनाम। उदित्युपसर्ग ईरत इत्यनेन संबध्यते। ओषधीनां शुष्मा बलानि सामर्थ्यानि उदीरते उत्कर्षेण उत्साहे प्रेरयन्ति कुशलिनो वयं संपन्ना इति तत्प्राप्तावध्यवसायोपादानम्। का इव। गाव इव गोष्ठात्, गोस्थानाद्गाव इव क्षीरादिसामर्थ्येन उत्साहकारिण्य ओषधय इत्यर्थः। कीदृशीनामोषधी-

नाम् । धनं द्रविणं सनिष्यन्तीनां विभजमानानां ददतीनाम् । किं धनम् । आत्मानं, ओषधीनामुपयुज्यमानानां न स्वरूपं नश्यति, अत आत्मानमेव ता ददतीति गवादिभ्य उपकारिभ्यो व्यतिरेकः। आत्मव्यतिरेकेणैव परोपकारातिशयमोषधयः कुर्वन्तीति महाप्रभावत्वेन स्तुत्यतिशयः। केन रूपेण सनिष्यन्तीनाम् । तव पूरुष, हे पुरुष तव कृते अयं पुरुष आत्मा अस्माभिः समर्पितस्त्यक्त इति भणित्वा आत्मानं धनं वितरन्ति ता जीमूतवाहनप्रायाः। यथोक्तं

"निजनागकुलप्राणैः प्राणान् रक्षति वासुकिः ।
स्वप्राणैस्तु परप्राणान्वपुर्जीमूतवाहनः ॥"

इति ॥ ८ ॥

अति विश्वाः परिष्ठाः स्तेन इव व्रजमक्रमुः ।
ओषधयः प्राचुच्यवुर्यत्किञ्च तन्वो रपः ॥ ९ ॥

अतिशब्दः अक्रमुरित्यनेन संबध्यते। विश्वाः सर्वाः परिष्ठाः समन्तात् स्थिताः ओषधयोऽत्यक्रमुः अतिशयेन क्रामन्ति गच्छन्ति । कं गच्छन्ति ।व्रजं शान्तिकरणोद्यतं ब्राह्मणसमूहं ज्वरादिशमनोद्यतमोषधिसङ्घम्। यद्येवं किमिति

शम्यादिवत् सर्वा न दृश्यन्ते इति चेदत आह स्तेन इवेति प्रच्छन्नरूपेणेत्यर्थः । आगच्छन्त्यः किं कुर्वन्तीति चेदत आह प्राचुच्यवुर्यत्किंच तन्वो रपः, रपः पापं यत्किञ्च तनोः शरीरस्यात्मद्वारकमस्ति, तत्सर्वं प्राचुच्यवुः प्रकर्षेण च्यावयन्ति ॥ ९ ॥

यास्त आतस्थुरात्मानमाविविशुः परुष्परुः ।
तास्ते यक्ष्मं विबाधन्तामुग्रो मध्यमशीरिव ॥ १० ॥

व्याध्याद्युपद्रुतमुद्दिश्योच्यते । या ओषधयस्तवात्मानं सोपद्रवं शरीरमाविविशुः प्रविष्टाः, परुष्परुरातस्थुः पर्व पर्व व्याप्यास्थिताः रसपरिणतिद्वारेण, तास्ते यक्ष्मं व्याधिं बाधन्तां नाशयन्तु । क इव कम् । उग्रो मध्यमशीरिव, मध्यमलोके अन्तरिक्षे शेते मध्यमशीर्मेघोऽन्धकारो वा, उग्रः पुनर्वायुरादित्यो वा, यथा प्रचण्डो वायुर्मेघमपसारयति आदित्यो वा तमस्तथा तव ओषधयो व्याधिमपनयन्तु ॥ १० ॥

यदहं वाजयन्निमा ओषधीर्हस्त आदधे ।
आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥ ११ ॥

यत् यदा अहमोषधीर्हस्ते आदधे गृह्णामि,

किं कुर्वन्, वाजयन् स्तुवन्नित्यर्थः, अथवा वाजशब्देनान्नवाचिना तत्कार्यं बलं लक्ष्यते बलमाचरन्, तदा यक्ष्मस्य रोगस्य आत्मा पुरा पूर्वं शीघ्रमेव विनश्यति । कस्येव । जीवगृभो यथा, जीवं गृह्णाति जीवगृहो घातकश्चौरादिस्तस्य यथा राजाधिकृतहस्तनिगृहीतमात्रस्य आत्मा पूर्वमेव नश्यति त्यक्तजीवाशतया मृतप्रायो भवति चेष्टाविहीनस्तद्वत् ॥११॥

निष्कृतिर्नाम वो माताथो त्वमसि निष्कृतिः ।
सरः पतत्रिणीः स्थ यदामयति निष्कृत ॥ १२ ॥

हे ओषधयः, वो युष्माकं निष्कृतिर्नाम माता निर्मात्री । निष्कृतिः प्रतिविधानं, प्रजापतिर्निष्कृतिः सर्वप्रतिपादनेषु समर्थत्वात् । अथो अतो हेतोः हे ओषधयः यूयं निष्कृतयो भवथ कारणानुरूपत्वात् कार्यस्य । त्वमसि भवसि निष्कृतिरिति व्यत्ययेनैकवचनम् । अतः सरः पतत्रिणीः स्थ, सरन्तीति सरः वेगवत्यः पतत्रिण्य इव स्थ भवथ संपद्यध्वम् । यदामयति रुजति व्याध्यादिकं, तन्निष्कृत 'कृती छेदने' निःशेषेण कृत नाशयत ॥ १२ ॥

साकं यक्ष्म प्रपत चाषेण किकिजीविना ।
साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥ १३ ॥

हे यक्ष्मरोग चाषेण पक्षिविशेषेण हिंसनपिशुनेन सह प्रपत प्रकर्षेण गच्छ दूरम् । कीदृशेन चाषेण । किकिजीविना कि-कीति शब्दानुकृतिः, शब्दं कुर्वन् यो जीवति प्राणान् धारयति स किकिजीवी, तेन । अन्योऽपि चाष उच्यते योऽसंबद्धं प्रलपति पिशुनादिः । सहि वेगगामी भवतीति सहगमने त्वरितत्वमिह विवक्षितम् । एवमुत्तरत्र । साकं वातस्य संबन्धिन्या ध्राज्यया गत्या प्रपत । साकं नश्य निहाकया निहन्तीति निहाका तया विद्युता साकं नश्य प्रध्वंसस्वेत्यर्थः ॥ १३ ॥

अन्या वो अन्यामवत्वन्यान्यस्या उपावत ।
ताः सर्वाः संविदाना इदं मे प्रावता वचः ॥ १४ ॥

हे ओषधयः वो युष्माकं मध्ये अन्या अन्यामवतु परस्परमात्मानं रक्षतेत्यर्थः, अन्या अन्यस्याः समीपं गच्छतु, प्रीणातु इष्टां वा । एवमन्योन्यं सर्वा उपावत परस्परयोगक्षेमेण संघातावस्थां भजध्वम् । ताः सर्वाः समूहावस्थां

तुल्ययोगक्षेमत्वं चापन्ना इदं मे वचनं प्रावत पालयत सत्यार्थं कुरुत । यूयं हि संविदानाः चैतन्यवत्योऽधिष्ठातृदेवद्वारेण ॥ १४ ॥

अवपतन्तीरवदन्दिवोऽन्तेभ्यस्परि ।
यं जीवमश्नवामहै न स रिष्याति पूरुषः ॥ १५ ॥

ऋषिराह—किल भूमिलोकोपकाराय ओषधयः स्वर्गादवतीर्णाः। ताश्च अवपतन्त्यः अवतरन्त्यः दिवोऽन्तेभ्यस्परि दिवोऽन्तान् लक्षणीकृत्य इदं वक्ष्यमाणमवदन् उक्तवत्यः। किं तत्। जीवं प्राणमश्नवामहै व्याप्नुमः । स नरो न रिष्याति हिंसां न प्राप्नोति यं रसवीर्यपरिणामद्वारेण प्राणिनं व्याप्स्यामः। तस्य हिंसा मा भूदिति वृहस्पत्यादिदेवेभ्यो वरं गृहीत्वा तदनुज्ञाताः सत्य ओषधयो मर्त्यलोकमागता इति यावत् ॥ १५ ॥

याः फलिनीर्या अफला अकोशाः कोशिनीश्च याः ।
वृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः ॥ १६ ॥

याः फलिन्यो व्रीह्याद्याः, याश्च फलविहीनाः सुमनःप्रभृतयः, तथा याः कोशयुक्ता मुद्गाद्याः, कोशशून्याश्च यवाद्या वृहस्पति-

प्रसूता बृहस्पतिमुखैर्देवैरनुज्ञाताः, ताः सर्वा नोऽस्मानंहसः पापान्मुञ्चन्तु पापकृतत्वादापदां तदपसारेण रोगादीनां निवारणमभ्यर्थ्यते ॥१६॥

याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः ॥ १७ ॥

या इदं मदीयाभ्यर्थनवचनं शृण्वन्ति निकटवर्तितया, याश्च न शृण्वन्ति यतो दूरं परागताः दूरे स्थितास्ता अस्मान् पापात् मुञ्चन्तु इति समानम् ॥ १७ ॥

याः सोमराज्ञीर्वरुणस्य राज्ञो
यासां विश्वे देवा अधिपतयश्च सर्वे ।
या अन्तरिक्षे दिवि याः पृथिव्यां
ता नः स्तुता ओषधीः पारयन्तु ॥ १८ ॥

सोमो राजा यासां ताः सोमराज्यश्चन्द्रविमुक्तावश्यायाप्यायिताः, याश्च वरुणस्य राज्ञः संबन्धिन्यः, यासां च विश्वे सर्वे देवा अधिपतयः, याश्चान्तरिक्षे दिवि पृथिव्यां वा अधिष्ठातृदेवतारूपेण स्थिताः, ताः सर्वाः स्तुत ओषधयोऽस्मान् पारयन्तु ॥ इत्यनुवाकः ॥

अपास्मदेत्विति प्रोक्षणे चतस्रः ।

अपास्मदेतु निर्ऋतिर्नेहास्या अपि किञ्चन ।
अगोतां नाष्ट्रां पाप्मानं सर्वं तदपहन्महे ॥ १ ॥

अपास्य नैर्ऋतान्पाशान्मृत्योरेकशतं च ये ।
अपास्य ये सिनाः पाशा मृत्योरेकशतं सुवे ॥ २ ॥
ये ते पाशा एकशतं मृत्योर्मर्त्याय हन्तवे ।
तांस्ते यज्ञस्य मायया सर्वानवयजामहे ॥ ३ ॥
देवीमहं निर्ऋतिं बाधमानः पितेव पुत्रं दमये वचोभिः ।
या जायमानस्य जायमानस्य शिरो देवी प्रति सूरिर्विचष्टे ॥४॥

उशनसः काव्यस्यार्षम् । देवता निर्ऋतिः । तिस्रोऽनुष्टुभः । व्याख्याताश्चैताः ॥

यन्नो भयमित्यष्टौ । ब्रह्मण आर्षम् । अग्निर्यविष्ठो देवता । जगती छन्दः ।

यन्नो भयं गृहमागादबुद्धं यद्देवतः पितृतो यन्मनुष्यतः ।
अग्निर्यविष्ठः प्रणुदातु तद्भयं शं नः प्रजाभ्यः शमु नः पशुभ्यः १

यत् किञ्चित् भयमबुद्धमज्ञातं सत् अस्माकं संबन्धि गृहादिकमागात् आगतं देवतः देवेभ्यः, एवं पितृतो मनुष्यतो वा, तत् अग्निः प्रणुदातु अपसारयतु भयम् । कीदृशोऽग्निः । यविष्ठः अतिशयेन युवा तरुणः समर्थ इति यावत् । तदपसारणाच्च अस्मत्संबन्धिनीभ्यः प्रजाभ्यः पशुभ्यश्च शं सुखमस्तु प्रजार्थं पश्वर्थं सुखमस्तु इत्यर्थः । उशब्दः समुच्चयार्थः ॥ १ ॥

यदद्भुतं प्रहितं नो अमित्रैर्गृहे निखातं यदि वापि क्षेत्रे । अग्निर्यविष्ठः प्रणुदातु तद्भयं शं नः प्रजाभ्यः शमु नः पशुभ्यः ॥ २ ॥

नः अस्माकममित्रैः शत्रुभिर्यदद्भुतं प्रहितं निहितं गृहे केशकीलपुत्रिकादिकमभिचारार्थं क्षेत्रे वा निखातं, तत् भयं यविष्ठोऽग्निः प्रणुदातु तत्कृतं भयमपसारयतु । तुल्यमन्यत् ॥२॥

यदद्भुतं प्रहितं नो अमित्रैर्गवां गोष्ठे यदि वा पशूनाम् । अग्निर्यविष्ठः प्रणुदातु तद्भयं शं नः प्रजाभ्यः शमु नः पशुभ्यः ॥ ३ ॥

गवां गोष्ठे निवासस्थाने यदि वा पशूनां संचारस्थाने अमित्रैः शत्रुभिर्भयनिमित्तं अर्कपर्णादि प्रहितं निहितं, तदग्निरिति समानम् । तथाच श्रूयते

'यं द्विष्यात्तस्य संचरे पशूनां न्यस्येत्'

इति ॥ ३ ॥

यदारोहच्छकटं यद्रथं गौरात्मवधे ज्ञातिवधाय सृष्टः । अग्निर्यविष्ठः प्रणुदातु तद्भयं शं नः प्रजाभ्यः शमु नः पशुभ्यः ॥ ४ ॥

'अथैषां गौरेतेनाभिचरन्यजेत ।'

इत्यभिचारार्थो गोसंज्ञकयज्ञे गोरुत्सर्ग आम्नातः । सच शत्रुवर्गे उत्सृष्टो यं यं रथादिक-

माक्रामति, तस्य तस्य पीडा भवति । तदिदमुच्यते—यदस्माकमात्मनो वधाय ज्ञातीनां वा अस्माकं वधाय गौः सृष्टः उत्सृष्टः सन् शकटरथादिकमारोहति आक्रामति तस्य चाक्रम्यमाणस्य पीडा भयमापतति यत्, तदग्निरित्यादि तुल्यम् ॥ ४ ॥

यां गोमायुर्वदति यामुलूको याश्च वाचो अशिवा वदन्ति ।
अग्निर्यविष्ठः प्रणुदातु तद्भयं शं नः प्रजाभ्यः शमु नः पशुभ्यः ॥ ५ ॥

गोमायुः सृगालसंज्ञको यां वाचं वदति अशुभसूचनीं, यामुलूको वदति, अशिवाः सृगाल्यः या वाचो वदन्ति तत्सूचितं भयं, तदग्निरिति समानम् ॥ ५ ॥

यद्धेनुर्धेनुं धयति श्वा वा श्वानं खादति रासभे युगे ।
अग्निर्यविष्ठः प्रणुदातु तद्भयं शं नः प्रजाभ्यः शमु नः पशुभ्यः ॥ ६ ॥

यत् धेनुर्गौः धेनुं धयति पिवति तदा भयं भवति, श्वा वा श्वानं खादति उपलक्षणमेतत् सजातीयेन भक्षणं सजातीयस्य प्रजानां भयं द्योतयति, यत् रासभे गर्दभे स्वप्ने दृष्टे अधिष्ठिते वा भयं रासभ उष्ट्रारोहणाद्युपलक्षणं,

यच्च युगे भयं स्वप्ने पितृयुवतिदर्शनं भयावहम्। युगग्रहणेनानेकपितृसंबन्ध उपलक्ष्यते। गर्दभे युगे वाहनीभूते इति वा अस्यार्थो व्याख्येयः। रासभेन सह युगः संबन्धः साहचर्यमशुभावहमिति साहचर्येऽपि योजना समूललक्षणाद्यनुसारेण॥ ६ ॥

चन्द्रग्रहे सूर्यग्रहे यद्भयमुल्कापाते भूमिचलेऽवस्फूर्जे। अग्निर्यविष्ठः प्रणुदातु तद्भयं शं नः प्रजाभ्यः शमु नः पशुभ्यः ॥ ७ ॥

भूमिचलो भूकम्पः। अवस्फूर्जो विद्युत्पातः॥

यदद्भुतं यदिह किञ्चिद्भूतं भविष्यदभवद्यदिह कर्हिचित्। अग्निर्यविष्ठः प्रणुदातु तद्भयं शं नः प्रजाभ्यः शमु नः पशुभ्यः ॥ ८ ॥

यदद्भुतं दुष्टचिह्नं कदाचिद्भूतं, यच्च भविष्यति, यच्च अभवत् वर्तमानमित्यर्थः ॥ ८ ॥

यद्देवा देवहेळनं देवासश्चकृमा वयम्।
अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥ १ ॥

अत्र निचुङ्कुणस्यार्षम् 'हेडृ अनादरे' देवहेडनं देवापराधः। हे देवाः, हे देवास इति द्वे संबोधने अतिशयार्थे। हे देवाः यत् देवहेडनं वयं चकृम कृतवन्तः, तस्मादेनसः पापात् विश्वात् समस्तादग्निरस्मान् विमुञ्चतु ॥ १ ॥

यदि दिवा यदि नक्तमेनांसि चकृमा वयम् ।
वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥ ॥ २ ॥

गतार्था ॥ २ ॥

यदि जाग्रद्यदि स्वप्न एनांसि चकृमा वयम् ।
सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥ ३ ॥

न अत्रापि तिरोहितं किञ्चित् ॥ ३ ॥

भद्रं कर्णेभिरिति चतस्रः । विश्वेदेवा देवता । शिशुशैशवयोरार्षम् । प्रथमा त्रिष्टुप् । द्वितीया पङ्क्तिः । तृतीया जगती । चतुर्थी त्रिष्टुप् ।

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥ १ ॥

यजत्रा यष्टव्या यष्टारश्च व्यशेम प्राप्नुयाम देवहितम् ॥ १ ॥

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

स्वस्ति अविनाशमिन्द्रादिरस्माकं विदधातु । श्रव इति धनयशसोर्नाम । वेद इति धननाम ज्ञात्यभिधानं वा, सर्वधनः सर्वज्ञो वा । तार्क्ष्यो गरुडः । स एव अरिष्टनेमिरहिंसित अश्वः ॥२॥

पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे मा देवा अवसागमन्निह ॥

व्याख्यातेयमपि पृषातकहोमे ॥ ३ ॥

शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥

इच्छब्दः पूरणार्थः । 'श्वस प्राणने अन च' अननं अन्ति जीवितं अन्तिशब्दादमो लुक् । हे विश्वेदेवाः नोऽस्माकं शतं शरदो वर्षशतं अन्ति चक्राः कृतवन्तः, यत्रायुषि तनूनां जरसं वृद्धत्वं चक्राः कृतवन्तः, वर्षशतमध्ये हि वृद्धत्वं भवति, यत्र च पुत्राः पितरो भवन्ति यो हि वर्षशतं जीवति तस्य पुत्रा अपि पितरो भवन्ति, अतो नोऽस्माकं गन्तोर्गन्तुमुद्यतानां वर्षशतान्तं मध्ये अन्तरा आयुर्मा रीरिषत 'रिषिर्हिंसार्थः' मा हिंसीत् कश्चिदायुरित्यर्थः ॥ ४ ॥

ऐन्द्राग्नमित्येका षोडशी ।

ऐन्द्राग्नं वर्म बहुलं यदुग्रं विश्वे देवा नातिविध्यन्ति शूराः । तन्नस्त्रायतां तन्वः सर्वतो महदायुष्मन्तो जरामुपगच्छेम जीवाः ॥

व्याख्यातेयम् । इत्यद्भुतशान्तिः ॥

इति द्वासप्ततितमी काण्डिका ॥ ७२ ॥

अथ

## त्रिसप्ततितमी काण्डिका।

राका होलाके ॥ १ ॥

होला कर्मविशेषः सौभाग्याय स्त्रीणां प्रातरनुष्ठीयते। तत्र होलाके राका देवता मन्त्रलिङ्गात् यास्ते राके सुमतय इत्यादेः। अन्ये तु व्याचक्षते—एतत् सौभाग्यार्थं कर्म क्वचिद्देशे राकाशब्देन प्रसिद्धं, क्वचित् होलाकशब्देन। तथा देशविशेषे क्वचित् सुखकुमारी होलेत्युच्यते। अतः शब्दभेदादौपाधिकं भेदमाश्रित्य राका च होलाका च राकाहोलाके इति द्वन्द्वः। वक्ष्याम इत्यध्याहारः। राकाहोलाकापर्यायं कुमारीसुखार्थं यज्ञं विवाहोपक्रमप्रसिद्धानुष्ठानं वक्ष्याम इत्यर्थः॥ १ ॥

तमेवाह

इन्द्राणीमासु नारीष्विति कुमारीणां यज्ञं यजेत् ॥ २ ॥

कुमारीणां सुखार्थं प्रधानस्थाने आज्यभागान्ते यज्ञं यजेदृत्विक् चतुर्गृहीतेनाज्येन इन्द्राणीत्यादिमन्त्रेण। अत ऊर्ध्वमृतुतिथ्यादि समानम् ॥ २ ॥

इति त्रिसप्ततितमी काण्डिका ॥ ७३ ॥

इदानीं शास्त्रान्ते प्रकीर्णं यदवशिष्टं, तदाह

देवता अप्रज्ञायमाना आग्नेय्या यजेद्वैश्वदेव्या वा ॥ १ ॥

यत्र कर्मणि देवताविशेषो न प्रज्ञायते मन्त्रब्राह्मणवाक्यशेषेभ्यो बहुदेवतानामश्रुतिसंमोहितत्वेन, तत्र आग्नेय्या अग्निदेवताकया क्वचित् वैश्वदेव्या वा यजेत व्यवस्थितविकल्पेन, यथा उपनयनचूडाकरणप्रभृतिषु आज्यभागान्ते प्रधानस्थानेऽयमुपदेशः ॥ १ ॥

स्वस्तिपुण्येष्वनादेशे त्रिकाः ॥ २ ॥

स्वस्ति अविनाशस्तदर्थानि स्वस्त्ययनानि स्वस्तिशब्देनोच्यन्ते। पुण्यानि पावनानि सं-

स्कारकर्माणि गर्भाधानान्नप्राशनप्रभृतीनि । तेषु देवताविशेषस्य यत्र अनादेशोऽनुद्देशस्तत्र त्रिकाः प्रधानस्थाने कर्तव्याः । तद्द्योत्याश्च प्रधानदेवतास्त्रिकाः पुनश्चत्वारोऽनुवाकस्था बार्हस्पत्ययाम्यरौद्रवारुणास्तव श्रिये इत्यनुवाकद्वये पठिताः ॥ २ ॥

**महाव्याहृतयोऽष्टर्चं चात्र कल्पयन्ति ३**

तत्र महाव्याहृतयः प्रसिद्धाः ॥ ३ ॥

अष्टर्चं तु विभज्य दर्शयति

**अग्निर्मूर्धेति चतस्र उपप्रयन्त इति द्वे, कदाचन स्तरीरिति द्वे धुरश्चोपधुरश्च धुरश्चोपधुरश्च ॥ ४ ॥**

स्पष्टोऽष्टानां विभागः । धुरश्चोपधुरश्च प्रधानस्थाने यष्टव्याः । शास्त्रान्ते मङ्गलार्थं धुरामुपधुरामभ्यासः । शास्त्रतदर्थप्रतिज्ञातार्थानुष्ठानावृत्तिर्हि परमं मङ्गलं तदावृत्त्या द्योत्यते । शास्त्रान्ते च मङ्गलोपसंहार इष्यते । यथोक्तं

'मङ्गलादीनि मङ्गलमध्यानि मङ्गलावसानानि च शा-

स्त्राणि प्रथन्ते वीरपुरुषाण्यायुष्मत्पुरुषाणि च भवन्ति ।'
( म० भाष्य० )

इति शुभम् ॥

## अथात्र मन्त्रभाष्यं

यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ।
ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ॥

सीमन्तोन्नयने व्याख्यातेयम् ॥

इन्द्राणीमासु नारीषु सुपत्नीमहमश्रवम् ।
नह्यस्या अपरं च न जरसा मरते पतिः विश्वस्मादिन्द्र उत्तरः ॥

इन्द्र आह । आसु सर्वासु नारीषु मध्ये अहमिन्द्राणीमिन्द्रपत्नीमेव सुभगामुत्तमामश्रवं शृणोमि ततो नहि अस्या अपरं नहि पत्युपासाव्यतिरिक्तः स्त्रीणां गुण आम्नातः । अत इयं सर्वोत्तमा । एतन्माहात्म्यादेव अस्याः पतिरिन्द्रो जरसा वृद्धो नान्यपतिवत् म्रियते । विश्वस्मात् सर्वस्मादिन्द्रः पतिरस्या उत्कृष्टोऽत एव ॥

अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपण्यया ।
समिद्धः शुक्र आहुतः ॥

व्याख्याता आग्नेय्याम् ॥

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

इयमपि वैश्वदेवे विवृता ॥

तव श्रिये इति चत्वारस्त्रिकाः। तत्र देवासुराणामार्षम् ।

तव श्रिये व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदङ्गिरः ।
इन्द्रेण युजा तमसा परीवृतं बृहस्पते निरपामौब्जो अर्णवम् ॥ १ ॥

बृहस्पते अति यदर्यो अर्हद्द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवसर्तप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥२॥

बृहस्पतिः समजयद्वसूनि महो व्रजान्गोमतो देव एषः ।
अपः सिषासन्स्वरप्रतीतो बृहस्पतिर्हन्त्यमित्रमर्कैः ॥३॥

वार्हस्पत्योऽयं त्रिकः। जगती छन्दः। नक्षत्रयज्ञेषु पूर्वा व्याख्याता। हे बृहस्पते तत् द्रविणं धनं चित्रं हेममहामणिप्रमुखं चायनीयं वा अस्मासु देहि धेहि वा। किं तत् । अति यदर्यः, अतिशयेन अरणीयः सेवनीयो राजादेः। अर्हत् अतिपूज्यमित्यर्थः। द्युमत् द्युतियुक्तं भास्वन्मणिकनकादिकं विभाति विशेषेण

भाति, जनेषु ऋतुमत् । यच्च दीदयत्, अतिशयेन दीप्तियुक्तं, शवसा बलेन हस्त्यादिना युक्तम् । हे ऋतप्रजात, ऋताद्धि सत्यात् प्रजापतेः परब्रह्मणः त्वं प्रकर्षेण जातः, अथवा ऋतेन सत्येन प्रज्ञाविशेषेण युक्तस्त्वं जातः॥२॥

वाग्वै वृहती । तस्याः पतिः सुरगुरुः स्तनयित्नुर्देवता वा वसूनि धनानि गोरूपाणि असुरैरपहृतानि देवताभ्यः समजयत् प्राग्वर्णितसमरोपाख्यानप्रकारेण सेनापतिर्भूत्वा गाः प्रत्याजहार प्रत्यावर्तयामास, जलानि वा वसूनि वसूनां निमित्तभूतानि मेघाधिष्ठातृदेवता जयति । महो व्रजान्गोमतः, लिङ्गव्यत्ययेन वसुविशेषणमेतत् । महो व्रजान् वृहतः समूहान् गोमतः गोसंबन्धिनः, उदकपक्षे तु गोमतो बलवतो महोव्रजान् मेघान्, सहि तान्वशीकृत्य जलं त्याजयति । अत एव वृहस्पतिर्देवो विजिगीषुः पौरुषेण द्योतमानः, नान्यः । अपः सिषासन् 'षण दाने' अपो ददत् । स्वरप्रतीतः, स्वश्च समजयत् द्यां स्वर्गं च जितवान् अप्र-

तीतः सन् प्रतीतिः प्रतीतं न विद्यते अन्यत्र प्रतीतिरपेक्षा यस्य सोऽप्रतीतः । किंच बृहस्पतिर्हन्त्यमित्रमर्कैः सुरगुरुमंत्रैः, मेघदेवता तु अन्नैः ॥ १ ॥

यमो दाधार पृथिवीं यमो द्यामुत सूर्यम् ।
यमाय सर्वमित्तस्थे यत्प्राणद्वायुरक्षितम् ॥ १ ॥
यथा पञ्च यथा पड्यथा पञ्च दशर्षयः ।
यमं यो विद्यात्स ब्रूयाद्यथैकर्षिर्विजानते ॥ २ ॥
त्रिकद्रुकेभिः पतति षडुर्वीरेकमिद्बृहत् ।
गायत्री त्रिष्टुप्छन्दांसि सर्वा ता यम आहिता ॥३॥

यमो देवता त्रिके । अनुष्टुप् छन्दः । यमो दाधारेति व्याख्याता ॥

यो यमं विद्यात् जानीयात्, स ब्रूयात् यमस्य स्वरूपम् । कस्मै ब्रूयात् । विजानते विशिष्टज्ञानयुक्तायैव, नतु अज्ञाय । यथैकर्षिः, एक एव ऋषिः परमात्मा यथा जानन् विजानते परमं रहस्यमर्पयति तद्वत्, यथा वा अन्ये ऋषय इन्द्रियादयः जानन्त एव ज्ञानशक्तियुक्तायैव विषयमर्पयन्ति । तत्र पञ्च बाह्येन्द्रियाणि ।

तान्येव मनोपेक्षया षट् । करणं त्रयोदशविधं, आत्मा, विषयाश्चेति पञ्चदश ॥

गायत्र्युष्णिगित्येवमादीनि यानि च्छन्दांसि, तानि सर्वाणि यमे परमात्मनि आहितानि तद्विवर्तत्वात् तत्परिणामत्वाद्वा । सर्वा ता आहिता इति सर्वत्र 'शेश्छन्दसि बहुलम्' इति शेर्लुक् । एकमिद्बृहत्, इदिति पूरणे, यत एकमेव बृहत् परमं महत् ब्रह्म अद्वितीयमतः सर्वस्य परमात्मनि आधानम् । त्रिकद्रुकेभिः पतति, त्रिकद्रुकनामानः कर्मविशेषाः, उपलक्षणमिह त्रिकद्रुकग्रहणम्, त्रिकद्रुकादिभिः कर्मभिर्यत् स्वाङ्गादीन् पतति आप्नोति यजमानः फलविशेषान्, तेषां सर्वेषां परमात्मनि आधानम् । यच्च षडुर्वीः, षट् उर्व्यः पृथिव्यन्तरिक्षादयः षड्देवताः महाप्रभावास्ता अपि ब्रह्मणि आहिताः । उर्वीग्रहणमपि इह सर्वदेवतोपलक्षणार्थम् । षडुर्व्यः—पृथिवी, द्यौः, अन्तरिक्षं, अहः, रात्रिः, ओषधयः ॥ २ ॥

मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते । यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु ॥

अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः ।
सुम्नायन्निद्विशो अस्माकमाचरा रिष्टवीरा जुहवाम ते हविः ॥
त्वेषं वयं रुद्रं यज्ञसाधनं वङ्कुं कविमवसे निह्वयामहे ।
आरे अस्मदमतिं हेडो अस्यतु सुमतिमिद्वयमस्यावृणीमहे ॥

व्याख्यातोऽयं रौद्रस्त्रिकः ॥ ३ ॥

अव ते हेळो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः ।
क्षयमस्मभ्यमसुर प्रचेतो राजन्नेनांसि शिश्रथः कृतानि ॥१॥
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥ २ ॥
तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेळमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः ॥३॥

अयमपि चतुर्थस्त्रिको वारुणो व्याख्यातः॥

अथाष्टर्चः

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
अपां रेतांसि जिन्वति ॥ १ ॥

उभा वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै ।
उभा दातारविषां रयीणामुभा वाजस्य सातये हुवे वाम् ॥
अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशे विशे ॥
अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः ।
तं जानन्नग्न आरोह ततो नो वर्धया रयिम् ॥ ४ ॥

एताश्चतस्रो व्याख्याताः ॥

उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये ।
आरे अस्मे च शृण्वते ॥ ५ ॥

अस्य प्रत्नामनुद्युतं शुक्रं दुदुह्रे अह्रयः ।
पयः सहस्रसामृषिम् ॥ ६ ॥

एते व्याख्याते ॥

कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते ॥७॥

परि ते दूडभो रथोऽस्माँ अश्नोतु विश्वतः ।
येन रक्षसि दाशुषः ॥ ८ ॥

एते व्याख्याते । धुरश्चोपधुरश्चोक्ताः ॥

इति चारायणीयमन्त्रभाष्यम् ॥

कृतिः श्रीमदाचार्यवर्यस्वामिभट्टारकहरिपालसूनु-

देवपालपूज्यपादानाम् ॥

S294.1 K133L
42
Laugākshi-Gṛhya-Sutras
52139

15. R5